Śāntarakṣita

Vādanyāyaṭīkā Vipañcitārthā

SARIT

SARIT

Contents

Contents i

१ १. निग्रहस्थानलक्षणम् १

२ २. न्यायमतखंडनम् ५५

The TEI Header १०१

Abbreviations 102

References 102

१ १. निग्रहस्थानलक्षणम्

1/s

नमो विघ्नप्रमथनाय ॥ §1 1b/msK

...1 नानासद्गुणरत्नराशिकिरणध्वस्तान्धकारस्सदा [,]
यो नानाविधसत्त्ववांछितफलप्राप्त्यर्थमत्त्युद्यतः ।
तन्निःशेषजगद्धितोदयपरन्नत्वार्यमञ्जुश्रियं ।
वादन्यायविभाग एष विमलः सङ्क्षिप्त आरभ्यते ॥ [१]§5

यत्प्रयोजनरहितं तत्प्रेक्षापूर्व्वकारिभिर्न्नारभ्यते । यथा बलित्वग्दर्श-नविनिश्चयादिकं । अप्रयोजनश्चेदं प्रकरण मित्याशंकावतस्तदाशंकाप-रिजिहीर्षया प्रयोजनप्रदर्शनाय न्यायवादिन VN$_{ms}$:1b1 मित्यादिवाक्यमुप-न्यस्तवान् । कथम्पुनरनेन वाक्येनास्य प्रयोजनमुपदर्श्यत इत्यास्तां तावदेतद् । अर्थस्तु व्याख्यायते ॥ न्यायस्त्रिरूपलिङ्गलक्षणा युक्तिः । नीयते प्राप्यते विवक्षितार्थसिद्धिरनेनेति कृत्वा अत एव त्रिविधं लिङ्गमिVN$_{ms}$:1b2 त्या-दिना त्रि रूपमेव लिङ्गमनन्तरम्वक्ष्यति । तदभिधायि वचनमित्यपरे । तम्व-दितुं शीलं यस्य स तथोक्तः । तमपि निगृह्णन्ति पराजयन्त इत्यर्थः । निगृह्णन्तु नामान्याय वादिनम्पराजयाधिकरणत्वादेव । न्यायवादिनन्त्वनिग्रहार्हमपि य-न्निगृह्णन्त्येतन्न सम्भाव्यते । परोत्कर्षव्यारोपधियस्तु तमपि पराजयन्त इति सम्भावना यामपि शब्दः समुच्चयार्थोऽतिशयद्योतनार्थो वा केषु [।] निगृह्ण-न्तीत्याह । वादेषु VN$_{ms}$:1b1 साधनदूषणसंशब्दितेषु विचारेष्विति यावत् । विवादेष्विति क्वचित्पाठः । तत्र विरुद्धा वादा विवादा स्तेष्विति व्याख्येयं । विरुद्धाश्च कथं [।] साधनदूषणसंशब्दितानाम्विचाराणान्तद्विरुद्धार्थसाधनप्र-वृत्तत्वात् ॥ कथम्पुनर्न्यायवादिनमसत्त्वसि द्ध्यादिषु हेतुदोषेषु निगृह्णन्ती त्याह ॥ असद्व्यवस्थोपन्यासैः । VN$_{ms}$:1b1 असतामसाधूनाम्व्यवस्थाः । अस-त्यो वा व्यवस्थाः सद्भिः कुत्सितत्वात् । ताश्च फलजात्यसन्निग्रहस्थानलक्ष 2/s
णास्तासामुपन्यासाः । प्रयोगस्तैरिति विग्रहः । के पुनरह्रीकास्त एवं विधा 2a/msK
इत्याह ॥ शठा धूर्ता मायाविनः परसम्पत्तावीर्ष्यालव इति यावत् । यस्मात्त तथा निगृह्णन्ति इति तस्मात्तन्निषेधार्थं तेषां शठानान्तेषाम्वा ऽसद्व्यवस्थोप-न्यासानान्तस्य वा निग्रहस्य त्रयाणां वा निषेधो निरासस्तदर्थन्तन्निमित्तमिद-म्प्रकरणमारभ्यते ॥ स ए वार्थोऽस्ये ति विग्रहीतव्यं । तन्निषेधे च कृते स-म्यग्विचारः प्रवर्तते तत्पूर्वकश्च सर्वः पुरुषार्थ इत्यभिप्रायः । आसन्नविषयिणा त्वन्तर्विपरिवर्त्ति प्रकरणमिदमापरा मृषति । अन्तस्तत्त्वात्मना परिनिष्पन्नत्वात् । अन्यथाऽपरिनिष्पन्नात्मतयाऽसन्नत्वाभावादिदम् शब्दप्रयोगो न स्यात् । आरभ्यत VN$_{ms}$:1b1 इति वर्तमानकालनिर्देशः [।] क थमिति चेत् । वर्तमानसामीप्ये वर्तमानवद्वे पाणिनिः ३।३।३१ ति वचनात् सम्बन्धोऽप्य-

भिधानीय एवान्यथा बालोन्मत्तप्रलापवदग्राह्यमिदं प्रेक्षापूर्वकारिणाम्भवेदिति
चेत् सत्यमेतत् । प्रयोजनान्तर्गतत्वात् पृथ ग सौ नाभिहितः । तथाहि त-
न्निषेधार्थमिदमारभ्यते VN_{ms}:1b1 ततश्चैतत्प्रयोजनमनेन प्रकरणेन साध्यते
। तथा च प्रयोजनप्रकरण योः साध्यसाधनलक्षणः सम्बन्ध इति सूचितं ।
ये त्वन्ये क्रियानन्तर्यादिलक्षणाः सम्बन्धास्ते न वाच्या एव प्रकरणक्रियायाम-
नङ्गभूतत्वात् । तथाहि तेषु सत्स्वपि प्रयो जनाभावे नारभ्यत एव प्रकरणं
। असत्स्वपि च तेषु सति प्रयोजने प्रारभ्यत एव । तस्मात्प्रकरणारम्भस्य
प्रयोजनान्वयव्यतिरेकानुविधानात्प्रयोजनमेवाभिधानी यम्प्रेक्षापूर्वकारिणा ।
तस्मिंश्चाभिहिते सम्बन्धोप्युक्त एव भवतीति मन्यते । नानवधारितप्रकरण
2b/msK शरीराः प्रवर्तन्ते प्रेक्षावन्तस्तस्मात्प्रयोजनवत्प्रवृत्त्यङ्गत्वात्प्रकरण शरीरमपि
वक्तव्यमेवेति चेत् । एवमेतत्प्रयोजनवाक्येन त्वभिहितत्वान्नैव तदपि सम्बन्ध-
वत्पृथगभिधानमर्हति । यतस्तन्निषेधार्थमिदमारभ्यत इत्युक्तमतश्च तत् निषे
धोऽस्य शरीरमित्युक्तम्भवति । यदा चैतन्निषेधार्थमिदमारभ्यते तदा पूर्वको
हेतुरसिद्धः । प्रतिप्रमाणद्वयश्चानेन सूचितं प्रारब्धव्यमिदम्प्रकरणम्प्रेक्षावता
सति सामर्थ्ये । ग्राह्यम्वा प्रयोजनवत्वात् । सम्बन्धवत्वाच्च तदन्यशास्त्रवदिति
स्वभावहेतुः । §6

3/s

एवमभिधाय प्रयोजनं सकलप्रकरणार्थसंग्राहकं श्लोकमाह असाध-
नाङ्गचन VN_{ms}:1b1 मित्यादिना । असाधनाङ्गवचनमदोषोद्भावनञ्च द्व-
योर्वादिप्रतिवादि नोर्यथाक्रमं निग्रहस्थानं पराजयाधिकरणं । अन्यत्त्वित्येत
द्वेयव्यतिरिक्तम क्षपादप रिकल्पितं प्रतिज्ञासंन्यासादिकं वक्ष्यमाणं निग्र-
हस्थानं न युक्तमिति कृत्वा नेष्यते [।] निग्रहस्थानमिति वर्त्तते । अयं
तावत् स मासेन श्लोकार्थः । इष्टस्ये VN_{ms}:1b1 त्यादिना विभागमारभते
। इष्टोऽर्थोऽनित्यः शब्द इत्यादि साध्यत्वेनेप्सितः । तस्य सिद्धिः प्रतिपत्तिः
साधनं । तदनेन भावस्य साधनोयं साधनशब्दस्तावदस्मिन्व्याख्यानेऽभिप्रेतो
न तु करणसाधन इति दर्शयति ॥ तस्य साधनस्येष्टार्थसिद्धिलक्षणमस्याङ्ग
किन्तदित्याह । निर्वर्त्तकं जनकं । अने नाङ्गशब्दं व्याचष्टे । कारणप-
र्यायोयमत्राङ्गशब्दो नावयवपर्याय इत्यर्थः । तच्च साधनाङ्गमिह निश्चित-
त्रैरूप्यं लिङ्गमुच्यते । अस्य साधनाङ्गस्य वचनं त्रिरूपलिङ्गा ख्यानं । तस्य
साधनाङ्गस्यावचनमनुच्चारणम VN_{ms}:1b2 नभिधानं यत्तदसाधनाङ्गवचनं ।
अनेनैतत्कथयति असाधनाङ्गस्य पक्षोपनयनादेर्वचनमसाधनाङ्गवचनमिति नै
3a/msK व प्रतिपत्तव्यमस्मिन्व्याख्याने । किन्तु साधनाङ्गस्यैवावचनमसाधनाङ्गवचन-
मिति । तदसाधनाङ्गवचनं वादिनो निग्रहस्थानं । तदेतेन श्लोकस्य पूर्व्वभाग-
म्विवृणोति । कथम्पुनः साधनाङ्गस्यानुच्चारणम्भवति निग्रहस्थानं चेत्याह ।
तदभ्युपगम्येति VN_{ms}:1b2 तदितीष्टं साध्यमभ्युपगम्याहमेतत्साधयामीति
प्रतिज्ञयाप्रतिभया करण भूतया तूष्णीम्भावात् । अप्रतिभाऽत्र पूर्व्वाधिगतार्थ-
विस्मरणं स्तम्भितत्वञ्च गृह्यते । §7

अनेन सर्व्वथा साधनाङ्गस्यावचनमाह अभिधाने वा यदि न समर्थितं तदोक्तमप्यऽ नूक्तमेव स्वकार्याकरणात् । इत्यभिप्रायवानाह [—] साधनाङ्गस्यासमर्थनाद्वेति VN_{ms}:1b2 । तदभ्युपगम्येतिवर्तते । वा शब्दः पुर्व्वापेक्षया विकल्पार्थः । साधना ङ्गस्यासमर्थनं त्रिष्वपि रूपेषु निश्चयाप्रदर्शनं । तस्मात्तूष्णीम्भावादसमर्थनाच्च साधनाङ्गस्यानुच्चारणं । ततश्च प्रतिज्ञातार्थाकारणात् वादिनो निग्रहाधिकरण मिति VN_{ms}:1b2 प्रकृतेन सम्बन्धः । क्वचित्तु वादिन इति पाठः । तत्र तच्छब्देन प्रकृतमनुच्चारणं संबध्यते । §8

कथम्पुनः साधनाङ्गासमर्थनम्भ वति । येन तद्विपर्ययेनासमर्थनात्प्रतिज्ञातार्थाकारणाद्वादिनो निग्रहाधिकरणत्वमिति कदाचित्कश्चिद् ब्रूयादित्येतत्परिजिहीर्षुरादिप्रस्थानमारचयति त्रिविधमेवे VN_{ms}:1b2 त्यादिना त्रिप्रकारमेव लिङ्ग मङ्गङ्करणं कस्यासिद्धेः प्रतिपत्तिरूपायाः । कस्य सिद्धेरित्याह 4/s । अप्रत्यक्षस्या परोक्षस्यानुमेयभूतस्य वस्तुन इति यावत् । अवधारणश्चतुरादि व्यवच्छेदमाचष्टे । त्रिविधमेवेति नियमः कथमयमिति चेत् । यस्माद्विधि प्रतिषेधरूपतया द्विधा साध्यं व्यवस्थितं । विधिरूपश्च सद्भा 3b/msK वरूपङ्कारणरू पम्वा भवद् भवेत् । नान्यत् । तत्र हेतोः प्रतिबन्धायोगात् । नह्यर्थान्तरस्याकार्यस्य सद्भावेऽपरस्य सद्भावो युक्तः । पटसद्भाव इवोष्ट्रस्य । नाप्यर्थां तरस्याकारणस्य निवृत्तावकार्यस्यान्यस्य च निवृत्तिर्युक्तिमती । उष्ट्रे निवृत्ताविव पटस्य । न चान्वयव्यतिरेकविकलस्यागमकत्वं युक्तं । पटस्याप्युष्ट्रगमकत्व प्रसङ्गात् । स्वभावभूतधर्मसद्भावे तु स्वभावभूतस्यान्यस्य सद्भावो युक्तो नहि स्वभावः स्वम्भावम्परित्यज्य वर्त्ते । तत्स्वभावत्वाभावप्रसङ्गात् । तन्निवृत्तौच निवृ त्तिः ॥ कार्यस्यापि भावे कारणस्य भावो युक्तः । तन्निवृत्तौ च निवृत्तिरन्यथा तेन विनापि भावात्कार्यमेव तत्तस्य न स्यात्तदन्यवत् । तस्मात्स्वभाव कारणभूतसाध्यभेदात् । द्विधेव विधिरूपं साध्यं तत्रैव हेतोः प्रतिबन्धात् । स्वभावभूतश्च साध्यं स्वभावहेतुः साधयति । कारणभूतश्च कार्यहेतु रित्यभ्युपेयं । प्रतिषेधमप्युपलब्धिलक्षणप्राप्तानुपलब्धिरेव साधयति । नान्या यथा तथा विस्तरेण प्रतिपादयिष्यति । तदिदमिह संक्षिप्तमर्थ तत्त्वं विषयव्यपेक्षया विषयिणो लिंगस्य व्यवस्था । विषयश्च विधिः प्रतिषेधो वा भवेत् । विधावप्यर्थान्तरम्वा विधीये तानर्थान्तरं वा अर्थान्तरविधावपि का र्यकारणमनुभयम्वा साध्यते । कार्यप्रतिपादनेपि कारणसामान्यम्वाऽमेघादिव्यावृत्तं वस्तुमात्रं लिङ्गत्वेनोच्यते । कारणविशेषो वा योऽप्रतिबद्धसामर्थ्ये मे घादिः । प्रतिषेधोपि निषेध्याभिमतस्यानुपलम्भेनोपलम्भेन वा प्रतिपाद्येत । अनुपलम्भेपि उपलम्भनिवृत्तिमात्रलक्षणो वा भवेत् । तत्तुल्ययोगावस्थ[◌ं] केवला परपदार्थोपलम्भरूपो वेति विकल्पाः । तत्रनावश्यं गम्भीरध्वानादियुक्त- 4a/msK मपि मेघादिकारणमात्रं वृष्ट्यादिकार्याविर्भावकमन्तरा प्रतिबन्धसम्भवेन व्यभिचारात् । अतो न कारणमात्रं गमकं । कारणविशेषादप्यप्रतिहतशक्तेर-

नन्तरं सम्बन्धस्मृतिव्यवहितादनुमेयविज्ञानात्प्राक् कार्यमेवोद्भूतमक्षज्ञानग्राह्यं
भवतीति न तस्यापि लिङ्गत्वं । कार्यन्तु कारणलिङ्गं युक्तं । तदविनाभावात् ।
तदतिक्रमे वा हेतुमत्ताम्विलंघयेत् । अनुभयमप्यसम्बन्धानुगमकमतिप्रसङ्गो
वा । अनर्थान्तरमप्यव्यभिचाराङ्गम्यत इति युक्तिमत् । निषेधोप्युपलम्भेन न
5/s युज्यते विरोधात् । कथं हि नामोपलभ्यते च नास्ति चेत्युपपद्यते । तज्ज्ञान
निवृत्तिमात्रमपि व्यभिचारि । एकज्ञानसंसर्गिणस्तु कैवल्यदृष्टेरसत्ताव्यवहारो
युक्तो यदि हि स्यादुपलभ्य सत्त्व एव भवेत् । प्रमाणश्च यदनुपपद्य मानविषयं
न तद्विषयि युक्तं । यथा वाजिविषाणं । अनुपपद्यमानविषयश्चोक्तप्रकारेण
स्वभावादि स्यादन्यसंयोग्यादिपरपरिकल्पितं लिं गमिति व्यापकानुपलम्भः ।
वैधर्म्येण नीलादिज्ञानं । तदेव वा कार्यादिलिङ्गं । नैमित्तिकशब्दार्थानुपप-
त्तिर्बाधिका । किमेवं सिद्धमगमकत्त्वमन्येषां । तथाहि विष यित्वङ्गमकत्त्वं
प्रकाशकत्त्वमित्यादयः पर्यायाः । तस्मात्साध्यस्य त्रिविधत्वात्तङ्गमको हेतुरपि
त्रिविध एवेति स्थितमेतत् । §9

कथन्त्रिविधमित्याह । स्वभाव VN_{ms}:1b2 इत्यादि [।] च शब्दः स्व-
भावकार्यापेक्षया समुच्चयार्थः । एतच्चाभिमतहेतुप्रदर्शनं स्वभावकार्यानुपल-
4b/msK म्भभेदात्त्रिविधमप्रत्यक्षस्य सिद्धेरङ्गं । नतु कारणैकार्थसमवायिविरो ध्यादि
भदादिति दर्शनार्थं । ननु चोपलब्धिलक्षणप्राप्तानुपलम्भश्चेति वक्तव्यं । तस्यैवा
प्रत्यक्षस्य सिद्धेर्वक्ष्यमाणेन न्यायेनाङ्गत्वान्नानुपलम्भमात्रस्य तत्कथं सामा-
न्येतो क्तमिति चेत् । एवमेतत्समर्थितसाधनाङ्गाधिकारात्तु सामान्यशब्दोप्य-
यमनुपलम्भशब्दोपलब्धिलक्षणप्राप्तानुपलम्भ एव वर्त्तते । तथाहि सामान्य-
शब्दा अपि शब्दा न्तरसन्निधानात्प्रकरणसामर्थ्याच्च विशेषेष्ववतिष्ठन्ते । यदाह
। नहि विशेषशब्दसन्निधेरेव शब्दानां विशेषावस्थितिहेतुरपि तु प्रकरणसाम-
र्थ्यादिकमपीति यथा चानुपलम्भमात्रस्य समर्थितसाधनाङ्गत्वं न सम्भवति
तथोत्तरत्र प्रतिपादयिष्यति । अप्रत्यक्षसिद्धिहेतुलिङ्गाधिकाराद्वाऽचोद्यमेवैतत्
। किम्पुनरस्य त्रिविधस्य साधनाङ्गस्य समर्थनं । यद्विपर्ययादसमर्थनमभ-
विष्यतीत्याह । तस्ये VN_{ms}:1b3 त्यादि । साध्यशब्दोत्रानित्यत्वादिधर्म-
मात्रस्य वाचकः । अवयवसमुदायोपचारात् न तु साध्यधर्मिधर्मसमुदाय-
स्य व्याप्तेरेवाभावप्रसङ्गात । शब्दादिधर्म्मिविशिष्टस्यानित्यत्वादेर्दृष्टान्तधर्मिण्य-
भावात् । व्याप्तिं प्रसाध्यान्वयव्यतिरेकसाधकेन प्रमाणेन अनेनान्वयव्य-
तिरेकनिश्चयावुक्तौ । धर्मिणि VN_{ms}:1b3 जिज्ञासितविशेषे शब्दादौ भाव-
साधनं VN_{ms}:1b2 । पक्षधर्मत्वसाधकेन प्रमा णेन सत्त्वकथनमित्यर्थः
। अनेनापि पक्षधर्मत्वनिश्चय उक्तः । कथम्पुनः सर्व्वोपसंहारेण व्याप्तिं प्र-
साध्य धर्मिणि भावः कथ्यत इत्यत्रोदाहरणमाह । यथेत्या VN_{ms}:1b3
दि । तत्सर्व्वमि त्यनेन सर्व्वोपसंहारेण व्याप्तिप्रदर्शनङ्कथयति । किमर्थं [।]
6/s विप्रतिपत्तिनिरासार्थं [।] तथाहि पक्षसपक्षा पेक्षयान्तर्व्याप्तिर्ब्बहिर्व्याप्तिश्च
5a/msK प्रदर्श्य त इत्येके विप्रतिपन्नाः । तच्च न युक्तं वस्तुबलायातत्वाद्व्याप्तेः
। पूर्व्वं साध्येन व्याप्तिं प्रसाध्य पश्चाद् धर्म्मिणि सत्त्वं कथयितव्यमित्य-

यमीदृशः क्रमनियमः किमत्रास्ति न वेत्या ह । अत्रापी VN$_{\text{ms}}$:1b3 त्यादि । अत्रेति मन्मते साधनाङ्गसमर्थने वा ऽपिशब्दोऽवधारणेप्रतिषेधे न च सम्बन्धनीयः । नैव कश्चिदयमीदृशः क्रमनियमः VN$_{\text{ms}}$:1b3 परिपाटिनियम इति या वत् । किंकारणमित्याह । इष्टार्थसिद्धेरुभयत्राविशेषा VN$_{\text{ms}}$:1b3 दिति । व्याप्तिसाधनाभिधानपूर्व्वकधर्म्मिभावसाधनाभिधाने धर्म्मिभावसाधनाभिधाने धर्म्मिभावसाधनाभिधानपूर्व्वके वा व्याप्तिसा धनाभिधाने साध्यार्थसिद्धेर्विशेषाभावादित्यर्थः । एवम कृतं क्रमनियमो हि किमर्थमाश्रीयते [।] साध्यसिध्यर्थं । यथा साधर्मवति दृष्टान्तप्रयोगे सा ध्येनैव हेतोरविनाभावः प्रदर्श्यते । न हेतुना साध्यस्य । तथा वैधर्म्यवति साध्याभाव एव हेतोरभावः कथ्यते । न तु हेत्वभावे साध्यस्य । किमर्थं । माभूद्धेतोः साध्येनाविनाभावित्वाप्रदर्शनेनेष्टार्थसिद्धेरसिद्धिर्विपर्ययसिद्धिश्चेति । यदाह । एवं हि हेतोः सपक्ष एव सत्त्वं । साध्याभावे चासत्त्वमेव शक्यं द र्शयितुं । न विपर्ययादिति । यथा नित्यताऽकृतकत्वेन नाशित्वाद्वाऽत्र कार्यता । स्यादनुक्ता कृता व्यापित्वनिष्ठश्च समन्वय इति । तदत्र युक्तं क्रमसमाश्रयणं इह तु विनाप्यनेनाभिमतार्थसिद्धिः सम्पद्यत इति सूवतन्न कश्चित्क्रमनियम इति । इष्टार्थसिद्धेरुभ[य]त्राविशेषादित्येतदेवात्र कुत इति चेदाह । यस्माद् धर्म्मिणी त्यादि । साध्येन व्याप्तिं प्रसाध्येत्युक्तं प्राक् । किम्पुनस्तद्व्याप्तिसाधनमित्याह । अत्रेत्यादि VN$_{\text{ms}}$:1b3 । अत्रेति स्वभावहेतौ । कार्यानुपलम्भयोस्तु पश्चाद्व्याप्तिसाधनमभिधा स्यात् । विप- 5b/msK
र्यये साध्यस्य हेतोर्व र्त्तमानस्य सत इति शेषः । बाधकं प्रमाणं येन साध्यविपर्यये वर्त्तमानो हेतुर्बाध्यते तस्य कथनं यत्तद्व्याप्तिसाधनमित्यर्थः ।

§ 10

किं पुनस्तद्बाधकप्रमाणोपदर्शनमित्याह [—] यदि न सर्व्वं वस्तु सत्कृतकं चेति VN$_{\text{ms}}$:1b5 पूर्व्वोक्तिहेतुद्वयं परामृषति । प्रतिक्षणविनाशि 7/s
VN$_{\text{ms}}$:1b5 स्यात्तदाऽसदेव स्यादिति सम्बन्धः । कुतः अक्षणिकस्य पदार्थस्य क्रमयौगपद्याभ्यामर्थक्रिया VN$_{\text{ms}}$:1b5 ऽयोगात् । तथाह [—] क्षणिकत्वेनाभिमतस्य भावस्य क्रमेण तावदर्थक्रिया न युज्यते । कार्यनिर्वर्त्तनयोग्यस्य स्वभावस्य सदा सत्त्वात् । अन्यथा पश्चादपि न कुर्यात् । पूर्व्वस्वभावाप्रच्युतः पुरावत् । सहकारिणमासाद्य करोतीति चेत् । न अनाधेयात्माति शयस्य पूर्व्वस्वभावापरित्यागिनः सहकारिष्वपेक्षायोगात् । आदधत्त्येव सहकारिणस्तस्यात्मातिशयमिति चेत् । न सहकारिभिराहितस्यातिश यस्य तत्त्वान्यत्वायोगात् । तथाहि न तावदयमात्मातिशयस्तस्यात्मभूतः । तस्यैव तदव्यतिरेकादात्मातिशयवत्सहकारिबलादुत्पत्तिप्रसङ्गात् [।] एवञ्चाभ्युपेतमस्याक्षणिकत्वमवहीयते व्यतिरिक्त एव स तस्मादिति चेत् । भवतु किन्तु तस्मादेवात्मातिशयात्कार्योत्पत्तेस्तदवस्थमस्यार्थक्रियास्वसामर्थमि ति दुर्न्निवारः

८ र्म] ? र्म्य
३५ र्थ] ? र्थ्य

प्रसङ्गः समापतति । सम्बन्धोप्यनेन कथमिति वश्चिन्ता विषयमवतरत्येव ।
अतिशयबलात्करोतीत्यत्रापि सहकार्यपेक्षापक्षोदितो दोषः ॥ समर्थस्वभाव-
त्वादनाधेयातिशयत्वेपि कुविन्दादिवत् किञ्चिदपेक्ष्य कार्यजनक इति चेत् । न
6a/msK तत् सारं । नहि सहकारिणः प्रत्ययास्तस्य तावदतिशयमाधातुं क्षमाः । न
चाप्यनुपकारके भावेऽपेक्षा युक्तिमनुपतत्यतिप्रसाङ्गात् । एवञ्च सर्व्वकालम-
स्याकार्यजनकत्वप्रसङ्गः । कुविन्दादीनामपि तत्स्वभावस्य करणादका रकस्य
वा [।] तत्स्वभावत्वादित्यादि हेतुविन्दा* वुक्तमिति नेहोच्यते । एवन्तावत्क्र-
मेणास्यार्थक्रिया न युज्यते नापि युगपत् । तथाहि अर्थक्रियानिवर्त्तनयोग्यस्व
भावाध्यासितमूर्तिः सहैवासावतश्च पश्चादपि तद्रूपवियोगात्कार्यमुत्पादयेदन्य-
थोदयानन्तरमेवास्य क्षयः स्यात् । न चाप्यक्षणिकत्वेनोपगतस्य सकृ त्
कार्यमुत्पद्यमानमुपलभ्यते क्रमसम्भवदर्शनात् । तदेवमयमक्षणिकः पदार्थः
क्रमेण युगपद्वा न काञ्चिदप्यदर्थक्रियामात्रामंशतोपि क्ष मो निर्वर्तयितुमित्त्य-
सत्त्वमेवास्य । यदि नामार्थक्रिया सा न युक्ता तत्किमित्यसत्त्वमेवास्य स्या-
दित्याह । अर्थक्रियेत्यादि VN_{ms}:1b5 । अर्थक्रियायाः साम र्थ्यन्तदेव
लक्षणं यस्य सत्त्वस्येति विग्रहः । अतोऽर्थक्रियासामर्थ्यलक्षणात्सत्त्वाद्व्यावृत्त-
8/s म्व्यवच्छिन्नं । इति श्रुतेर्हेतौ । तस्मादर्थे वा [।] कथम्पुनरि दमवसीयते
[।] अर्थक्रियासामर्थसत्त्वलक्षणमित्यत आह । सर्व्वे VN_{ms}:1b5 त्यादि ।
सर्व्वेषां सामर्थ्यानामुपाख्या श्रुतिः । उपाख्यायते अनयेति कृत्वा तस्याविर-
होऽभावः । स एव लक्षणं यस्य निरुपाख्यस्य स तथा ख्यायते । अत्रापीति
श्रुतिहेतौ । सर्व्वग्रहणं घटादीनामपि क्षणिकत्वेनाभिमतानाम्विषयभेदेनार्थ-
क्रियासामर्थ्य निर्वृत्तेरस्तीति तेषामसत्त्वव्यवच्छेदाय । नैवार्थक्रियासामर्थ्यं
6b/msK सत्त्वलक्षणमपि तु सत्तायोग इति चेत् । न । सत्ताया अभा वात्
। तदभावश्चान्यत्र प्रतिपादित इति नेहोच्यते । सत्तायाश्च नैव सत्त्वं प्रा-
प्नोति सत्तायोगाभावात् । निःसामान्या नि सामान्यानीति समयात् । न च
स्वयमतद्रूपाः पदार्थात्मानः स्वभावान्तरसम्पर्क्कमासादयन्तोपि ताद्रूप्यम्प्रतिप-
द्यन्ते । स्फटिकाभ्रपटलादय इव जवाकुसुमादिरूपमिति यत्किञ्चिदेतत् ।
तत्वेतावदेवाभिधानीयं । सर्व्वसामर्थ्यविरहलक्षणं निरुपाख्यमि VN_{ms}:1b6
ति तत्किमनेनोपाख्याग्रहणेनेति चेत् । सूक्त मेतत्सर्व्वसामर्थ्यरहितस्य तु
सामर्थ्यनिबन्धनस्य कस्यचिदपि शब्दस्यावृत्तेरसद्व्यवहारविषयत्वख्यापनाय ।
संज्ञायाश्चानुगतार्थत्वसिद्ध्यर्थ मिदमुक्तमिति गम्यते । यदि त्वेवं साध्यविपर्यये
हेतोर्बाधकप्रमाणोपदर्शनं न क्रियते ततः किं स्यादितिचेदाह । एवं साधनस्य
साध्यविप र्यये बाधकप्रमाणानुपदर्शने VN_{ms}:1b6 सत्यनिवृत्तिरेवाशंकाया
इति सम्बन्धः । का पुनः सा शंका । स कृतको वा स्यान्नित्यश्चैवं प्रकारा
। § 11

५ सा] ? स
७ *] न्यायविन्दावपि - तत्स्वभावत्वात्तत्स्वभावस्य च हेतुत्वात् तृ० परि० पृ० ६९ *Kashi Sanskrit Series.*
१७ र्थं] ? र्थ्यं

ननु विप क्षहेतोर्वृत्तिर्नोपलभ्यते तत्कथमनिवृत्तिरित्याह । अदर्शने VN$_{ms}$:1b6 पि वृत्तेरस्य साधनस्याक्षविपर्यये साध्यस्य हयुपस्कारः । किमित्येवमप्यनिवृत्तिरित्याह । वि रोधाभावादि VN$_{ms}$:1b6 ति । साधनसाध्यविपक्षयोरिति शेषः । अयमस्याभिप्रायो यदि साधनस्य साध्यविपर्ययस्य च परस्परम्विरोधः सिद्धः स्यात् । भवेददर्शनमात्रे ते अन्यथा बाधकासिद्धौ 7a/msK संशयो दुर्न्निवारः स्यादित्याशङ्क्याह । न च नैव सर्व्वानुपलब्धिर्बाधिका प्रतिषेधिका युक्तेत्युपस्कारः । कस्य भावस्य सत्त्वस्य साध्यविपर्यये हेतोरिति शेषः । प्रकरणाद्धैतद् गम्यत एव । इदमुक्तम्भवति । व्यापकानुपलब्धिरेव सहभाव बाधते हेतोः साध्याभावेन । यथा प्रतिपादितम्प्राक् । नाप्य- 9/s दर्श नमात्राद्यावृत्तिर्विप्रकृष्टसर्व्वदर्शिनोऽदर्शनस्याभावासाधनादि VN$_{ms}$:1b7 त्यादिना । तस्मात्सूक्तमन्यथा बाधकासिद्धौ संशयो दुर्न्निवारः स्यादिति । अनेन पूर्व्वोक्त मेव स्मारयति । एवञ्चे तदर्थवत् । अभावसाधनस्यादर्शनस्याप्रतिषेधादित्युक्तं । तत्र भवेत्कस्यचिदाशंका किमनेनाभावसाधनस्येति विशे षणेन यावता सर्व्वमेवादर्शनमभावसाधनमित्यतस्तदाशङ्काविनिवृत्त्यर्थमिदमाह । न चेत्यादि VN$_{ms}$:1b11 । अत्र च शब्दो हि शब्दार्थे प्रतिपत्तव्यः । तस्मिं नैव वाऽवधारणे व्याख्यानन्तु पूर्व्ववत् । § 12

ननु च बाधकस्यैव प्रमाणस्य क्रमाक्रमायोगस्यासामर्थ्येन व्याप्तिर्न सिद्धा तत्कथं तत्त्वयं असिद्धव्याप्तिकं स दपरस्य सत्त्वादेर्हेतोर्व्याप्तिसाधने पर्याप्तं । प्रमाणान्तरेण तत्र व्याप्तिः साध्यत इति चेत् । सैव तर्हीयमनवस्थादोषादिवानुबध्नातीति कदाचित्परो ब्रूयादित्या शङ्क्य सर्व्वमिदमाह । तत्रेत्यादि VN$_{ms}$:1b11 । तत्र शब्दो वाक्योपन्यासार्थः । सामर्थ्यं यद्वस्तुलक्षणं तत्क्रमाक्रमयोगेन व्याप्तं सिद्धं । यत्र सामर्थ्यं तत्र क्रमाक्रमाभ्यामर्थक्रियया भवितव्यमित्यनेनाकारेण तदेव कुत इति चेदाह । प्रकारान्तरासम्भवात् VN$_{ms}$:1b11 । यस्मादन्यत् क्रमाक्रमव्यतिरिक्तं प्रकारान्तरं नास्ति । तस्माद्यत्रेदं सत्त्वलक्षणमर्थक्रिया सामर्थ्यं तत्रावश्यं च क्रमाक्रमाभ्याम- 7b/msK र्थक्रियया भवितव्यं [।] ननु च क्रमाक्रमाभ्यामन्यो रासि र्नास्तीत्येतदेव 10/s कथं सिद्धं । क्रमाक्रमयोरन्योन्यपरिहारस्थितलक्षणत्वेन तृती यप्रकारव्यतिरेकत्वात् । भावाभाववदिति ब्रूमः । भवत्वेवं स तु क्रमयौगपद्यरूप एवेति कुत इति चेत् । कस्तर्ह्यन्यो भवतु । कश्चिद् भवेदिति चेत् । किमर्थन्तर्हि मह त्यनर्थसङ्कटे पतितोसि यदिदन्तया तद्रूपाभिधानेप्यसमर्थोसि । यदि नाम सामर्थ्यं क्रमाक्रमयोगेन व्याप्तं सिद्धं तथापिकिं सिद्धमिति चेदाह । तेन सामर्थ्य स्य क्रमाक्रमयोगेन व्याप्तत्वेन व्यापकस्य धर्मस्य क्रमाक्रमयोगस्यानुपलब्धिः VN$_{ms}$:2a1 । अक्षणिके पदार्थेऽभ्युपगते सामर्थ्यं बाधते निराकरोतीत्यर्थः ॥ तथा ह्ययं क्रमाक्रमयोगस्तस्य सामर्थ्यस्य व्यापकः । ततश्चास्य निवृत्तावश्यमेव सामर्थ्यस्यापि निवृत्तिरन्यथाऽयमस्य व्यापक एव न प्राप्नोति । यस्मा त्तद्बाधते इति तस्मा त्क्रमयौगपद्यायोगस्य व्याप-

२६ रासि] ? शि

काभावस्य कर्मभूतस्य सामर्थ्याभावेन व्याप्याभावेन कर्त्तृभूतेन व्याप्तिसिद्धेः कारणान्नानवस्थाप्र सङ्गः । § 13

एवं स्वभावहेतोः साधनाङ्गसमर्थनमभिधायाधुना निगमयति । एवमि VN$_{ms}$:2a1 त्यादिना । एवञ्च यदि न समर्थनं क्रियते तदेव तद्वादिनः पराजयमावहती ति प्राक्प्रतिज्ञातमेवायोजयति । तस्यासमर्थन VN$_{ms}$:2a2 मित्यादिना । कस्मादेवं प्रारब्धार्थासाधनादिति । न ह्यस-
8a/msK मर्थितं साधनमारब्धमर्थं साधयितुं समर्थं । विवादाभा वप्रसङ्गात् । तथाहि सार्व्वज्ञज्ञानसाधने संस्कारोत्कर्षभेदेन सम्भवे प्रकर्षपर्यन्तवृत्तयः प्रज्ञादयो गुणाः स्थिराश्रयवर्त्ति सकृद्यथाकथंचिदाहितविशेषं विना हेतुरात्मनीति । यदि तर्हि बाधकप्रमाणोपदर्शनेन हेतोर्व्याप्तिः प्रसाध्यते । तथा सत्त्यनवस्था भवतः प्राप्नोतीत्याशंकापनोदनाय पूर्व्वपक्षमारच[य]न्नाह । अत्रापी VN$_{ms}$:1b9 त्यादि । अत्रेति बाधके प्रमाणे । अदर्शनमप्रमाणयतस्त्व नादर्शनमात्राद्धेतोर्व्यतिरेकनिश्चय इत्यनेनाकारेण न केवलं मौले हेतावित्यपि शब्दः किं पूर्व्व स्यापि मौलस्य हेतोरव्याप्तिः प्राप्नोतीति क्रियापदं । किङ्कारणं । क्रमयौगपद्यायोगस्य वा सामर्थ्येन व्याप्त्यसिद्धेः । तथाहि यद्यदर्शनमात्रेण न व्यतिरेकनिश्चय स्तथा सति क्रमयौगपद्यायोगश्च भविष्यति सल्लक्षणं सामर्थ्यञ्च भविष्यति । कोऽनयोर्विरोध इत्यत्रैव बाधके प्रमाणे व्याप्तिर्न सिद्धा । यदि नामात्र न सिद्धा मौलहेतावेतद्बलेन व्याप्तिः सेत्स्यतीति चेदाह । पूर्व्वस्यापि मौलस्यापि हेतोरव्याप्तिः प्राप्नोतीत्यध्याहारः
11/s । तथाहि न स्वयमप्रमाणकं बा धकं प्रमाणमन्यस्य प्रमाणमुपकल्पयि तुमलं प्रामाण्यप्रसङ्गात् । § 14

यद्येवमत्रापि तर्हि व्यापके प्रमाणेऽन्येन व्यापकेन प्रमाणेन व्याप्तिर्निश्चीयत इत्याह । इहापि VN$_{ms}$:1b9 न केवलं मौलहेतावित्यपिनाह । पुनः साधनोपक्रमे सत्यनवस्था भवेत् । तथाहि यत्तद्बाधके प्रमाणे व्याप्तिप्रसाधनार्थं बाधकं प्रमा णमुच्यते । तत्रापि व्याप्तिरन्येन बाधकेन प्रमाणेन साध्या । यस्मान्न तदपि स्वयमप्रमाणमितरस्य प्रामाण्यं कर्त्तु समर्थमित्येतत्तत्रापि शक्यम्वक्तुं । तस्याप्यन्येन व्याप्तिः साध्यत इति चेत् । यद्येवं तत्रापीयमेव वार्त्तेत्यनवस्था भवतस्तथा सति प्रसजति । एवं समारचितपूर्व्वपक्षः
8b/msK साम्प्रतमत्र प्रतिविधानमाह । नाभावसा धनस्ये VN$_{ms}$:1b10 त्यादि । व्यतिरेकसाधनत्वेनेत्युपस्कार[ः ।] इदमुक्तम्भवति । न सर्व्वमत्रादर्शनं प्रतिक्षिप्यते । व्यतिरेकनिश्चायकस्य व्यापकानुपलब्धिसंज्ञकस्यानिषेधात् । किन्त्व दर्शनमात्रमिति । यदाह । यददर्शनम्विपर्ययमभावं साधयती VN$_{ms}$:1b10 ति । कस्य हेतोः कुत्र साध्यविपर्यये तददर्शनमस्य हेतोर्बाधकम्प्रमाणमुच्यते । कस्माद्विरुद्धप्रत्यु पस्थापनात् अस्येति वर्त्तते । तथाहि यस्य क्रमयौगपद्याभ्यामर्थक्रियायोगस्तस्य सामर्थ्यलक्षणं सत्त्वं नास्ति । यथा बन्ध्यातनयादीनान्तथा वा क्षणिकानामपि क्रमयौ गपद्याभ्यामर्थक्रियाऽयोग इति । क्रमाक्रमाभ्यामर्थक्रियाऽयोगादित्ययं व्यापकानुपलम्भः सत्त्वादित्यस्य

हेतोर्विरुद्धमसत्त्वं साध्यविपर्यये प्रत्यु पस्थापयद्बाधकं प्रमाणमुच्यते । एवञ्च कृतकत्वादावपि यथायोग्यम्वाच्यं । § 15

कस्माद्विरुद्धप्रत्युपस्थापनादस्य तद्बाधकम्प्रमाणमुच्यत इत्याह । एवं हि स हेतुः सत्त्वादिलक्षणः साध्याभावे तस्मिन्नसन्निति सिध्येत् यदि तत्र साध्याभावे बाध्यते निराक्रियता केन स्वविरुद्धेन स्वरूपविरुद्धेनासत्त्वादि नेति यावत् । किम्भूतेन प्रमाणवता प्रमाणयुक्तेन । कस्मादेवमसौ तत्रास्तिध्यतीत्याह । अन्यथा तत्र VN$_{ms}$:1b11 साध्यविपर्ययेऽस्य हेतोर्बाधकस्यासिद्धौ सत्त्यां संशयः । सं श्च स्यान्नित्यश्चेत्यादि दुर्निवारः स्यादिति शेषः । दुःखेन निवार्यत इति दुर्निवारो दुर्न्निषेध इत्यर्थः । बाधकग्रहणेनात्र विरुद्धस्य प्रत्युपस्थापकम्प्रमाणं गृह्यते । वाधकप्रमाणप्रत्युपस्थापितम्वा हेतुविरुद्धं । ननु चानुपलब्धिमात्रादेव साध्यविपर्यये हेतोर्व्यावृत्तिनिश्चयादसन्दिग्धो व्यतिरेको भविष्यति । तत्किमुच्य से शङ्काया व्यावृत्तिः । बाधकप्रमाणानुपदर्शने 9a/msK तु स एव न सिध्यति तत्कथमियं निवर्त्तेतेति । यदि नामेयमाशङ्का न व्यावर्त्तते । ततः किमित्याह । ततः आशंकाया अनिवृत्ते रनेकान्तिकः 12/s स्याद्धेत्वाभासः VN$_{ms}$:1b7 । कस्माद्व्यतिरेकस्यस्या ध्याभावे हेतोरभावलक्षणस्य सन्देहात्कारणात्सन्दिग्धविपक्षव्यावृत्तिकः स्याद्धेत्वाभास इत्यर्थः । § 16

किम्पुन रदर्शनेप्यनिवृत्तिराशंकाया यावता तददर्शनमभावं साधयतीत्याह । नाप्यदर्शनमात्राद्व्यावृत्तिः VN$_{ms}$:1b7 साध्याभावे हेतोः सिध्यतीति वाक्याध्याहारः । अपिशब्दो य स्मादर्थे । मात्रग्रहणमुपलब्धिलक्षणप्राप्तादर्शनस्य व्यवच्छेदार्थं । कुत एतत् । विप्रकृष्टेषु देशकालस्वभावविप्रकर्षैः पदार्थेषु चीनदा शरथिपिशाच प्रभृतिषु यददर्शनं तस्याभावासाधनात् । कस्याभावं साधयतीति चेत् । प्रकृतत्वाद्विप्रकृष्टानामिति गम्यते । § 17

ननु समासादि तसकलपदार्थव्यापि जानाति स यस्यादर्शनमभावम्विप्रकृष्टानामपि साधयति तत्कथमिदमुक्तमित्याह । असर्व्वदर्शिन VN$_{ms}$:1b7 इति । सर्व्वन्द्रष्टुं शी लमस्य ततो नञा समासः । कस्मात्तस्याप्यदर्शनमभावन्न साधयतीति । अर्व्वाग्दर्शनेन पुंसा सतामपि केषाञ्चिदर्थानाम्विप्रकृष्टानामदर्शनात् । इदमागूरितं । नेह सर्व्वदर्शिदर्शनं समस्तवस्तुसत्तां प्राप्नोति । येन तन्निवर्त्तमानमर्थसत्ताम्वृक्षवच्छिंसपां निवर्त्तयेद् भेदात् । नापि तत्तस्याः कारणं येन वह्निवद्धूमं निवर्त्तमानं नि वर्त्तयेत् । तदभावेपि भावादिति । बाधकं पुनः प्रमाणमित्यादि । अत्र केचिदेवं पूर्व्वपक्षयन्ति । किम्पुनर्बाधकं प्रमाणं यस्योपदर्शनेन मौलस्य हेतोर्व्याप्तिप्र तीतिर्भवतीत्याह । बाधक 9b/msK म्पुन VN$_{ms}$:1b7 रित्यादि । तेषाङ्कथमत्र व्याप्तिसाधनम्विपर्यये बाधकप्रमाणोपदर्शनं यदि न सर्व्वं सत्कृतकं वा प्रतिक्षणम्विनाशि स्यादित्यादिनाऽत्रैव प्रागर्थस्याभिहितत्वात्पुनरुक्तदोषप्रसक्तिर्न भवतीति चिन्त्यमेतत् तैरेवेत्यलं परदोषसंकीर्त्तनेन । तस्मादन्यथा पूर्व्वपक्ष्यते । यस्यापि तर्हि बाधकम्प्रमाणम-

१५ स्या] ? सा

स्ति त स्य कथमयमदोष इत्यत आह । बाधकं पुनः प्रमाणं VN$_{ms}$:1b7 प्रवर्त्तमानमसामर्थ्यमाकर्षतीति क्रियापदं । कीदृशमसल्लक्षणं । कथं प्रमाणं यस्य पदार्थस्य क्रमयौग पद्यायोगः । अर्थक्रियाया इत्यध्याहार्यं । न तस्य क्वचित्कार्ये सामर्थ्यं यथा नभस्तलारविन्दस्येत्यध्याहार्यो दृष्टान्तः । अस्ति चाक्षणिके भावे स क्र मयौगपद्याभ्यामर्थक्रियाया अयोग इत्येवम्प्रवर्त्तमानं । ततः किञ्जातमिति चेदाह । तेन VN$_{ms}$:1b8 कारणेन येन तत्प्रवर्त्तमानमसल्लक्षणमसाम र्थ्यमाकर्षयति । यत्सत्कृतकम्वा तदनित्यमेवेति सिध्यति । § 18

एवमपि किं सिद्धम्भवतीत्याह । तावता च वाधकप्रमाणोपदर्शनमात्रेण 13/s साधन- धर्ममात्रान्वयः VN$_{ms}$:1b8 सिध्यतीति वर्त्तते । केनेत्याह । साध्यधर्मस्य कर्त्तरि चेयं षष्ठी प्रतिपत्तव्या । तेन साध्यधर्मेण साधनधर्ममात्रस्यानपेक्षितहेत्वन्तरव्यापा रस्यान्वयः सिध्यतीति वाक्यार्थः सन्तिष्ठते [।] नन्वेवङ्करणीयं साधनधर्ममात्रेणान्वयः साध्यधर्मेति । एवं हि साध्यमेव हेतुना ऽविनाभूतं जातं न हेतुरिति हेतो रगमकत्वम्भवेत् । ततश्च को गुणो लभ्यत इत्याह । स्वभावहेतुलक्षणञ्च सिद्धम्भवति VN$_{ms}$:1b9 10a/msK तावता चेति वर्त्तते । स्वभावहेतुलक्षणञ्च तद्भावमात्राद्धर्मिनिस्वभावो पि प्रत्ययाभावेऽपुनर्यत्नापेक्षितत्वात् । कलधौतमलविशुद्धिवदित्येवमादयो हेतवः प्रतिलब्धसामर्थ्यातिशयाः सन्त्येव ते च यद्यसमर्थिता एव ज्ञाप्यसमर्थं ज्ञाप येयुस्तदा जैमिनिप्रभृतीनां विवादाभाव एव भवेत् । नन्वेतदेव न सम्भाव्यते । यत्परमार्थतः समर्थस्यापि हेतोरभिधाने निग्रहार्होऽसावित्याशङ्कायां स्वाभिप्रा यं प्रकटयति । वस्तुतः समर्थस्य हेतोरुपादानेपि सामर्थ्यप्रतिपादनादिति । अयमस्य भावो यदि नामानेन परमार्थतः समर्थो हेतुरुपात्तस्तथापि तस्य सा मर्थ्यं साधनाङ्गासमर्थनान्न प्रतिपादितमनेनेति असमर्थकल्प एवासौ । न ह्यर्थस्य परार्थानुमाने गुणदोषावधिक्रियेते । किन्तर्हि वचनस्य वक्तुरय थार्थाभिधानेनोपालम्भात् । अत एव यत्राप्यर्थस्य गुणदोषावधिक्रियेते तत्रापि वचनद्वारेणैव । एवमेतदभ्युपगन्तव्यमन्यथा क्षणिकः शब्द इ त्येतावन्मात्रमेव प्रतिज्ञावचनमभिधाय स्थातव्यं । तथाभिधानादेवाभिमतार्थसिद्धेरिति ॥ ० ॥
§ 19

एवं स्वभावहेतावुपदर्श्य साधनाङ्गसमर्थनमिदा नीङ्कार्यहेतावाह [।] कार्यहेतावपी VN$_{ms}$:2a2 त्यादिना । किम्पुनस्तदित्याह [।] यत्कार्यं लिङ्गं धूमादिसंज्ञकं कारणस्य दहनादेः साधनायोपादीयते VN$_{ms}$:2a3 । तस्य धूमादेस्तेन दहनादिना सह कार्यकारणभावप्रसाधनलिङ्गिलिङ्गयोर्हेतुफलभावसाधनमेव यत्तदेव कार्यहेतौ साधनाङ्गसमर्थनमित्यर्थः । केन पुनस्तयोः कार्यकारणभावः प्रसा ध्यत इत्याह । भावाभावसाधनप्रमाणाभ्या VN$_{ms}$:2a3 मिति । भावाभावौ कार्यकारणयोः सदसत्त्वे तयोः साधने ते च 10b/msK ते प्रमाणे चेति व्यु त्पत्तिक्रमः [।] साधन- शब्दश्च करणसाधनः भावाभावसाधनप्रमाणे च प्रत्यक्षानुपलम्भो यथाक्रमं [।] कथम्पुनः प्रत्यक्षानुपल-

म्भाभ्यां कार्यकारणभावः प्रसाध्यत इत्याह [।] यथे VN_{ms}:2a3 त्यादि 14/s । इदन्धूमादिसंज्ञकं कार्यमस्मिन्दहने सति भवति । उपलब्धिलक्षणप्राप्तं सदनुपलब्धं प्रागिति वाक्यशेषः कार्यः । अन्यथा दहनस्य तत्र धूमे व्यापार एव न कथितः स्यात् दहनसन्निधानात्प्रागप्येतदासीदित्याशङ्कासम्भवात् । यथोक्तानुपलम्भग्रहणे तु नैवेयमवतरति । अत एव च प्रमाणविनिश्चिया दावप्येवमेवा भिहितमिति । अनेन च प्रत्यक्षप्रमाणव्यापार उक्तः । तथाहि अस्मिन्सतीदं भवतीति प्रत्यक्षेणैतद् गम्यते । सम्प्रत्यनुपलम्भस्य व्यापारं निर्दिदिक्षु राह । सत्स्वपी VN_{ms}:2a3 त्यादि । तस्माद्दहनादन्येषु विद्यमानेष्वपि । तथा तस्य धूमस्य हेतुष्विन्धनानिलादिषु समर्थेषु सत्स्वपीति वर्त्तते । चकारश्चात्र लुप्त निर्दिष्टः प्रतिपत्तव्यः समर्थेषु चेति । तस्य दहनस्याभावे न भवति । इदमित्यधिकृतं । इति एवमित्यस्यार्थे वर्त्तते व्यवच्छेदे वा । तदनेन गवाश्वादी नां तद्देशकालस[न्]निहितानामपि धूमजननं प्रति कारणत्वन्निसिद्धं । यतो यदि ते गवाश्वादयस्तस्य कारणम्भवेयुस्तदा व्यतीतेप्यग्नौ तेषां सन्निहितत्वाद् धूमो त्पत्तिप्रसङ्गः । इन्धनादिकारणान्तरापेक्षास्ते तस्य जनका भवन्ति ततोयमप्रसङ्ग इति चेत् । यद्येवं तेपि तत्र सन्निहिता एवेति न व्यावर्त्तते प्रसङ्ग इति द हनमपि सहकारिणमपेक्ष्य तं जनयन्ति ततो न युक्तमिदमिति चेत् । नन्वेवं सत्यायातन्दहनस्य धूमोर्त्पत्तिं प्रति कारणत्वं । तत्किमिदमुच्यते पूर्व्वापरव्याहतङ्ग वाश्वादय एव तस्य कारणन्न दहन इति । 11a/msK अस्तु तर्हि तस्यापि दहनस्य कारणत्वङ्गवाश्वादीनामपीति चेत् । न युक्तमेतत् । तत्र व्यतिरेकगतेर्दुर्घटत्वात् । तथा ह्यप गतेष्वपि गवादिषु सति च दहने तत्रेन्धनादिकलापे भवत्येव हुतभुग्धेतोरुत्पत्तिः । यतः कारणप्रबन्धङ्कार्यप्रबन्धश्चाश्रित्य हेतुफलभावश्चिन्त्यते भावानाङ्का रणप्रबन्धपूर्व्वः कार्यप्रबन्ध इति । तत्तु क्षणभेदं । नहि समासादितज्ञानातिशयानामयं पूर्व्वः क्षणोऽयमुत्तर इति विशेषावलम्बि ज्ञानमुदेति [।] अर्व्वाग्दर्शि भिश्चाधिकृत्य प्रमाणलक्षणं प्रणयितं कृपावद्भिः । यथोक्तं सांव्यवहारिकस्यैतत् प्रमाणस्य रूपमुक्तमत्रापि परे विमूढा विसम्वादयन्ति लो कमिति । वासगृहादिषु तर्हि दहनाभावेपि धूमसद्भावाद्व्यभिचार इति चेत् । भूतस्यापि दहनप्रबन्धपूर्व्वकत्वमस्त्येव । साक्षात्पारम्प र्यकृतस्तु विशेषः । अवयन्ति च विच्छिन्नाविच्छिन्नदर्शनप्रबन्धयोर्द्धूमप्रबन्धयोर्वासगृहादिरसवतीप्रदेशादिभाविनोः स्फुटमेव भेदम्विचित्र भावस्वभावविवेकाभ्यासबलोपजातविदग्ध बुद्धय इति भेदेनाप्यनुमानम- 15/s विरुद्धमत एव देशकालाद्यपेक्षमनुमानं कार्यहेतौ विरुद्धकार्योपलम्भे चोक्तं ।

...2 इष्टम्विरुद्धकार्येपि देशकालाद्यपेक्षणं ।
अन्यथा व्यभिचारि स्याद् गत्येवासीत साधनं [॥ २][§ 22]

५ विनिश्चि] ? श्च
१३ न्निसि] ? षि
३४ त्येवासीत] ?

इति । § 23

अथापि कश्चिद्विविधभावभेदप्रविचयचातुर्यातिशयशलाकोन्मीलितप्रज्ञाचक्षुष्ट्वादयं ज्वलनजनितो धूमोऽयं धूमजनित इति विवेचयति । तथापि न सुतरां व्यभिचारः । तथाहि नाग्निजन्यो धूमो धूमाद् भवति निर्हेतुकत्व-
11b/msK प्रसङ्गात् । तथा च यदुक्तं [।]

...3 अतश्चानग्नितो धूमो यदि धूमस्य सम्भवः ।
शक्रमूर्ध्नस्तथास्तस्य केन वार्येत सम्भवः [॥ ३]§ 26

इत्यादि § 27

तदसारमित्यप्युपेक्षते [।] तस्मान्न तेषां गवाश्वादीनां तत्र कारणत्वमस्तीति निश्चयः समाधीयतां । अतश्च दहन एव तस्य कारणं नाश्वादय इति स्थितमेतत् । तथा च दहनस्य कारणत्वं योजितमन्वयव्यतिरेकाभ्यां यथो क्तप्रकाराभ्यामेवमिंधनादिसामग्र्याः सर्वस्याः कारणं योजयितव्यं । यदि वैकवाक्यतयैव व्याख्यायते । सत्स्वपि तस्माद्दहनादन्येषु समर्थेषु तद्धेतुष्विंधनादिष्वस्याभावे न भवतीति । गवाश्वादीनां त्वहेतुत्वम्व्यतिरेकाभावतया यथोक्तेन विधिना बोद्धव्यं । § 28

ननु चैतदेव युक्तम्वक्तुं तदभावेन भवती त्यथ किमर्थं सत्स्वपि तदन्येषु समर्थेषु तद्धेतुष्वित्युच्यत इति चेदाह । एवं ही VN_{ms}:2a4 त्यादि । यस्मादेवं सत्स्वपीत्यादिनाऽभिधीयमानोऽस्य धूमस्य तत्कार्य त्वमग्निकार्यत्वं समर्थितं निश्चितमसन्दिग्धम्भवति । अन्यथा यद्येवं नोपदर्श्यते । केवलं तदभावेन भवतीत्युपदर्श्यते तदा तदभावेन भवतीत्युप दर्शने क्रियमाणेन्यस्यापि तु गवाश्वादेरिन्धनादेश्च तत्राग्निशून्यभूभागेऽभावे सति सन्दिग्धमस्याग्नेः सामर्थ्यम्भवतीति कुतः कारणभावनिश्चय इति समुदाया र्थः । तत एवाह [।] सत्सु हि समर्थेषु तद्धेतुषु VN_{ms}:2a3 कार्यानुत्पत्तिः कारणान्तरविकल्पं सूचयती ति सन्दिग्धमस्यान्यथा सामर्थ्यमित्येतदेवान्य त्तत्रेत्या VN_{ms}:2a4 दिना सूचयति । तत्र धू माश्वकार्येऽन्यदेवाश्वादि । यदिन्धनादिसमर्थन्तदभावात्तन्न भूतन्दहनशून्यदेशे । अस्य स्वभावात्तन्न जातमिति कुतोयं निश्चय इत्यर्थः । § 29

16/s

12a/msK यद्यन्यत्तत्र समर्थन्तद भावात्तन्न जातमेतन्निवृत्तौ निवृत्तिस्तर्ह्यस्य कथमिति चेदाह [।] एतन्निवृत्तावित्या VN_{ms}:2a5 दि । एतस्याग्नेर्निवृत्तौ धूमनिवृत्तिर्येयं धूमस्य सा यदृच्छासम्वादः । काकता ली यन्यायेनेत्यर्थः । यदा तु सत्स्वपीति क्रियते तदा सर्व्वेषां तत्र सन्निपातादेतस्यैव निवृत्तावस्य निवृत्तिरिति निश्चयान्न यदृच्छासम्वाद इत्यभिप्रायः । § 30

किम्वदे तन्निवृत्तौ निवृत्तिर्यदृच्छासम्वाद इत्याह [।] मातृविवाह VN_{ms}:2a5 इत्यादि । मातुर्विवाह उचित आचरितो यस्मिन्देशे स तथा

७ थास्त] ? त

। ततो देशशब्देन सह विशेषणसमास [ः ।] तत्र स च जन्माश्रयत्वादुपचारात् । जन्म उत्पत्तिर्यस्य तस्य पारसीक देशभावि न यावत् । देशान्तरे मालवका दिदेशे यथाऽभावो मातृविवा हाभावे यदृच्छासम्वादस्तद्वदत्रापि । तथाहि मृद्विशेषाभावाद्देशान्तरे तस्याभावो न तु मातृविवाहाभावादिति काकतालीयस्तदभावे तस्याभा व इति । एवञ्चैतत् । § 31

अथवा अन्यथा व्याख्यायते । यथेदं धूमादिकार्यमस्मिन्नग्नीन्धनादिकारणकलापे सति भवति । वाक्याध्याहारस्तु पूर्व्व वत्कार्यः । तस्य प्रयोजनं तदेवावगन्तव्यं । इदम्प्रत्यक्षव्यापारसङ्कीर्त्तनं । सत्स्वपीत्यादिनाऽनुपलम्भस्य तदन्येषु पुनस्तस्मादग्न्यादिकारणकलापात् । अन्ये षु गवाश्वादिषु समर्थेषु तद्धेतुष्वस्याग्न्यादिकारणकलापस्याभावे न भवति । एतच्च परमतापेक्षमुक्तं । न तु तेषान्तद्धेतुत्वमस्ति । यदि पुनस्ते तस्य हेतवः स्यु स्तदा तत्कलापसन्निधेः प्रागपि पश्चादिव धूमोत्पादप्रसङ्गः । तत्सापेक्षतया तत्कृतकत्वं तेषामिति चेत् । आयातं तर्हि तस्य कलापस्य कारणत्वं । § 32

भवतु तर्ह्युभयोरपि न नः काचित् क्षतिरिति चेत् । न । व्यतिरेक- 12b/msK
गतस्तत्र दुर्घटत्वादित्युक्तं । यथाऽपगतेष्वपि सर्व्वेषु तेषु तस्मिं कलापे सति भवत्येव तस्य सम्भव इति तद भावे न भवतीति वाच्यं । तत्किमर्थं सत्स्वपीत्याद्युक्तमिति चेदाह । एवं ही VN_{ms}:2a4 त्यादि । अन्यथा तस्य कलापस्याभावे न भवतीत्युपदर्शने तस्यापि गवाश्वादेस्तत्राभावे सति सन्दिग्धमस्य कलापस्य सामर्थ्यम्भवेत् । यतोऽन्यद् गवाश्वादि तत्र शक्तं तदभावात्तन्न भूतमेतस्य कलापस्य निवृत्तौ निवृत्तिर्यदृच्छासम्वादः शेषं पूर्व्वयत् । § 33

17/s

एवाङ्कार्य कारणभावनिश्चयोपायविधिमुक्त्वा प्रकृतमुपसंहरति । एवमि VN_{ms}:2a5 त्यादिना । एवं यथोक्तेन विधिना तद्धूमादि तस्य वह्न्यादेः कार्यं समर्थितं निश्चितं सिध्यति भवति । यदेवासमर्थितमसन्दिग्धं सिध्यति निश्चीयते । अथवा एवं प्रत्यक्षानुपलम्भाभ्यां सम र्थितसत्तत्तस्य कार्यं सिध्यति । § 34

यदि नाम सिध्यति त त् किमित्याह । सिद्धं सत् स्वसम्भवेन आत्मसन्निधानेन तत्सम्भवं तस्य कारणस्य सन्निधानं साधयति VN_{ms}:2a6 । देशकालाद्यपेक्षयेत्याध्याहर्त्तव्यं । एतदुक्तम्भ वति [।] कार्यकारणभावनिश्चयास्तिद्धं तदुत्पत्तिलक्षण प्रतिवस्तु यत्रैवमतादृश उपलभ्यते तत्रैव स्वसत्तामात्रेण देशकालाद्यपेक्षया तत् स्वकारणङ्गमयतीति । किं कारणमित्याह [।] कार्यस्य कारणाव्यभिचारादि VN_{ms}:2a6 ति । अन्यथा हि तत्तस्य कार्यमेव न स्यात् । तद्व्यभिचारात् । नहि यद्व्यतिरेकेनयद् भवति तत्तस्य कार्यं युक्तं । कुण्डलमिव केयूर स्येत्यभिसन्धिः । § 35

---

२५ र्थित] ? तं

३३ तिरेकेन] ? ण

ननु यदि नाम धूमोऽग्निकार्यत्वन्न व्यभिचरति । अन्यस्य त्वङ्कुरादेः स्व-
कारणैरेव बीजादिभिरव्यभिचार इति कुत एतदित्याह । अव्यभिचारे चे
13a/msK VN$_{ms}$:2a6 त्यादि । इ दमुक्तम्भवति । यदा धूमस्य स्वकारणाव्य-
भिचारस्त- दुत्पत्तेः सिद्धस्तदा बीजादिभिरात्मीयैः कारणैः सहाङ्कुरादीनां
सर्व्वकार्याणां सदृशोऽव्यभिचारन्यायः । तथाहि तेपि यथोक्तप्रकाराभ्यां प्र-
त्यक्षानुपलम्भाभ्यां तत्कार्यतया सिद्धाः सन्तस्तदव्यभिचारिणः सिद्ध्यन्ति ।
एतत्साधनाङ्गसमर्थनं कार्यहेतौ । एतद्विपरीतश्चासमर्थ नं । तद्वादिनः प-
राजयाधिकरणमिति दर्शयन्नाह । एवमि VN$_{ms}$:2a6 त्यादि । एवमिति प्र-
त्यक्षानुपलम्भाभ्यां यथोक्तप्रकाराभ्याङ्कार्यहेतावपि न केवलं पूर्व्वोक्तेन प्रकारे
ण स्वभावहेतावसमर्थनम्वादिनः पराजयस्थानमित्यपि शब्दः । कस्मादेव-
मित्याह । असमर्थित VN$_{ms}$:2a7 मित्यादि । असमर्थिते तस्मिन्कार्यकार-
णभावे लिङ्गलिङ्गिनो[र्]लिङ्गस्य वा तत्कार्यत्वे आरब्धार्थासिद्धेरिति क्रियापदं
॥ आरब्धोऽर्थः कारणस्य सत्तासाधनं । तस्यासिद्धेस्तत्पराजयस्थानमिति प्र-
कृतेन सम्बन्धः । § 36

एतदेव कुत इत्याह । अर्थान्तरस्य VN$_{ms}$:2a7 धूमादेर्भावे सत्वे
18/s तस्या न्यादेर्भावनियमाभावात् । नियमग्रहणं यदृच्छासम्वादनिरा सार्थं ।
अर्थान्तरस्यापि तद्भावे प्रतिबद्धस्वभावस्य भावे भवत्येव तद्भावनियम इत्यत
आह । तद्भावाप्रतिबद्धस्वभावस्ये VN$_{ms}$:2a7 ति । तद्भावेऽग्न्यादिभावेऽप्र-
तिबद्धोऽनाय त्तः स्वभावोऽस्येति विग्रहः । एतच्चार्थान्तरस्य भावे तद्भाव-
नियमाभावादित्येतस्य कारणमवगन्तव्यं । प्रयोगः पुनर्योऽर्थान्तरभूतो य-
स्मिन्न प्रतिबद्धस्वभाव स्तस्य भावे न तद्भावनियमः । तद्यथा नूपुरस्य
भावे मुकुटस्य । अर्थान्तरभूतश्चायं धूमादिरप्रतिबद्धस्वभावस्तस्मिन्नग्न्यादाविति
13b/msK व्यापकानुपलब्धिः । व्यापकविरु द्धोपलब्धिविधिना वा हेत्वर्थकल्पनात-
द्भावाप्रतिबद्धस्वभावत्वमेव कुत इत्याह [।] कार्यत्वासिद्धे VN$_{ms}$:2a7
रिति । एतत्पुनरसमर्थिते तस्मिनिति बोद्धव्यं । तत् च परमार्थतस्ते न
कार्यहेतुरेवोपात्तस्तद्यदि नाम तत्कार्यन्तेन न समर्थितं तथाहि कथमसौ
निगृहीत इत्याह । वस्तुतः कार्यस्याप्युपादानप्रतिपादनादि VN$_{ms}$:2a8 ति
तत्कार्यत्वस्येति वि शेषः ॥ ० ॥ § 37

एवं कार्यहेतावपि साधनाङ्गसमर्थनमभिधायानुपलब्धावाह । अनुप-
लब्धावपि समर्थन VN$_{ms}$:2a8 मिति सम्बन्धः । साधनाङ्गेत्यध्याहार्यं ।
किं पुनस्तदित्या ह । अनुपलब्धिसाधनं । किं यस्य कस्यचिन्नेत्याह ।
उपलब्धिलक्षणप्राप्तस्येति VN$_{ms}$:2a8 । दृश्यस्वभावस्य नान्यस्येति यावत् ।
उपलब्धिर्ज्ञानं । उपलब्धिशब्दस्य भा वकरणसाधनतया ज्ञानपर्यायत्वात्तस्या
लक्षणङ्कारणं । लक्षणशब्दस्य करणसाधनत्वेन कृतकाभिधायित्वात् । तच्च
प्रत्ययान्तरसाकल्यं स्वभाववि शेषश्च । तद्प्राप्तस्यानुपलब्धिः । तस्याः साधनं
प्रतिपादनमिति व्युत्पत्तिक्रमः । § 38

२५ नि] ? न्नि

कथमेवंविधस्यानुपलब्धिरिति चेत् । नोद्यते तस्य तत्रैवेत् यपित्वन्य त्र
तज्ज्ञातीयस्य । कस्य पुनरेवं विधस्यानुपलब्धिः प्रसाध्यत इत्याह । प्रतिपत्तुः
VN_{ms}:2a9 प्रतिवादिनः । यदि चोपलब्धिलक्षणप्राप्ताः पिशाचादयोपि भ-
वन्ति तज्ज्ञातीयानां अन्येषाम्प्रभाववता वा । तत्किन्तेषामप्यनुपलब्धिसाधनं 19/s
साधनाङ्गसमर्थनम्भवति । नेत्याह । प्रतिपत्तुः । एतदुक्तम्भवति [।] य
एवासौ प्रतिपाद्यस्तस्यैव यदुपलब्धिलक्षणश्चा याति तस्यैवानुपलब्धिसाधनं
नान्यस्येति । किं पुनः कारणमेवम्प्रकारस्यैवानुपलब्धिसाधनं । नान्य-
स्येत्याह । तादृश्या एवा- नुपलब्धेरसद्व्यवहारसिद्धेरिति VN_{ms}:2a8 । अ 14a/msK
नुपलब्धिलक्षणप्राप्तानुपलब्धेः संशयहेतुतया अगमकत्वादिति भावः । अस-
द्व्यवहारसिद्धेरिति वचनमसद्व्यवहार एव तया साध्यते न त्वभावः स्वभावानु
पलब्धेः स्वयमभावरूपत्वादिति प्रदर्शनार्थं । असद्व्यवहारग्रहणञ्चोपलक्षणार्थं ।
तेनासज्ज्ञानशब्दावपि ग्राह्यौ । एतत्पुनः कुतोऽवसीयते इति चेदाह ॥ अनुप-
लब्धिलक्षणप्राप्तस्यार्थस्य प्रतिपत्तुः प्रत्यक्षं तदेवोपलब्धिस्तस्यानिवृत्तावपि स-
त्यामभावासिद्धेः VN_{ms}:2a9 । अभावग्रहणमभावव्यवहारशब्दज्ज्ञानोपल-
क्ष णं । उपलब्धिलक्षणञ्च ज्ञानपरिग्रहेण तत्प्रमितवस्तुव्युदासाय । का
पुनरियमुपलब्धिलक्षणप्राप्तिर्यद्योगादुपलब्धिलक्षणप्राप्त इत्युच्यत इ त्याह ।
तत्रेत्यादि VN_{ms}:2a9 । तत्र श्रुतिवचनोपन्यासार्था । स्वभावविशेषः ।
किमियदेव । नेत्याह । कारणान्तरसाकल्यञ्च । तस्मात्स्वभावविशेषाद्यान्य-
न्यानि कारणानीन्द्रियमनस्कारादीनि तानि कारणान्तराणि तेषां । साकल्यं
सामग्र्यं । स्वभावविशेषापेक्षया समुच्चयार्थश्चकारः । कः पुनरयं स्वभाव
विशेष इत्याह । स्वभाव इत्यादि VN_{ms}:2a9 । यद्यं त्रिविधेन विप्रक-
र्षेण व्यवधानेन देशकालस्वभावलक्षणेन न विप्रकृष्टं मेरुरामसुरादिरूपवत्
स्वभावविशेष उच्यते । तमेव स्पष्टयति । यदि VN_{ms}:2a10 त्यादिना
। न आत्मरूपोऽनात्मरूपः पररूप इत्यर्थः । स चासौ प्रतिभासश्च त-
स्य विवेकोऽभावस्तेनाकारेण यत्प्रतिप त्तुः प्रत्यक्षन्तत्राप्रतिभासितुं शीलं
यस्य रूपस्य स्वभावस्य तद्रूपन्तथोक्तं । अथवा रूपशब्देणसह विशेषण-
समासः कार्यः । सत्युपलम्भप्रत्ययान्तरसा कल्य इत्युपस्क्रियते । यः 14b/msK
सजातीयविजातीयरहितेनात्मना प्रतिभासते स्वज्ञाने तदन्यकारणसमवधाने
सति स स्वभाव इति यावत् । तादृश इति त्रिविध विप्रकर्षाविप्रकृष्टरूपः
पदार्थस्तथाऽनात्मरूपप्रतिभासविवेकेन प्रतिपत्तृप्रत्यक्षप्रतिभासेनाश्रयेनानुप-
लब्धः स न असद्व्यवहारस्य विषयो भवति । असद्व्यवहारप्रतिपत्तियोग्यो
भवतीत्यर्थः । विद्यमानोपीन्द्रियस्यालोकस्य मनस्का रस्य वाऽभावान्नोप- 20/s
लभ्यते तादृशस्तत्कथमसद्व्यवहारविषयो भवतीति चेदाह । सत्स्वन्येषूपलम्भ
VN_{ms}:2a10 कारणेष्विति । § 39

नन्वविप्रकृष्टोपि घटादिरुपलम्भकारणान्तरसमवधानेपि च सन्तान-
विपरिणामापेक्षत्वान्नोपलभ्यते । नहि हेत्वन्तरसन्निधानमिति स्वफलोत्पाद-

२६ ब्देण] ? न

नानुगुणः परिणामो भवति कारणस्य [।] तथाहि सत्यामपि पृथिवीबीजज-
लादिसामग्र्यामतिबहुनैव कालेन तालबीजस्य स्वकार्योदयानुकूला परिण-
तिर्भवति । शणादिबीजस्य त्वनन्तरमेव तथात्रापि भविष्यतीति । किञ्चान्य-
त्प्रभाववतायोगे पि शाचमायाकारादिनाऽधिष्ठितो भवति यदायं भावस्तदा
विद्यमानोपि नोपलभ्यते तत्कथमुक्तं तादृशः सत्स्वन्येषूपलम्भकारणेष्वनुप-
लब्धोऽसद्व्यवहारविष य इति । नूनम्भवा न्यायविन्दा [व]* प्यकृतपरिश्रमः ।
तथाहि अत्रोक्तं स्वभावो यः सत्स्वन्येषूपलम्भकारणेषु सन्प्रत्यक्ष एव भवती
ति । यश्चायं सन्तानपरिणामम पेक्षते यश्च प्रभाववताधिष्ठितः स स्वभावविशेष
एव न भवति । सकलतदन्योपलम्भप्रत्ययसमवधानेपि स्वरूपविषयोपलम्भ-
15a/msK जनकत्वात्तथैवंविधस्य पि शाचादिस्वभावविशिष्टरूपस्याभावव्यवहारविषय-
ता साध्यते । किन्तर्हीन्द्रियाण्युपलम्भप्रत्ययान्तरसन्निधाने यः सन्प्रत्यक्ष एव
भवति तस्य । नैवन्तर्हि सर्वथाऽ भावः साधितो भवतीति चेत् सुष्ठ्वनुकूल-
माचरसि । यतोऽनन्तरमेवोक्तं । य एवायमनुपहतेन्द्रियादिसाकल्ये दर्शनप-
थमुपयाति । तस्य च तत्साकल्येऽनुप लम्भेस्य च व्यवहारविषयता साध्यते
न तु पिशाचादिस्वभावविशिष्टरूपस्येति । न च तथाविधस्यापि सकलत-
दन्योपलम्भप्रत्ययसमवधानेऽनुपलब्धस्या स्तित्वं युक्तमनुपलब्धेरेवायोगात् ।
उपलम्भजनने कस्यचिदपेक्षणीयस्याभावात् । प्रमाणविनिश्चये तु स्पष्टीकृत-
मेवेदं । न कार्यकालेऽभावप्रति पत्ते रित्यादिना । एतेनैव यदेकेनावश्यं
सामग्रिसाकल्येपि परिणामस्तालगणबीजवदित्यादिना स तमतिशयवत् म-
तिमतो मनागप्यनव गच्छन्तश्चोद्यचुञ्चवश्चोचुदुस्तत्र सर्वमयं दुःस्थितं वेदितव्य-
मित्यलमप्रतिष्ठितबालप्रलापैरिति विरम्यते । तस्मादुपलब्धिलक्षणप्राप्तानुपल
ब्धिरेवाभावव्यवहारसाधनीति स्थितमेतत् । यतश्चैतदेवं ततस्तस्मात्कारणाद-
21/s न्यथा सति लिङ्गे समवाय उपलब्धिलक्षणप्राप्तानुपलब्धिं मुक्त्वा यदन्यदसद्व्य
वहारसाधनमनुपलब्धिमात्रं लिङ्गमुपादीयते । तदा तस्मिन्सति संशयो भव-
ति नास्त्यसद्व्यवहारनिश्चयः उपलब्धिनिवृत्तावप्यर्थाभावासिद्धेरिति समुदायार्थ
[ः ।] यदि वा ततो दृश्यानुपलम्भाल्लिङ्गात् सकाशादन्यथा सति लिङ्गे संशय
इति व्याख्यातव्यं । तस्माच्छब्दस्तु पूर्वमध्या हर्त्तव्यं । अथवा तत उप-
15b/msK लब्धिलक्षणप्राप्ताद न्यथा तद्विहीने संशये सति तल्लिङ्ग इति व्याख्येयं ।
का पुनरत्रानुपलब्धौ व्याप्तिरित्याह । अत्रापीत्यादि VN_{ms}:2b11 । एवं
विधमिति दृश्यं सदनुपलब्धं [।] सर्व्वग्रहणं सर्व्वोपसं हारेण व्याप्तिप्रदर्शनार्थं
॥ § 40

ननु यदि नाम कस्यचिद्विषाणादेः शशमस्तकादावुपलब्धिलक्षणप्राप्तानुप-
लब्धस्यासद्व्यवहारविषयता । अन्येनापि सामान्ये वि शेष्येवयविद्रव्य-
संयोगविभागादिना तथाविधेन तथा भवितव्यमिति कुतोऽयं नियम इत्य-
त आह । कस्य चिदि VN_{ms}:2b1 त्यादि । कस्यचिदुपलब्धिलक्षण-
प्राप्तस्या नुपलब्धस्य शशविषाणादेरसतोऽसद्व्यवहारविषयेस्त्यभ्युपगमेऽसद्व्य-

६ *] न्यायविन्दौ द्वितीयपरिच्छेदे लिङ्गस्य त्रिषु भेदेष्वेकः ।

वहारादिविषयोऽसन्नित्युक्तः । तल्लक्षणाविशेषादि VN_{ms}:2b1 ति । तस्या सतो लक्षणं निमित्तं यथोक्तानुपलब्धिर्लक्षणशब्दश्च करणसाधनस्तस्याविशिष्टत्वात् सामान्यविशेषावयविद्रव्यादाविति वाक्यशेषः । एत दुक्तम्भवति शशविषाणादेरप्यसद्व्यवहारविष[य] त्वं कस्मादिष्यते । यथोक्तानुपलम्भस्य तन्निमित्तस्य सद्भावादिति चेत् । यद्येवं सामान्यविशे षता तस्यास्तीति कस्मात्तथा सद्व्यवहारविषयत्वन्नाभ्युपगम्यते [।] अन्यथा तत्रापि तत्स्याच्चेत् । नहि पुरुषेच्छावशाद्धेतौ विषयप्रविभागो युक्त इति । नही VN_{ms}:2b1 त्या दिनैतदेव व्यनक्ति । एवंविधस्य दृश्यस्य सत्त्वेऽनुपलब्धस्या सत्वानभ्युपगम VN_{ms}:2b1 इति । असद्व्यवहारादिविषयत्वान्नाभ्युपगम इत्यर्थः असत्वशब्देना सद्व्यवहारो विनिश्चयस्तस्योपलक्षणम् । युक्तोपलम्भस्य तस्यैवानुपलम्भनं प्रतिषेधहेतुरित्यादि चेत् । अन्यत्र शशशृङ्गाभावे दण्डेन पुरुषस्य योगः स एव इत्यर्थः [।] नह्येवंविधस्य दृश्यस्य चक्षुरादिशून्येषूपलम्भ- 16a/msK कारणेषु स अनुपलब्धिर्भवति ॥ § 41

किन्तर्ह्युपलब्धिरेव भवतीति प्रतिषेधद्वयेनाह । अन्यस्योपलब्धिप्रत्ययस्य कस्यचिवपेक्षणीयस्याभावादिति भावः । तदनेन प्रकृतमेव स्पष्टयति । अनुपल भ्यमानं त्वीदृशमित्युपलब्धिलक्षणप्राप्तन्नास्ति तस्मादेतावत्सात्र उपलब्धिलक्षणप्राप्तानुपलब्धिमात्रन्निमित्तं यस्यासद्व्यवहारस्य स तथा ख्यातः तदनेनासत् व्यवहारस्यानन्यनिमित्ततामाह । एतदेव कुत इत्याह । अन्य- 22/s स्ये VN_{ms}:2b2 त्यादि । यथोक्तानुपलब्धिमपास्यान्यस्य नास्तित्वव्यवहारनिमित्तस्याभावादिति सम च्चयार्थः । § 42

ननु च यस्य यत्र न किञ्चित्सामर्थ्यमस्ति तदसद्व्यवहारविषयो यथा नभस्तले कमलं । तथाभिमतेपि देशादावभिमतस्य भावस्य न किञ्चित्सामर्थ्यमस्तीति सर्व्वसामर्थ्यविवेक एव नास्तित्वव्यवहारस्य निमित्तं भविष्यति । एतक्तिमसंबद्धमेवोद्घाटितशिरोभिरभिधीयते । अ न्यस्य तन्निमित्तस्याभावादिति कदाचित् कश्चित् ब्रूयादिति तन्मतमाशंकते । सर्व्वसामर्थ्यविवेको निमित्तमिति VN_{ms}:2b2 चेदि ति । अत्र समाधिमाह । एवमि VN_{ms}:2b2 त्यादिना । एवं मन्यते सूक्तमेतत् सर्व्वसामर्थ्यविवेको निमित्तमिति किन्तु स एव सर्व्वसामर्थ्यविवेकोयं पदार्थः कथमवगतो यथोक्तामनुपलब्धिमपास्य येन सर्व्वसामर्थ्यवि वेकोऽस्यासद्व्यवहारस्य निमित्तम्भविष्यति । न चासावज्ञात एव तस्य निमित्तम्भवितुमर्हति । ज्ञापकहेत्वधिकारात् । कस्मात्सर्व्वसामर्थ्यविवेकिनो यथोक्तानु पलम्भेनेव प्रतीतिरित्याह । अन्यस्य 16b/msK तत्प्रतिपत्युपायस्याभावा VN_{ms}:2b3 दिति । यदा तु यथोक्तानुपलब्ध्या तस्य सर्व्वसामर्थ्यविवेकिनः प्रतीतिर्भवति । तदा तत्प्रतिपत्तौ सत्यामसद्व्यवहारो भवति । इति तस्मादिदं यथोक्तानुपलम्भनं तस्यासद्व्यवहारस्यानिमित्तमुच्यते । § 43

---

१२ स्य] ?
२० म] ? मु
३१ म्भेने] नै ?

पुनरपि परोन्यस्य तन्निमित्तस्याभावादित्यस्य कदाचि दयुक्त-
ताम्ब्रूयादित्याशङ्कते बुद्धिव्यपदेश VN$_{ms}$:2b3 इत्यादिना । अयमस्याभिस-
न्धिर्बुद्धिव्यपदेशार्थक्रियाभ्यः सकासात्तद्व्यवहारो भवति । तथा हि ताः प्रवर्त्त-
माना वस्तुसत्तां साधयन्ति । तद्भेदाभेदौ च वस्तुभेदाभेदावित्याशयः । ताश्च
निवर्त्तमानाः स्वनिमित्तं सद्व्यवहारं निवर्तयन्त्यग्निरिव धूमं । तन्निवृत्तौ चास-
द्व्यवहारः । सद्व्यवहारासद्व्यवहारयोरन्योन्यव्यवच्छेदस्थितरूपत्वेन एकत्याग-
स्यापरोपादानेनान्तरीयकत्वात् । ततश्च बुद्ध्यादिनिवृत्तौ चासद्व्यवहारनिमित्त-
23/s मिति नेदं युक्तं वक्तुमन्यस्येत्यादि । अत्रापि प्रतिविधानमाह । भव ती
VN$_{ms}$:2b4 त्यादि । यथोक्तप्रतिभाषाबुद्धिः प्रतिपत्तृप्रत्यक्षप्र तिभासिरूप-
निर्भासा यथोक्तः प्रतिभासो यस्या इति विग्रहः । उक्तश्च यदनात्मेत्यादिना ।
तस्याः सकासात्सद्व्यवहारो भवति साक्षा[द्] वस्तुग्रहणात् । तस्या श्च विप-
र्ययोऽभावस्तस्मिन् सत्यसद्व्यवहारो भवति । सत्स्वन्येषूपलम्भकारणेष्विति
वाक्यपरिसमाप्तिः कार्याः। अन्यथा संसयोत्पत्तेः । नहि वस्तुसत्व उपलं
17a/msK भप्रत्ययान्तरसाकल्ये च सा निवर्त्तत इति निवेदितमेतत् पुरोऽस्मा- भि-
रितिभावः । तवनेन यद्येवंविधा बुद्धिरभिमता त्वया तदावयोरेकमत्यमेव
तथापि न नः किञ्चिदनिष्टमुक्तं स्यात । अथान्यातदा व्य भिचार इति द-
र्शयति । तमेव व्यभिचारन्दर्शयन्नाह । प्रत्यक्षाविषये VN$_{ms}$:2b4 त्यादिना
। लिङ्गाज्जाता लिङ्गजाः । अनुमानमित्यर्थः । तस्याः सकासात्सद्व्यवहारः
स्यात्परो क्षेऽर्थेन केवलमनन्तरोदितरूपायाः स्वग्राह्य इत्यपिनाह । किं
लिङ्गजायाः सर्व्वस्याः सम्भवति नेत्याह । कुतश्चिदि VN$_{ms}$:2b4 ति [।]
स्वभावकार्यलिङ्गद्वयबलोपजाता या इत्यर्थः । अनुपलम्भस्यासत्ताऽसद्व्यव-
हारसाधकत्वादिति भावः । यदि नामेवं ततः कथम्व्यभिचार इति चेदाह ।
असद्व्यवहारस्त्वि VN$_{ms}$:2b4 त्या दि । तद्विपर्य इति तस्या यथोक्तलिङ्ग-
जाया बुद्धेर्विनिवृत्तावनैकान्तिकः सन्दिग्ध इत्यर्थः । किं कारणं विप्रकृष्टेर्थे
देशादिविप्रकर्षैः प्रतिपत्तृप्रत्यक्षस्य प्रमाणस्य निवृत्तावपि संशयात्कारणात् ।
अर्थाभाव इति शेषः [।] प्रतिपत्तुः प्रत्यक्षमिति षष्ठीसमासः । इदश्च प्रही
णसकलज्ञेयावरणस्य प्रत्यक्षनिवृत्तौ त्वसंदेह एवेति कथनायोपात्तं । अन्यस्य
चेत्यनुमानस्यागमस्य च । एतच्चागमस्य प्रामाण्यमभ्युपगम्याभिधीय ते । न
तु तस्य प्रामाण्यमस्ति [।] § 44

...4 नान्तरीयकताभावाच्छब्दानाम्वस्तुभिः सह [।]
नार्थसिद्धिस्ततस्ते हि वक्त्रभिप्रायसूचका [ः ॥ ४]§ 46

३ कासा] ? शा
९ तिभाषा] ? सा
११ कासा] ? शा
१३ कार्याः] ? र्या
१३ संस] ? श
१६ अथान्या] ? न्यः
१८ कासा] ? शा
२२ नामे] ? मै

इत्यादिवचनात् । § 47

अयमस्याभिप्रायो यदि नाम प्रमाणत्रयन्निवृत्तमप्रत्यक्षवस्तुनि तथापि तन्नास्तीति कुतोयन्निश्चयः । तथाहि मलयनगनिकुञ्जवर्त्तिदूर्व्वाप्रवालपत्रप्रभृतयः 17b/msK, 24/s प्रमाणत्रयगोच रभावातिक्रान्तां मूर्तिमुद्वहन्तस्तिष्ठन्ति । न च ते न सन्तीति शक्यमभिधातुं । प्रमाणभावस्य सकलविषयसत्वव्यापकत्वकारणत्वाभावात् । न च तद्रूपविकलपदार्थेनि वृत्तावन्यनिवृत्तिनियमेनातिप्रसङ्गदोषोपनिपातादित्यावेदितमेतःपुरस्तात् । यदाह ।

...5 शास्त्राधिकारासम्बद्धा बहवोऽर्थाकृतेन्द्रियाः ।
अलिङ्गाश्च कथन्तेषामभावोऽनुपलम्भता [॥ ५]§ 50

इति । § 51

ननु चात्र लिङ्गजाया मतेरसद्व्यवहारहेतुत्वं निषेद्धुमारब्धन्तद्विपर्य्यय इत्याद्यभिधानात् । तत्कस्मादप्रस्तुतस्यैव प्रत्यक्षस्य चागम स्य चोपक्षेपः कृत इतिचेत् । युक्तमेतत् । सर्वप्रमाणनिवृत्तेस्त्वगमकत्वप्रदर्शनेनैतदेकान्तासम्भवदर्शनायोक्तमिति लक्ष्यतेऽस्य सुधियोऽ भिसन्धिः । § 52

नन्विदमुक्तं सद्व्यवहारासद्व्यवहारयोरन्योन्यव्यवच्छेद स्थितलक्षणत्वे नैकाभावस्यापरभावनान्तरीयकत्वात् विप्रकृष्टे तन्निमित्ता भावात् सद्व्यवहारनिवृत्त्याऽसद्व्यवहार इति [।] सत्यमुक्तमेवैतन्न पुनर्युक्तं । तथाहि परोक्षेऽर्थे सद्व्यवहारनिवृत्तिः कथन्तन्निमित्ताभावेपि द्वयोरप्यनयोरनुपलब्ध्योः स्वविपर्ययहेत्वभावभावाभ्यां सद्व्यवहारप्रतिषेधफलत्वन्तुल्यमेकत्र संशयादपरत्र विपर्ययादिति वचनात् संशयेनेति चेत् । यद्येवं कथन्तर्ह्यसद्व्यवहारनिश्चयस्तत्र युक्तिमनुपतति । यत्र तु निश्चयेन सद्व्यवहारनिवृत्तिस्तत्रासद्व्यवहारोपि पुक्त एवान्यः प्रवर्तनफलोसीत्युक्तेः न चाभावरूपव्यवच्छेदे भावानुषङ्गोस्ति नियमेन । नहि बन्ध्यातनयनभःपङ्कजादिष्वसदवस्थता भवति प्रतिषेधात् सदवस्थता भवति प्रतिषेधमात्रन्तु स्यात् । तयो रन्योन्यव- 18a/msK च्छेदेनावस्थानात् । तथात्राप्यप्रत्यक्षे सद्व्यवहारप्रतिषेधान्न विधिभूता सद्व्यवहारानुसङ्गस्तद्व्यवच्छेदमात्रन्तु स्यात् । तद्भावस्य तद्भावस्यान्योन्यपरिहारेण अवस्थितत्वात् । उक्तश्चैतदमलन्यायतत्वप्रबोधोद्गतप्रज्ञालोकतिरस्कृताशेषपरतीर्थ्य प्रवादध्वान्तेन धर्मकीर्तिनैवानित्यनिरात्मतादिव्यवच्छेदेपि तच्च स्यादित्यादि - नेत्यास्तान्तावत् । § 53

अधुना सामान्यभूतानां बुद्धिव्यपदेशानां सद्व्यवहारहेतुत्वमपि नास्तीति कथयन्नाह । न चे VN_{ms}:2b5 त्यादि । तत्र च यथाक्रममभिसम्बन्धः । ते सर्व्वे बुद्धिव्यपदे शा न वस्तुसत्तां साधयन्ति । तेषाम्वा भेदाभेदौ न वस्तुभेदाभेदयोः सत्ता सद्भावमिति । सर्व्वग्रहणं केचित्तु साधयन्त्येवेति 25/s प्रदर्शनाय । कुत एतदित्याह । अस त्स्वप्यतीतानागतादिषु VN_{ms}:2b5

७ मेतः] ? तत्
२६ हारानुस] ? ष

वृत्तेरिति क्रियापदं । आदिशब्देन व्योमोत्पलादयः परिगृह्यन्ते । कथम्पुनर्विषयमन्तरेण तेषु तेषां वृत्तिर्युक्तेति चेदाह । कथं चित्त VN$_{ms}$:2b6 द्रूपोनुभवाहितवासनापरिपाकप्रभावादित्यर्थः । तेषाञ्च वस्तुप्रतिबन्धाभावादिति भावः । शङ्खचक्रवर्ती VN$_{ms}$:2b7 त्यादिना प्रकारेण तदनेन वस्तुसत्तां साधयन्तीत्येतस्य कारणमाह । नानैकामर्थक्रिया VN$_{ms}$:2b6 ङ्कर्तुंसीलं येषां ते तथोक्ताः । तेष्वपि च वृत्तेः कारणात् । किमर्थं तेषु तेषाम्वृत्तिस्तद्भावख्यापनाय । तेषान्नाऽ नैकार्थक्रियाकारिणाम्भावस्तस्य ख्यापनाय । नानार्थक्रियाकारित्वस्यैकार्थक्रियाकारित्वस्य च कथनार्थमिति यावत् । अस्त्येव तर्हि तस्य वस्तुनस्तत्वमित्यत आह [।] नानैकात्मताया VN$_{ms}$:2b6 अभावेपि तस्य वस्तुन इत्यधाहर्तव्यं । नानैकरूपाणाम्बुद्धिव्यपदेशानां तदनेन न 18b/msK वस्तुभेदाभेदौ साधयन्तीति साधयति । इदमेव निदर्शन प्रदर्शनेन सफली- करोति । राजा महासम्मत VN$_{ms}$:2b6 इदमतीतवृत्तेरुदाहरणं । यथेति चाध्याहार्यं । शङ्ख चक्रवर्तीत्याद्यनुत्पन्नवृत्तेः शब्दैर्विषाणमित्यादि यदोपात्तस्य रूपं सनिदर्शनश्चक्षुर्विज्ञानजनकत्वात् । सप्रतिघश्च स्वदेशे परोत्पत्तिप्रतिबन्धात् । एतन्नानार्थक्रियाकारिषु वृत्तेरित्येतस्य निदर्शनं । यस्मात्तच्चक्षुर्विज्ञानादि कार्यजनकत्वादेकरूपमपि नानारूपैः सनिदर्शनादि शब्दैर्विषयीक्रियते । तस्मान्न ते वस्तुभेदसाधनायालं । घटश्चेत्येतदेकार्थक्रियाकारिष्वित्येतस्योदा हरणन्तथाहि बहवो रूपगन्धरसस्पर्शा उदकधारणविशेषादिकार्यनिर्वर्त्तनसमर्थत्वादभिन्नसमैस्तै[ः] विषयत्वेनात्मसात्क्रियन्ते । ततस्ते नाभेदं सा धयितुं क्षमाः । तच्च[ा]तीतानागतशशविषाणादिषु तत्प्रतिपत्तिर्न वस्तु साधयतीत्यतिप्रतीतमेतत् । अथ कथमिदङ्गम्यते सनिदर्शनादिबुद्धिशब्दा न वस्तुभेदं साधयन्तीत्यतः प्राह । नहीत्या VN$_{ms}$:2b7 दि । कस्मादेवात्र वस्तुनि रूपादावुपसंहारात्सनिदर्शनं सप्रतिघं रूपमित्येव समानाधिकरणत्वादिति यावत् । अन्यथा भिन्नाधिकरणत्वाद्बकुलोत्पलकम- 26/s लमालतीमल्लिकादिशब्दानामेव सामानाधिकरण्यमेव न भवेदिति भावः । कणभक्षाक्षपाद मतानुसारिण स्तु मिथ्यादर्शनानुरागजनितासद्विकल्पमलोपलिप्तान्तर्लोचनाः सञ्चक्षते [।] नानाविषयत्वेप्यभ्युपगम्यमाने तेषामेकत्रोपसंहारोऽविरुद्ध एव । तन्निमित्तानां सनिदर्शनादीनान्तत्र रूपादौ समवायादिति । § 54

तदेतत्सर्वमेषामविचारितरमणीयतया विचारविमर्दाक्षमत्वात् पण्डितज- 19a/msK नहासकारि दर्शनमित्यभिप्रायवा नाह । आयासे वताय मित्या VN$_{ms}$:2b8दि [।] वतशब्दोऽनुकंपायाङ् कासावित्याह । अनेकं सम्बन्धिनं सनिदर्शनत्वादिकमुपकृत्यानुपकारे तेन तेषान्तत्र सम्बन्धित्वायोगादित्यभि प्रायः । अनेकं सनिदर्शनादि शब्दं VN$_{ms}$:2b9 तेभ्यः सम्बन्धिभ्यःशकासादात्मनि संमार्गयन्निदमायासपतने कारणं । § 55

५ तुंसी] ? शी
१० धा] ? ध्या
३५ कासा] ? सकाशा

ननु सरूपादिभावो यैः शक्तिभेदैरनेकसम्बन्धिन मुपकरोति । तैरेव शक्तिभेदैरनेकं बुद्ध्यादिशब्दं किन्नोत्थापयति । यदि पुनरेवं भवेत्तदाको गुणो लभ्यत इत्याह । एवं हयनेन परम्परानुसारश्रमः परिहृ तो भवती VN$_{ms}$:2b9 ति । शक्तिभेदैः सम्बन्धिनमुपकरोति तेभ्यश्च शब्दाः प्रवर्तन्त इत्ययम्परम्परानुसरणायासोऽनेनतपश्विनारूपादिना त्यक्तो भवतीत्यर्थः । § 56

ननु च प्रतिनियतोपि कार्यशक्तिमन्तः सर्व्वे एव भावास्त्वयाप्येतदवस्यमेवाभ्युपेयमन्यथा कस्माच्छालिबीजंसाल्यङ्कुरमेवोत्पादयति न यवाङ्कुरमिति परेणाभियुक्तेन किमभिधानीयं भावप्रकृतिं मुक्त्वा [।] तस्मात्तव पदार्थप्रकृतिसमाश्रयणमेव शरणमन्यथास्य दोषस्य परिहर्त्तुमशक्यत्वात् [।] एतच्च न ममापि राजकुलनिवारितं । तथाहि शक्यमे[त]त्मयाप्यभिधातुमनेकसम्बन्ध्युपकार एव तस्य सामर्थ्यं नानेकशब्दोत्थापनमिति चेत् । सत्यमेवमेत त् । एवन्तु मन्यते । न तावत् सनिदर्शनत्वादयः सन्ति । क्रमयौगपद्याभ्यामर्थक्रिया त्वनुप्रयोगात् । उपलब्धिलक्षणप्राप्तानाञ्चानुपलम्भात् न चोपलब्धिलक्ष णप्राप्तं सदनुपलभ्यमानमस्तीति शक्यते वक्तुमतिप्रसङ्गात् । अनुपलब्धिलक्षणप्राप्ततायां वा कथं तन्निबन्धनाः प्रत्ययव्यपदेशाः 27/s
प्रवर्त्तन्ते गोगवयादिषु [।] एतेनोपलब्धा- नामपि क्षणिकत्वादिवत् व्य- 19b/msK
क्तिव्यतिरिक्तेणानुपलक्षणं प्रत्यक्षं यस्मात्सामान्यं यदि दृष्टमप्यविकलं भिन्नं न संलक्षते । भावे तद्बलभाविनी भवति सा या शब्दवृत्तिः कथं । दण्ड्यादौ न निबन्धनस्य न गतौ धीशब्दयोरस्ति सा तस्मादस्य कथञ्चिदेव तदपि ते युक्त्या न सङ्गच्छते । § 57

किञ्च ॥ § 58

...6 भावानामैकदेश्यं प्रसजति भवतो दर्शने सर्वथैषां
सत्तादेसादभेदात्सकृदिदमथवा भिन्नदेशे निवृत्तं ।
वृत्तौ वानेकमेतन्नहि भवति सकृत्सर्व्वथा वृत्तिभाजां
तालादीनां फलानां बहुषु बहुविधेष्वाश्रयेष्वेकभावः ॥ [६] § 62

सत्वे वा तेषान्न बुद्धिशब्दोत्थापनसामर्थ्यमन्वयव्यतिरेकाभ्यामवधार्यते । अत एवानुपलभ्यमानत्वात्पाचकादिष्वपि च तद्व्यतिरेकेणापि तेषाम्भावात् । उपपादितश्चैतद् प्रमाण–वर्तिके १।१६० । § 63

...7 पाचकादिष्वभिन्नेन विनाप्यर्थेन वाचकः ।
भेदान्न हेतुः कर्मास्य न जातिः कर्मसंश्रया [॥ ७] § 65

---

५ श्विना] ? तपस्विना
८ स्य] ? श्य
८ स्माच्छालिबीजंसा] ? शा
१८ तिरिक्तेणा] ? ना
२४ त्तादेसा] ? शा

इत्यादिनेति नेहोच्यते । न च तेषामुपकार्यत्वमस्ति नित्यतयाऽनाधेयातिशयत्वात् । न च पुरुषाभिप्रायानपेक्षो व्यक्त्युपकृतसप्रतिघत्वादिसामान्यसामर्थ्यभावेनोपनेयो विवक्षायान्तु संमुखीभावेपि प्रवृत्तिप्राप्तः । पुरुषाभिप्रायानुरूपे वा स एवास्तु नियामकः किमन्तर्गतृभिः सामान्यैः [।] तथाहि तद्गतान्वयव्यतिरेकानुविधान मेव लक्ष्यते सामान्यानां न नित्यानामव्यतिरेकत्वात् । § 66

तस्मात् । सर्व्वमेतत् कुदर्शनसमाश्रयेण कल्पनामात्रं । कल्पना च सैव कर्तव्या या पुनर्न्न पर्यनुयोगमर्हति तत्रत्यां कल्पनायां वरमेव कल्पनादोषाभावात् । गुणसद्भावाच्चेति ।सात्मतयुक्तैवेयं कल्पना । नहि एकस्य
20a/msK नाना सुक शब्दोत्थापने सामर्थ्यमस्तीति । यद्येवमत्रापि ब्रूम इत्याह । नानाशब्दो- त्थापनासामर्थ्ये नानासम्बन्ध्युपकारोपि माभूदि VN$_{ms}$:2b10 ति । एकस्यानेकोपकारकत्वविरोधाभ्युपगमादित्यभिसन्धिः । नित्यत्वात्सम्बन्धिनामनुपकारोऽभ्युपेत एवेति चेदाह । अनुपकारे हि तेषां VN$_{ms}$:2b10 सनिदर्शन त्वादीनान्तेनाङ्गी क्रियमाणे तत्सम्बन्धिता न सिध्यति । नहि यो
28/s येन नोपक्रियते हेदुः स तस्य सम्वन्धियुक्तो हिमवा निव मलयगिरेरिति भावः । एवन्तावत्पर पक्षनिराकरणेन सनिदर्शनादिशब्दानामभिन्नविषयत्वं साधितं । त एव जडिम्नः पदमुद्वहन्तः पुनरपि पर्यनुयुञ्जते । § 67

ननु भवतु नाम सनिदर्शनादिशब्दानामभिन्नविषयत्वं । अथ कथमवसीयते । घटपटादिशब्दानामनेकार्थविषयत्वमिति यावता रूपादिव्यतिरिक्त मन्यदेवावयवि द्रव्यमस्ति । तदेव च घटपटादिशब्दैर्विषयीक्रियते । तथाहि विचारविषयापन्नः पटस्तन्तुभ्यो व्यतिरिच्यते भिन्नकर्तृकत्वात् घटादिवत् । तथा समस्तव्यस्तप्रत्ययाविषयत्वाद् गवादिवत् । नहि तन्तवः तन्तुसमुदाय इति वा पटे प्रत्ययो दृष्टः । उपायान्तरसाध्यत्वाच्च घटादिवत् । भिन्नदेशावस्थितैश्च क्रियमाणत्वात् । घटादिवदेव भिन्नपरिमाणत्वाच्च । वकुलामलकबिम्बादिव-
20b/msK त् । अतश्च पूर्व्वोत्तर कालभावित्वाद् बीजाङ्कुरादिवत् । अथवा पटादन्ये तन्तवस्तत्कारणत्वात् तुर्यादिवत् । तन्तुपटयोर्वाऽन्यत्वं भिन्नशक्तिमत्त्वात् जलानलादिवत् । तथेदमपरम्विचारविषयापन्नमिन्दीवरङ्गन्धादि भ्योऽत्यन्तभिन्नन्तेषाम्व्यवच्छेदकत्वात् । चैत्रादिवत् । इह यद्यस्य व्यवच्छेदकन्तत्तस्मादन्यत्तद्यथा गोपिण्डाच्चैत्र इत्येतानि तद्व्यतिरेकसाधनप्रमाणानि सन्ति । तत्कथन्तेषाम्भिन्नविषयत्वम्भविष्यतीति ॥ ० ॥ § 68

तदेतदप्येषामसद्दर्शनाभिनिवेशपटलप्रच्छादितान्तःकरणानां नाल्पीयसस्तमसो दुर्विलसितमित्यागूर्या ह । घट इत्यपि च रूपादय एवैकार्थक्रियाकारिण एकशब्दवाच्या भवन्तु किमर्थान्तरकल्पनये VN$_{ms}$:2b10 ति कार्यमित्युपस्क्रियते । नैव किञ्चित्तस्य तादृशस्य नीलादि व्यतिरेकेणानुपलक्षणादित्याकूतमस्य । यानि त्वेतानि तत्प्रतिपादनाय प्रमाणान्युक्तानि तान्य-

९ त] ? स्यान्मतं
१० सु] ? र्थ

सिद्धतादिदोषदुष्टत्वान्नालं तद्भेदसाधनायेति भो ता नामेव पुरतः छायान्दधतीति मन्यते । तथाहि नेदं तावदाद्यं प्रमाणं परीक्ष्यमाणं पूर्व्वामपि परीक्षां क्षमते । यतोत्र विकल्पद्वयमाविर्भवति । अ न्यावस्थावस्थितेभ्यो वा तन्तुभ्यः पटस्यान्यत्वं साध्यते विशिष्टसंस्थानावस्थितेभ्यो वेति । तत्र न तावदयमाद्यः प्रकारः सहते विचारभारगौ रवं । सिद्धसाधनतादोषानुषङ्गात् । यस्मात्समधिगतसमस्तवस्तुयाथातथ्यसुगतसमयनयसमाश्रयप्रवृत्तिबलासादितावदातमतयः प्रसवानन्तरनि रोधभाजः सर्व्वभावाइति प्रकल्पयन्ति । ततश्च तेभ्योन्यत्त्वमिष्टमेवेति सिद्धसाध्यताप्रसङ्गोपनिपातपिशाचः कथमिव भवन्तं न गृह्णाति । द्वितीयोपि विक ल्पः तीव्रानलोपतप्त इवोपलतले तलानि पादानां न प्रतिष्ठां समासादपति । हेतोः परं प्रत्यसिद्धत्वात् । नहि 21a/msK, 29/s विशिष्टस्थानावस्थितेभ्यः पटस्य भिन्नकर्तृकत्वं परं प्रति सिद्धपद्धतिमवतरति योहि तादृक्प्रकारेभ्योन्यत्वमभावादेव नाभ्युपैति स कथमिव भिन्नकर्तृकत्वमभ्युपगमिष्यतीति । तदनन्तराभिहितमपि प्रमा णेन समभिलसितमनोरथपरिपूरणायालं हेत्वसिद्धेः । यतः पट इति तन्तुष्वेव सन्निवेशविशेषेणावस्थितेषु प्रत्ययो वर्तते । तद्विविक्तरूपस्यात्यन्तमु न्मिषितचक्षुषाप्यदर्शनात्स्फटिकादौ दृष्टमिति चेत् । एतदुत्तरत्र निषेत्स्यामः । यत्त्विदमुपायान्तरसाध्यत्वाद् भिन्नदेशावस्थितेः क्रियमाणत्वात् भिन्नपरिमा णत्वात्पूर्वोत्तरकालभावित्त्वाद् भिन्नशक्तिमत्वाच्चेति ॥ § 69

अत्र प्रथमसाधनाभिहितविकल्पदोषस्तीव्रामर्शविरक्तलोचन इवारातिस्तत्सम्पदन्न स हते ॥ § 70

...8 प्रथमे सिद्धसाध्यत्वं द्वितीये हेत्वसिद्धता ।
क्षणिकत्वाद्विशिष्टानामुत्पादोभिमतो यत [ः ॥ ८]§ 72

इति सङ्ग्रहश्लोकः । यच्चेदमुक्तं विचारविषया पं न मिन्दीवरमित्यादि । तदपि न सङ्गच्छते । यस्मादिन्दीवरस्य गन्धादयइतीन्दिवरस्वभावा गन्धादयो मधुभावनाविशेषादिकार्यनिवर्त्तनस मर्था इति यावत् । अविशिष्टकार्यसाधनात्मना सामान्यभूतगन्धादिशब्दैः प्रसिद्धाविशिष्टकार्यसाधनाख्येन विशेषेण ये विशिष्टास्त एवमुच्यन्ते । न पुनरत्रान्यत् किञ्चिदित्यर्थावर्णितलक्षणं द्रव्यमस्ति तस्य तादृशोऽनुपलब्धेरित्युक्तप्रायं । तथा चानेन प्रकारेण तेषान्तद्व्यवच्छेदकं भवतीति । तेषान्तद्व्यच्छेदकं च न चात्यन्तं भिन्नमिति कोऽनयोर्विरोध इति । सन्दिग्धविपक्षव्यावृत्तिको हेतुः प्रतिबन्धासिद्धः । नहि दृष्टान्तमात्रास्तिद्धिरस्ति । सर्व्वसिद्धिप्रसङ्गात् । अपि च शिलापु त्रकस्य शरीरं । रूप- 21b/msK स्य स्वभाव इत्यत्रापि शिलापुत्रकरूपयोः शरीरस्वभावव्यवच्छेदकत्वमस्तीति

१ ता] ?
१० प] ? यं
१३ सित] ? षित
२३ न] ? पन्न
२४ र] ? इतीन्दीवर
२५ न] ? निर्वर्त्तन

भेदस्तयोरपि ततः प्रसजते न च भवति । नैःस्वाभाव्यप्रस ङ्गात् । तस्मादयमेतेनानैकान्तिकः स्फुटमेव भवद्भिरभिधानीयः । किञ्चेदमतिविकलैर्मिथ्यादर्शनसंरागपिशाचाविष्टबुद्धिभिः किमिन्दीवरस्य गन्धादय इत्येते श ब्दा[ः] पुरुषाभिप्रायव्यापारनिरपेक्षा एव वस्तुतत्वनिबन्धनाः प्रवर्त्तन्ते । किम्वा यथैव तैः प्रयुज्यन्ते तथैव वस्तुतत्वमनपेक्ष्य तमर्थमसत्कारेण प्रतिपादयन्तीति [।] य द्याद्यः पक्षस्तदा सदाध्वननप्रसङ्गोऽतीतादिष्वन्यत्र च पुरुषे च्छावसान्नियोजनन्नभवेत् । न च प्रवचनान्तरभेदेष्वर्थेषु प्रवृत्तिः प्राप्नोति । न च क स्याश्चिद्वाचोऽसत्यार्थता स्यात् । अथोत्तरस्तदा ।

...9 येषाम्वस्तुवसावाचो न विवक्षापराश्रया[ः] ।
30/s षष्ठिवचनभेदादि चोद्यन्तान्प्रति युक्तिमत् ॥ [९] § 75

यदाहुः ॥ § 76

...10 यद्य था वाचकत्वेन वक्तृभिर्विनियम्यते ।
अनपेक्षितवाह्यार्थन्तत्तथावाचकम्वचः । [१०] § 78

तदा न पुरुषेच्छाबलप्रवृत्तशब्दवसादर्थतत्वं व्यवतिष्ठत इति तद वस्थं सन्दिग्धविपक्षव्यतिरेकत्वं हेतोरिति । एतेनैतदपि प्रत्युक्तं विप्रतिपत्तिविषयापन्नाचन्दनादन्ये रूपरसगन्धस्पर्शा हेयत्वादयश्चेति प्रतिजानीमहे न व्यपदिश्यमाणत्वात् । शिलातुलाढकप्रसेविकावदिति । तस्मात्तद्भावप्रतिपादनाय न किञ्चित्प्रमाणमस्तीति स्थितमेतत् । अस्माकन्तु तदभावप्रमाणसाधकं प्र-
22a/msK मा णमेतत् । ये परस्परव्यावर्त्तमानस्वभावावस्थितिसमालिङ्गित सरीरास्ते व्यतिरिक्तावयविद्रव्यानुगतमूर्त्तिमात्मातिशयं नात्मसात्कुर्वन्ति । यथा बहवो भस्माधा रन लालाथूकादयस्तथा च यथोपदिष्टधर्मवन्तस्तन्त्वादय इति स्वभावहेतुः । वैधर्म्येण नभःपङ्कजादयस्तेषान्नि[ः]स्वभावत्वात् । परस्परव्यावर्त्तमानानामपि यद्येकस्वभावानभ्युपगमे तस्य तेषु सर्व्वात्मनाऽन्यथा वा वृत्त्ययोगो बाधकम्प्रमाणं । कुतस्तद्धि युगपदनेकत्र सर्व्वात्मना वर्त्तमानमनेकाधारस्थिताधेयव दनेकत्वमात्मनोऽनुमापयतीति कथमस्याभिन्नस्वभावता योज्यते । एकावयवोपलम्भवेलायाञ्च सकलस्य तत्र परिसमाप्तत्वादुपलब्धिप्रसङ्गः । अनेकाव यवोपलब्धिद्वारेणोपलम्भकतिपयावयवदर्शनेपि स्यात् समस्तावयवोपलम्भद्वारेण उपलब्धौ सर्व्वकालमदर्शनप्रसङ्गः । तस्याम्भास्वरमध्य भागानां सकृदनुपलम्भात् । एकावयवकम्पे च सर्व्वकम्पादिप्रसङ्गश्च वाच्यः । नाप्येकदेशेन सावयवत्वप्रसङ्गात् । एकदेशानाञ्चानवस्थाप्रसङ् गात्

७ सा] ? वशा
९ सा] ? वशा
१४ सा] ? वशा
१६ श्च] ? यश्चे
१७ माण] ? न
१९ रीरा] ? शरीरा
२० सात्] ? शात्
२१ न] ?

। तेपि हि तस्यावयवा इति पाण्यवयववृत्तेष्वपि अन्येन वर्त्तितव्यमित्यादिना तदन्यैकदेशाभाववानेकः कश्चिदवयवी विद्यते । तथा चा ण्वादिसमुदाय एवास्तु कोनुरोधः स्वात्मभूतेष्ववयवेष्विति । न वा क्वचिदप्यसौ वृत्तो न ह्येकदेशाः प्रत्येकमवयवीत्यलं प्रतिष्ठितमिथ्याप्रलापैरिति विरम्य ते । § 79

तदेवमेतत् परमतमलमालोच्यमानतीव्रतरार्क्करश्मिसंपातयोगिहिमशैलशिलाशकलवद्विलयमुपयातीति मन्यमानः प्राह । किमर्थान्तरकल्पन VN$_{\text{ms}}$:3a1 येति । स्यादियत्तराशापरस्य नैवानेकस्यैकार्थक्रियाकारित्वमस्तीत्यत आह । बहवो पि ही VN$_{\text{ms}}$:3a1 त्यादि । किंवत् । चक्षुरादिवत् । 22b/msK, 31/s यथा रूपालोकमनस्कारचक्षुराद यश्चक्षुरादिविज्ञानमेकंर्व कुर्व्वन्ति तथा रूपा[द]योप्युदकधारणविशेषादिकामे- कामर्थक्रियाङ्करिष्यन्तीत्यर्थः । यतश्चैतदेवं तस्मात्तस्यैकार्थक्रियासामर्थ्यस्य ख्यापनाय तत्र रूपादावेकस्य पटादिशब्दस्य नियोगोपि स्यादिति एतद्युक्तं पश्यामः । न केवलमेकार्थक्रियाकारित्वं तेषामित्यपिशब्देनाह । कथं युक्तमिति चेत् । एवं मन्यते केनचित्प्रयोजनेन केचिच्छब्दाः क्वचिन्निवेश्यन्ते तत्र यदनेकमेकत्रोपयुज्यते तदवश्यन्तत्र चोदनीयं । तस्य च पृथक्कथञ्चोदनेऽतिगौरवं स्यात् । न चास्यानन्यसाधार णं रूपं शक्यं चोदयितुं । नाप्यस्यायासस्य किञ्चित्साफल्यं केवलमनेन योग्यास्तत्र तेर्थाश्चोदनीयास्त एकेन वा शब्देन चोद्येरन् बहुभिर्वेति स्वातन्त्र्यमत्र वक्तुः । तदियमेका श्रुतिर्बहुषु वक्तभिप्रायवसात्प्रवर्त्तमाना नोपालम्भमर्हति । न चेयमशक्यप्रवर्त्तमाना इच्छाधीनत्वात् । यदि हि न प्रयोक्तु रिच्छा कथमियमेकत्रापि वर्त्तेत । इच्छायाम्वा क एनां बहुष्वपि प्रतिबद्धुं समर्थः । प्रयोजनाभावादप्रवर्त्तनमित्यपि नाशङ्कनीयं । भिन्नेष्व प्येकस्माच्छब्दात्प्रतीतिरतत्प्रयोजनभेदेन यथा स्यादित्युक्तत्वात् प्रयोजनस्य तस्मात्सूक्तमस्माभिर्युक्तं पश्याम इति । यथा कथञ्चिद्विनैव प्रयोजनेन लोकः शब्दं प्रयुंक्ते । ततो न युक्तमेतदिति चेदाह । न च निःप्रयोजना लोकस्यार्थेषु शब्दयोजने VN$_{\text{ms}}$:3a1 ति । न हि व्यसनमेवैतल्लोकस्य यदयमसङ्गतं यन्न प्रयुञ्जानो वा शब्दान्तः खत्वा सीत् । किन्तर्हि सर्व्व एवास्यारम्भः प्रयोजनसापेक्षः प्रयोजनश्चेतदुक्त मिति मन्यते तत्र प्रयोजनवत्त्वेनेति । यथा रूपगन्धरसादयः सहैकप्रयोजनाः सङ्कलि 23a/msK ता एककार्यकारिण इत्यर्थः । समवहितानामपि कदाचित्कस्यचिदेव कार्ये व्यापारोन्यस्य त्वौदासीन्यमिति स्यादाशङ्कासंभवस्तत आह । पृथग्वेति VN$_{\text{ms}}$:3a2 [।] वा शब्दश्चार्थे । सर्व्वे एव व्यापारवन्त इत्यर्थः । अन्ये त्वन्यथा व्याख्यानयन्ति । व्याख्यानञ्चादो दूषयन्ति । तत्रैतस्मिन् शब्देर र्थे प्रत्यायनक्रमे येर्था रूपादयः सह पृथग्वैकप्रयोजनास्तेषां रूपादीनां संहितानां पृथुबुध्नोदराकारसंस्थापितानामेकं प्रयोजनं । यदुत मधूदकाद्याहरणं पृथग्वा तेषामेव प्रत्येकं स्वाकारज्ञानजननं ॥ एकश्च तत्प्रयोजनमेकत्र दृष्टं यत्तदन्यत्र नास्तीति सहभूतानामपि कदाचिदौदासीन्यदर्शनात्सर्वेषां सव्यापा

१८ सा] ? वशा

रतामादर्शयितुं पृथग्वेत्यभिहितं [।] वा शब्दश्च समुच्चय इत्यन्ये । केव-
32/s लमत्रैकप्रयोजना इत्यभिधाना त्सर्वेषान्तथाभावप्रतीतिरस्त्येवेति व्यर्थम्पृथग्वेति स्यात् न चायं शब्दार्थ इति यत्किञ्चिदेतत् । तैः प्रकरणं न लक्षितं तथा ह्यत्र समुदायशब्दस्यैकवचनप्रवृत्यविरोधः कथयितुमारब्धः । तत्र कः प्रस्तावः पृथग्वेत्यभिधानस्य ॥ § 80

केवलं रूपादिशब्दश्चायञ्जातिशब्दः । तत्र चान्यादृश्येव प्रक्रिया भविष्यति । यत्त्विदमुक्तं केवलमत्रैकप्रयोजना इत्यभिधानात्सर्व्वे षां तथाभावप्रतीतिरस्त्येवेति तदपि न युक्तिसङ्गतं । तथाहि परबलपराजयोद्यतानामेकप्रयोजनत्वेपि न तत्र सर्व्वे व्यापारवन्तो भवन्ति । तद्वदत्रापि भ वेत् । अत एव च स्यादाशङ्कासम्भव इति व्याख्यातं । यदा तु सर्व्वेषामेव सव्यापारताख्याप-
23b/msK नाय पृथग्वेत्येतदुच्यते तदाऽपह्नु रतमुत्सार्यते । तदेतेनैवाशब्दार्थ त्वमपि प्रत्युक्तमिति यत्किञ्चिदेतदेव । § 81

अस्तु वैतदपि व्याख्यानं यदि कथञ्चिद्व्यवस्थापितुं पार्यते । तेषा मेवं विधानामर्थानान्तस्यैकार्थक्रियाकारिणो भावस्य ख्यापना येकोघटादिशब्दो यदि नियुज्येत तदा किं स्यान्न कश्चिद्दोषः स्यात् । गुण एव तु केवलो लभ्यत इत्याह [।] तदर्थक्रियास क्ते रभिन्नाया[ः] ख्यापनाय नियुक्तस्य समुदायश ब्दस्यैकवचनविरोधोपि नास्त्येव VN_{ms}:3a2 । कुतः [।] यस्मात्स हितानां सा शक्तिरेका VN_{ms}:3a3 ऽभिन्ना न प्रत्येकं न तु पृथग्भूतानामित्यर्थः । इति तस्मात्समुदायशब्दे तस्मिन्नेकस्मिन्घटादौ समुदाये वाच्ये एकवचनं घट इति भवतीति शेषः । स्यादिति वा वक्ष्यमाणं क्रियापदं । नन्वयङ्घटादिशब्दो गवादिशब्दवज्जातिशब्दस्तत्कथमेतदु क्तमिति चेत् । सत्यं समुदा[या]न्तरवृत्यपेक्षया जातिशब्दोयं रूपादिसमुदाय्यपेक्षया तु समुदायशब्दोपीत्यभिसन्धेरदोषः । तथाहि त्रय्येवगतिः श ब्दानाङ्केचिज्जातिशब्दा एव । यथा सुखादिशब्दाः सुखादेरनवयवत्वात् । केचित्तु समुदायशब्दा एव यथा विन्ध्यहिमवत्सुमेर्वादि शब्दाः । तज्जातीयस मुदायान्तराभावात् । अपरे पुनर्जातिसमुदायशब्दाः । यथैत एव घटादिशब्दाः समुदायान्तरसमुदाय्यपेक्षयेति । एवन्तावत्समुदायशब्देषु वचनप्रवत्यवि रोध उक्तः । अथ कथञ्जातिशब्देष्वित्याह । जातिशब्देष्वित्यादि VN_{ms}:3a3 । अर्थानां घटावीनां
24a/msK, 33/s प्रत्येकं सहितानाञ्च शक्तेः कारणात् नानाशक्तिरेका च । एतदुक्तं भवति यस्मादेको पि वृक्षो गृहकरणाद्यर्थक्रियानिवर्त्तनेपि योग्यो बह वोपि वृक्षाः । ततश्च तेषाङ्केवलानामपि योग्यत्वादनेका शक्तिः समवहितानामपि योग्यत्वादेका शक्तिरेकप्रत्यवमर्शप्रत्ययनिबन्धनत्वेनैकत्वोपचारात् । यतश्चैव मिति तस्माद्यथाक्रमं नानाशक्तिविवक्षायां सत्यां बहुवचनमनेकत्वाच्छक्तेर्वृक्षा इति भवति । एकशक्तिविवक्षायान्तु एकत्वाच्छब्द एकवचनमुक्त इति स्यात् । त दा यद्येष नियमो भवद्भिरसद्ग्रहग्रहावेशव्याकुलितचेतोभिरिष्यते । बहुष्वेव

११ र] ?
१६ क्रियास] ? श
३० ने] ? निर्वर्त्तने

वाच्येषु बहुवचनं भवति । एकस्मिन्नेव चैकवचनमिति । तदनेन यदाप्येत-
द्द र्शनमाश्रीयते बहुषु [वहु]वचनम्भवति । द्व्येकयोर्द्विवचनैकवचने पाणिनिः
१।४।२२ इति तदापि न कश्चिद्दोष इति दर्शयति । भवतान्तु कथमित्याह ।
अस्माकमि VN$_{ms}$:3a4 त्यादि । संकेतबसाच्छब्दानाम्बहुवचनान्तानान्दाराः
सिकताः पादाः । गुरव इत्यादिनाऽसत्यपि बहुत्वेऽभिधेयस्य वृत्तिः ॥ § 82

तथासत्यप्यनेकत्वेषण्णगरी षद्वलीवनमित्यादिनैकवचनान्तानाम्वृत्तिरित्य-
नभिनिवेश एव । को हि नाम सचेतनः पुरुषाभिप्रायमात्राधीनवृत्तिषु श-
ब्देष्वभिनिवेशं कर्त्तुमु त्सहत इति भावः । परपक्षं पूर्वपक्षयति । नानेको
रूपादिरेकशब्दोत्थापने समर्थ इति चे VN$_{ms}$:3a5 दिति । नहि अनेक-
स्यैकेन सम्बन्धो युज्यत इति । किमि VN$_{ms}$:3a5 त्यादिना परि हारः
। पुरुषाणाम्वृत्तिरिच्छा तत्रानपेक्षाः सन्तोऽर्थाः किं स्वयं शब्दानुत्थापयन्ति ।
आहोस्वित्पुरुषैस्ते व्यवहारार्थमर्थेषु यथा कथञ्चिन्नियुज्यन्त इति विकल्पद्व यं
। तत्र पुरुषैरेव ते यथेष्टं नियुज्यन्तेऽन्यथाऽतीता जातयोर्दर्शनान्तरभेदिष्वन्यत्र
वा नियोजनन्न भ वेदिति भावः । ततश्च स्वयं VN$_{ms}$:3a6 पुरुषेच्छाऽन- 24b/msK
पेक्षाणामर्थानां शब्दोत्थापने सति भावस्य शक्तिरसक्ति र्वा चिन्त्येत नामेक
इत्यादिना । अस्त्येव तर्हि स्वयमुत्थापनमिति चेदा ह । न च तद्युक्तं
VN$_{ms}$:3a6 । अनन्तरोक्तात् कारणत्रयादित्यभिप्रायः । तस्मात्पुरुषैस्तेषां
शब्दानां नियोगोर्थेषु विनाप्येकत्वादिना ते पुरुषाः यथेष्टमेकत्रापि वहुवच-
नान्तम नेकत्राप्येकवचनान्तं शब्दं नियुञ्जीरन्निति कस्तत्र तेषु शब्देषूपालम्भो
नानेको रूपादिरेकशब्दोत्थापने समर्थ इत्ययं नैव कश्चित् केवलम- 34/s
तिबहुलव्यामोहविजृम्भितमिति मन्यते । स्यान्मतङ्किमित्येकं शब्दमनेकत्र
नियुञ्जत इत्याह । निमितञ्च नियोगस्योक्तमेवेति VN$_{ms}$:3a6 तत्सामर्थ्य-
ख्यापनाय तत्रैक शब्दनियोगोऽपि स्यादित्यत्रावसरे । उपचयमाह । अपि
चे VN$_{ms}$:3a7 त्यादिना । आश्रयाभिमतेनेत्यवयविद्रव्येण । तेषान्तत्र सम-
वायसम्बन्धेन सम्बन्धात् । क थं सम्बन्धो नैवानेकस्य एकेन सह सम्बन्धो
विरोधाभ्युपगमात् । अन्यथैकेन शब्देनापि सह प्राप्नोतीत्यभिसन्धिः । प-
रः प्राह । न चे VN$_{ms}$:3a7 दयमेकेन स ह सम्बन्धविरोधात् कारणा
देकशब्दं रूपादिषु नेच्छामः । किन्त्वभिन्नानामविशिष्टानां रूपादीनांघटकम्ब-
लपर्यङ्कादिषु । नानाविधा येयमर्थक्रिया जलधा रणप्रावरणादिस्तस्या विरोधः
। तथा च तत्सामर्थ्यख्यापनाय शब्दस्य विरोधात् । तेषाञ्चाभेदस्तदाश्रयद्र-
व्यभेदाभावात् । एतदेव स्फुटयति । ते रूपादय ए कस्वभावाः सन्तः 25a/msK
समुदायान्तरे कम्वलादौ येयमसम्भाविनी उदक धारण विशेषाद्यर्थक्रिया
तामेव कुर्युस्तेन कारणेन तस्या अर्थक्रियायाः प्रकाशना येमामेतेऽर्थ-
क्रियां न ते तदसम्भाविनीमर्थक्रियाङ्कुर्वन्ति [।] यथा त एव कम्बलग ता

४ सा] ? बशा
६ द्दृ] ?
१५ क्ति] ? शक्ति

रूपादयः सजातीयेभ्यः । तथा च घटगता अपि रूपादयः कम्बलगतेभ्यो
रूपादिभ्योऽविशिष्टस्वभावा इति व्यापकानुपलब्धिः । एवमन्यत्रापि योज्य-
मितीयं पूर्व्वपक्षरचना । अत्रोत्तरमाह । भवतु नामेत्यादिना VN$_{ms}$:3a9
। तदनेन हेतोरसिद्धिमुद्भावयति । अयमत्रार्थो नहि रूपादीनाङ् कम्बला
दिष्वभेदोस्ति । परस्पररूपविविक्तानामेव प्रत्यक्षप्रमाणपरिच्छेद्यत्वात् । एवञ्च
सतीदं प्रत्यक्षं किमेनाम्वाञ्छामुपेक्षते । किम्प्रश्ने क्षेपे वा नैव क्षन्तुमर्हत्य-
पाकरोतीति । किंञ्चानिष्टञ्चेद VN$_{ms}$:3a10 मस्माभिर्घटकम्बलादिष्वभिन्ना
35/s रूपादय इति कुतो रूपादीनाम्प्रतिसमुदायत्वे हेतुबलादनपेक्षितद्रव्याणां
स्वभेदाभ्युपगमात् । तदनेनाभ्युपगमद्वारेणाप्यसिद्धताञ्चोदयति । पूर्व्वेण प्रत्य-
क्षद्वारेणेति विशेषः । पुनरपीर्ष्यालुः परः प्रा ह । यद्यन्य एव रूपादिभ्यो
घटः स्यात् किं स्यादिति [।] न कश्चिद्दोषः स्यादित्याकूतं । न वयं मात्स-
र्यात्तं नेच्छामः । किन्तु भवत्येतावत्त्वत्र वक्तव्यस्तीत्याह । तस्यावय विनः
प्रत्यक्षस्य सतः VN$_{ms}$:3a10 चक्षुः स्पर्शनेन्द्रियग्राह्यतयाभ्युपगतत्वात् ।
अरूपादिरूपस्य VN$_{ms}$:3a10 रूपगन्धादिस्वभावरहितस्येत्यर्थः । गुणद्रव्य-
25b/msK योर्भेदाभ्युपगमात् ॥ तद्विवेकेन रूपादिविवेकेन बुद्धौ चक्षुः स्प[र्श]नेन्द्रिय-
जायां प्रतिभासने किमावरणन्न कश्चित्प्रतिबन्ध इत्यर्थः । न च कश्चिद-
त्यादरेणाप्रतिहतकरणोपि नि रूपयन्नीलमधुरसुरभिकर्क्कशादिव्यतिरेकेण त-
द्रूपम्विविक्तरूपं घटादिद्रव्यमुपलब्धुमीश इति मन्यते । अविद्धकर्णस्त्वाह
[।] रूपाद्यग्रहेपि द्रव्यग्र हणमस्त्येव यतो मन्दमन्दप्रकाशेऽनुपलभ्यमान-
रूपादिकं द्रव्यमुपलभ्यतेऽनिश्चितरूपं गौरश्वो वेति । ननु च तत्रापि संस्थान-
मात्रमुपलभ्यते । सत्यमुप लभ्यते न तु तद्रूपाद्यात्मकं । रूपाद्यात्मकत्वे वा
नीलपीतादिविशेषग्रहणप्रसङ्गः । तथायस्कञ्चुकान्तर्गते पुरुषे पुरुषरूपाद्यग्रहे
पि पुरुषप्रत्ययो दृष्टः । रात्रौ च वलाकाव्यामुक्त रूपाद्यग्रहेपि पक्षिप्रत्ययो
दृष्टः । तथानीलाद्युपधानभेदानुविधायिनः स्फटिकम णेः स्फटिकरूपाद्यग्र-
हेपि स्फटिकप्रत्ययः । तथा कषायरूपेण पटरूपाभिभवे पटरूपाद्यग्रहेऽपि
पटप्रत्ययो दृष्ट इति । तदेतत्स र्व्वमस्यानल्पकालोपचितकुदर्शनाभ्यासोप-
जातबुद्धिमान्द्यविजृम्भितमेव प्रकटयति वचः । तथाहि यत्तावदिदमुक्तं म-
न्दमन्दालोके रात्रौ च नीलाद्युपधान सद्भावे च तद्रूपाद्यग्रहेपि द्रव्यमुपलभ्यत
इति तत्र वक्तव्यं कीदृशं तत्र द्रव्यमुपलभ्यत इति । दृश्यत एव तद्यादृशमुप-
लभ्यत इति चेत् । ननु श्यामरूपं मन्दमन्दालोके रात्रौ च तत्र तदपुलभ्यते
उपधानं रूपञ्च । न च तद्रूपन्तत् । ताद्रूप्येऽनन्तरोदितपक्षक्षयप्रसङ्गात् ।
26a/msK तत्समीपपार्श्ववर्त्तिभिश्च तथानुप लम्भात् । न चाप्यण्याकारेण बोधेन
वस्तुनोऽवगतिः यस्य कस्य- चिज्ज्ञानस्य सर्व्ववस्तुपरिच्छेदकत्वप्रसङ्गात् । त-
स्माद् भ्रान्तमेतत् ज्ञानम्भ्रान्तिवीजात्स्वोपादानादनादि कालीनान्निर्विषयमेव
तथा प्रतिभासि द्विचन्द्रादिप्रत्ययवदुपजायते [।] निर्विषयत्वेपि प्रतिनियत-

३२ ण्या] ? न्या

देशकालभावि भवति । स्वोपादानवासनाप्रबोधकबाह्या धिपतिप्रत्ययापेक्षनात् । द्विचन्द्रादिज्ञानवदेव । भ्रान्तत्वेप्यर्थाविषम्वादो विशिष्टाधिपतिप्रत्ययसद्भावात् । मणि प्रभायां मणिभ्रान्तिरिव । न चार्थाविसम्वाद नादेवास्य सविषयत्वं 36/s युक्तमनु मानेन व्यभिचारात् । मणिभ्रान्त्या च । तदेव द्रव्यन्तथा गृहणाति ततोन्यस्य निर्विषयत्वमिति चेत् । ननु न तद् द्रव्यन्त द्रूपन्न वान्याकारानुस्यूतः प्रत्ययोऽन्यस्य परिच्छेदक इत्युक्तं । एवञ्च सति सद्विषयत्वे सत्यपेक्षेपि सद्विषयत्वमस्त्येव । तथा हि समाप्येतच्छक्यम्वक्तुं त एव नीलादयस्तथा प्रतिभासन्त इति । असति भ्रांतिसन्देहकारणे सालोकावस्थायां योग्यदेशावस्थाने च निरुपधानावस्थायाञ्च नोपलभ्यते [।] तत् द्रव्यमनात्मरूपप्रतिभासि विवेकेनान्यदा तु सति भ्रान्तिसन्देहकारणे निशान्धकारावच्छादितलोचनावस्थायां दूरदेशावस्थाने सोपधानावस्थायाञ्च तद न्याकारविवेकेन प्रतिभासत इति कोन्यो भौतिकाद्वक्तुमर्हति । अयस्कञ्चुकान्तर्गते पुरुषप्रत्ययो न प्रत्यक्षः । किन्तर्हि [।] लैगिकः । तथा हि पुरुषश रीरावयवसमाश्रयबलोद्भूतविशिष्टसंस्थानावस्थितकञ्चुकदर्शनात्कार्यलिंगज्ञानात् सम्बन्धस्मरणापेक्षिणः कारणभूते तथाविधे पुंसि पुरुषोयमित्यनन्तर मेव प्रत्ययः 26b/msK समुद्भूतिमासादयति । अत एव चास्पष्टाकारा सा प्रतीतिः कश्चायमिति संशयश्च भवति । तथाविधसंस्थानस्य च कञ्चुकस्योत्पत्तेः पुरुषरूपादय ए व हेतवो भवन्ति नत्वन्यदवयवि द्रव्यं । तस्यासिद्धेरसिद्धस्य च कारणत्वाभ्युपगमायोगात् । रूपादिभिस्तु प्रत्यक्षानुपलम्भाभ्याङ्कार्यकारणभावसिद्धेः । तेषा मेव केवलानान्तथा सन्निविष्टानामुपलम्भात् । पटे तु कषायमञ्जिष्ठादिसम्पर्कादर्थान्तरमेव केवलन्तत्तथा जातमीक्ष्यते । नतु नानारूपयोर्द्रव्ययोः सं सर्गादविभागात् तथोपलम्भः । पुनस्तद्द्रव्यसंस्थानस्थितिकारणविच्छेदात्तन्निवृत्तिः । तदुपादानकारणापेक्षिणश्च जलपावकादेरपरोत्पत्तिरिति । एतेनायोगोलकतद्रूपग्रहणेपि तत्प्रत्ययो दृष्ट इत्येतदपि प्रतिस्फुटं । तदेवं द्रव्यस्य प्रत्यक्षत्वासिद्धेर्यदुक्तङ्गवाश्वमहिषवराहमातङ्गा विमत्यधिकरणभावापन्ना रूपादिव्यतिरिक्ता इत्येव घोषणा । ऐन्द्रि[यक]त्वे सति समस्तरूपादिग्राहकवाक्येन्द्रियानवच्छेद्यत्वात्प्रीत्यादिवदिति त दपहस्तितं । प्रयोगाः पुनः । यद् दृश्यं सत्सद्व्यतिरेकेण नोपलभ्यते तत्ततो भिन्नन्नाभ्युपेयन्नास्तीति वाभ्युपगन्तव्यं । यथा नरशिरसि विषाणन्नोपलभ्यते च दृश्यं सन्नीलादिषु तद्व्यतिरेकेण सामान्यविशेषसंयोगविभागपरत्वापरत्वादिकमिति स्वभावानुपलब्धिः । नास्य सिद्धिः । दृश्यत्वेन स्वयमभ्युपगमात् । तथा रूपाद्यर्थपञ्चकव्यतिरिक्तत्वेनोपगतं द्रव्यन्नचक्षुःप्रत्ययावसेयमुपलब्धिलक्षणप्राप्तत्वेनोपगतत्वे सति नीलादिव- 37/s, स्तुरूपविरहात् । शब्द गन्धरसवत् । न च तस्मादव्यतिरिक्त एवायं 27a/msK तत्र चायन्दोष इत्यागूर्याह । सोतिशयो व्यवच्छेदलक्षणस्तस्यातिशयवतोऽवस्थातुरात्मभूतोऽनन्वय इत्येकान्तेन निवर्त्तमानः । व्या पकत्वाभावात्प्रव-

१ ना] ? णा

२ र्थाविष] ? स

र्तमानोऽसन्नेव कथन्न स्वभावनानात्वं सुखदुःखधीरिवाकर्षति । अन्वाकर्ष-
त्येवेत्यर्थः ।प्रयोगोपुनर्यो यस्यात्मभूतः स तन्निवृ त्तावेकान्तेन निवर्त्तते प्रवृत्तौ
चासन्नेव प्रवर्त्तते यथा तस्यैवातिशयस्यात्मा । आत्मभूतश्चातिशयस्यातिशय-
वानिति स्वभावहेतुः । ततश्च तयोरवस्थ योरवस्थातुर्न्नानात्वम्परस्परविरोधिप-
र्य्याध्यासितत्वात् सुखदुःखवदितिस्वभावहेतुरेव । न वा सावतिशयोऽनन्वयः
प्रवर्त्तते निव र्त्तते वाऽतः पुर्वस्मिन् प्रमाणे साध्यविकलत्वन्दृष्टान्तस्य ।
उत्तरत्र त्वसिद्धिर्हेतोरिति चेदाह । सान्वयत्वे चातिशयस्य निवृत्तिप्रवृत्योरं
गीक्रियमाणे का कस्य निवृत्तिः प्रवृत्तिर्वेति VN$_{ms}$:4b4 । नैव काचित्
कस्यचिन्निवृत्तिः प्रवृत्तिर्वा । सर्वस्य सर्वदा सत्वात् । तथा च सर्वं सर्वत्र स-
मुपयु ज्येतेत्यादिना पुरोनुक्रान्तो दोषोनुपयुज्यत इत्यभिप्रायः । उपचयमाह
। यदि च कस्यचित् स्वभावस्यातिशयाख्यस्य प्रवृत्तिर्निवृत्तिर्वेति स्वयमभ्य-
नुज्ञा यते त्वया । एकातिशयनिवृत्याऽपरातिशयोत्पत्या व्यवहारभेदोपग-
मादित्यभिधानात् तदेतदेव परस्तथागतवचोऽभ्यासोपजातावदातमति र्ब्रुवाणः
। नानुमन्यते भद्रमुखेणभवेदेवं यदि यथामया प्रवृत्तिनिवृत्ती अभ्यनुज्ञायेते
27b/msK तथा तेनापि । यावतास्य निरन्वयोपजननविनाशोपगमसम त्वाद् द्रव्य-
स्यालोकनीलादि- वत्तद्यतिरेकेणाप्रतिभासनमभिन्नेंद्रियग्राह्यत्वाद्वा तद्वदेवेत्य-
तआह । प्रतिभासमानाश्च विवेकेने VN$_{ms}$:3b1 दं नीलमिदं सुरभि मधुरं
कर्कशमिद मिति चेति प्रत्यक्षा अर्था दृश्यन्तेऽपृथग्देशत्वेपि सति के ते
रूपादयः । लोकप्रसिद्धा चेदमुक्तन्न तु तेषामभिन्नदेशत्वमस्ति । सप्रतिघा दश
रूपिण अभिधर्मकोशे १।२९ इति वचनात् । त था ऽभिन्नेन्द्रिय ग्राहयत्वेपि
वातातपस्पर्शादय VN$_{ms}$:3ba इति यथाक्रमं चैतदुत्तरं । अनेनैकान्तिकत्वं
हेतोरुद्भावयति । उपेत्य च धर्मिसम्बन्धं अभिन्नेन्द्रियग्राह्यत्वस्य व्यभि चार
उक्तो नत्वसावस्यास्त्येकदेशासिद्धेः । कथं । यतो न सुरभिमधुरादयो द्रव्य-
ग्राहकेन्द्रियग्राह्याः । सार्वेन्द्रियत्वप्रसङ्गाद् द्रव्यस्य । आलोकनीलादीनां त्वभेद
एव यतः प्रदीपादिसन्निधानात् प्रकाशरूपा एव तथाविधस्वभावाध्यासितव-
पुषस्ते समुद्भवन्ति न तु तेषां भेदोऽस्तीति साधनविकल्पताऽपि दृ ष्टान्तस्येति
मन्यते । तस्मादस्य प्रत्यक्षत्वमभ्युपगच्छद्भिर्न बहिरवश्यं रूपादिविवेकेन प्रति
38/s भासनमभ्युपगन्तव्यमन्यथा प्रत्यक्षत्वासिद्धेः । कुतो य स्मादिदमेवेत्यादि
सुबोधं । अयम्पुनर्घटादिर्भवद्भीरूपादिव्यतिरेकेणाभ्युपगतः । को सावमूल्य-
दानक्रयीयः । तदेतेन नायमीदृशो लोकव्यवहारपद्धति मवतरतीत्याचष्टे ।
स स्वरूपञ्च नोत्कर्षेण दर्शयत्यप्रतिभासमानत्वाप्रत्यक्षताञ्च स्वीकर्त्तुमिच्छति
दार्शनं स्पार्शनञ्च द्रव्यमिति सिद्धान्ते पाठात् । इत्येतदात्मनि रन्तरप्रेमाणः
सुहृदः प्रत्येष्यन्तीत्त्यध्याहर्त्तव्यं । मूल्यदानक्रया विद्यन्तेस्येति मूल्यदानक्रयी
28a/msK न तथेति वृत्तिः । अथवा क्रेतुं शीलं यस्यासौ क्रयी मूल्यदानेन क्र
यी न तथा । कथमेतदित्याह । यः प्रत्यक्षता VN$_{ms}$:3b2 मित्यादि ।
मूल्यदानश्चात्र स्वरूपार्पणमित्युपहसति । § 83

२ योगो] ? प्रयोगः
१४ मुखेण] ? मुखेन

ननु चैको घट इति प्रत्ययव्यपदेशसद्भावाद्रूपादिवत् तदस्त्येव । तत्कथमस्यासत्वमिति चेदाह बुद्धिशब्दादयोपि व्याख्या ता न च सर्व्वे इत्यादिना । आदिशब्देन तद्भेदाभेदोपादानं । यदि तैर्बुद्धिव्यपदेशादिभिस्तस्य साधनसिद्धिरिष्यते । स्यादेतत्प्रतिभासमानमपि द्रव्यं लवणरसाभिभवे खण्डरसवन्नोपलक्ष्यते । ततस्तत्प्रसाधनाय लिङ्गमुच्यत इत्यत आह । न च प्रत्यक्षस्यार्थस्य रूपानुप लक्षणं VN_{ms}:3b3 युक्तं । द्रव्यान्तरेणानभिभवे सति । अभिभवे तु युक्तमेव । यथा खण्डादिरसस्य । न चात्र केनचिदभिभवोस्ति । नीलादिभिरस्तीति चेति । न महत्यने कद्रव्यवत्ताद्रूपाद्योपलब्धिः । तथा रूपसंस्काराभावाद्वा वानुपलब्धिरित्युक्तं । तस्य चानुपलक्षणे तेषामप्यनु[प]लक्षणप्रसङ्गः । ततश्च स र्व्वपदार्थानामनुपलक्षणाल्लोकव्यवहारोच्छेद एव भवेदिति मन्यते । येनानुपलक्षणेन तस्यावयविनः साधनाय लिङ्गमुच्यते । तद्भावसाध नश्च लिङ्गमभ्युपगम्येत तद्भाष्यते न तु तद्गमकं लिङ्गं किञ्चिदप्यस्ति । यथोक्तम्प्राक् । तत्प्रतिपादकप्रमाणाभावेपि तदस्त्येवेति चेदाह [।] अप्रत्यक्षत्वेप्यप्रमाण स्य सत्वोपगमोऽयुक्त VN_{ms}:3b3 इति । अप्रमाणस्येत्यनेन प्रत्यक्षव्यतिरिक्ततत्प्रसाधकप्रमाणाभावमाह । यस्य सद्भावसाधकं प्रमाणं नास्ति न तदस्ती त्यङ्गीकर्त्त व्यं । यथानभस्तले कमलं नास्ति चावयविनोऽस्तित्वसाधकं प्रमाणमिति सद्व्यवहारप्रतिषेधफलामनुपलब्धिं मन्यते । 28b/msK, 39/s एवं विस्तरेणैकद्रव्याभावं प्र तिपाद्य प्रकृतमुप संहरति । तदि त्यादिना । मूलप्रकरणमपि निगमयति । एवन्ताव दि VN_{ms}:3b3 त्यादिना । अत एव न तेषाम्बुद्ध्यादीनाम्विपर्ययात्तेषां सत्तादीनाम्वि पर्ययोऽभावः । योहि यस्य भावमेव न साधयति स कथमिव वर्त्तमानस्तदभावं साधयतीत्याकूतं । यदि नाम बुद्ध्यादयः सत्ताम्भेदाभेदौ वा न साधयन्त्यर्थक्रिया तु तान्साधयिष्यतीत्यत आह । अर्थक्रियातस्तु सत्ताव्यवहारः स्यादि VN_{ms}:3b4 ति तल्लक्षणत्वात् सत्वस्येति भावः । अनेनावयोरत्र साम्यमेवेति दर्शयति । अन्य त्र तु विवाद इत्याह । न सत्ताभेदाभेदव्यवहार VN_{ms}:3b4 इति । कुत एकस्याप्यनेकार्थक्रियादर्शनात् । तत्र नैकप्रत्ययजनितं किञ्चिदस्ति तत्कथ मेवमुच्यते । सत्यमेतदेकं तु बहवीषु सामग्रीषु वर्त्तत इत्यनेकार्थकृदित्युच्यते । यदाह ॥ § 84

...11 न किश्चदेकमेकस्मात् सामग्र्या सर्व्वसम्भवः ।
एकंस्यादपि सामग्र्योरित्युक्तं तदनेककृदिति ॥ [११] § 86

किम्वत् । यथा प्रदीपस्य विज्ञानस्य वर्त्तिविकारस्य ज्वालान्तरस्य च स्वपरसन्तानसम्बन्धिक्षणान्तरस्यो त्पादनानि तदेवं सत्ताभेदव्यवहाराभावे कारणं । कथमेकमनेकं कार्यमुत्पादयतीति चेति । एकस्यैव ईदृशस्यानेककार्यजननात्तुर्यातिशयक्रोडी कृतं रूपवतः स्वहेतुभ्यः संजातत्वादिति भावो न्यायतत्वविदः । तथानेकस्यापि चक्षुरादेरेकविज्ञानक्रियादर्शनात् । अभेदव्यवहाराभावे कार णमेतत् । कणभु ग्मतविपर्यासितधियस्त्वाहुः । न ब्रूम

इत्यादि । किन्तर्ह्यदृष्टार्थ क्रियाभेदेन सत्ताभेद इति वर्त्तते । तदेव व्यनक्ति
29a/msK । यार्थक्रिया VN_{ms}:3b6 मध्वाद्या हरणादिलक्षणा तस्मिन्घटादावदृष्टा
सती पुनर्दृश्यते । अन्यत्र घटादौ । सैवम्विधा सत्ताभेदं साधयति ।
तेषां घटादीनामनेन व्याप्तिः कथिता । किमिव । यथा पटेऽदृष्टा स-
त्युदकधारणाद्यर्थक्रिया घटे दृश्यमाना VN_{ms}:3b7 सत्ताभेदं साधयतीति
प्रकृतेनाभिसम्बन्धः । दृष्टान्तकथनं चैतत् । अदृष्टा च तन्तुषु प्रावरण-
40/s द्य र्थ क्रिया पटे दृश्यत इति VN_{ms}:3b7 पक्षधर्मोपदर्शनमिति । त-
स्मात् सत्ताभेदस्तन्तुपटयोः सिद्ध इति शेषः । तदनेन साधनफलं स-
ङ्कीर्तितं । स्वभावहेतुश्चायं यस्मात्तददृष्टार्थक्रियाकरणमात्रानुबन्धी सत्ताभेद
इति । तदेतेन तन्तुभ्यः पटस्यान्यत्वं साधयन्नर्थान्तरभूतावयविसिद्धिं मन्य-
ते ॥ आचार्यस्त् वाह ॥ सिध्यत्येवं तन्तुपटयोः सत्ताभेद इति प्रकृतं ॥
वांछितार्थसिद्धिस्तु भवतो नैवास्तीत्यभिप्रायवा नाह । अर्थान्तरन्तथाप्यवय-
वी न सिध्यतीति VN_{ms}:3b7 कुत एतद्यतो यथाप्रत्ययमस्यां संस्कार-
संततौ स्वभावभेदोत्पत्तेः कारणादर्थक्रियाभेदः प्रावरणादिलक्षणो भवति ।
एतदुक्तं भवति पिण्डीकृतेभ्यस्तन्तुभ्य उपादानकारणभूतेभ्यः कुविन्दादिस-
हकारिप्रत्ययसन्निधानाच्च विशिष्टसन्निवेशावच्छिन्ना एव तन्तवो जायं ते ।
ये प्रावरणाद्यर्थक्रिया[या]मुपयुज्यन्ते । तेभ्यश्च पूर्व्वेभ्यः पटस्यान्यत्वमिष्ट-
मेवास्माभिरपि । न तु विशिष्टसंस्थानावच्छिन्नेभ्य इति त्यज्यतामियम-
29b/msK र्थान्तरा वयविसिद्धिप्रत्याशेति । तदेतेनैवा विद्धकर्ण्णो क्तं पूर्व्वोत्तरकाल-
भावित्वादित्यादि तत्साधनमपहस्तितं वेदितव्यं । अस्माभिस्तु विस्तरेण प्राक्
प्रयुक्तमेवेति । न पुनर्योज्यते । किम्वत् प्रत्ययवसात्स्वभावविशेषोत्पत्ते
रर्थक्रियाभेद VN_{ms}:3b7 इत्याह । अरणिनिर्मथना VN_{ms}:3b7 दित्यादि
सुज्ञानं [।] दृष्टान्तं प्रदर्श्यदार्ष्टान्तिकमाह । तथा यथे VN_{ms}:3b8 त्यादि ।
अनेनैव यथाप्रत्ययस्वभावभेदेनयदेके चोदयन्ति । ननु च तन्तवः पट इति
बुद्धिव्यपदेशभेदात् । कथमस्यान्यत्वं नास्तीति तत्प्रतिक्षिप्तमित्याकूतवानाह ।
एतेन बुद्धिव्यपदेशभेदौ व्याख्याताविति VN_{ms}:3b8 । तत्रैवं स्थिते यदुक्तं
प्राक्तयाऽर्थक्रियातः सद्व्यवहारसिद्धिर्भवति विपर्ययाच्चार्थक्रिया निवृत्ते विपर्य-
योऽसद्व्यवहार इति सत्यमेतत् । एतावत्तुब्रूमः । स एव विपर्ययोऽर्थक्रियाया
अनुपलब्धिलक्षणप्राप्तेषु न सिध्यति । तथाहि यद्ययमुपलब्धिलक्षणप्राप्तानुप
लम्भो नेष्यते तदास्यार्थक्रियासामर्थ्यं नास्तीति कथमधिगतं भवता [।] न
41/s चानुपलब्धिमात्रादिति युक्तम्वक्तुँ । तस्य व्यभिचारात् । तत्र पुनरनिच्छ-
तो प्यायातं तव । यस्येदमर्थक्रियासामर्थ्यमुपलब्धिलक्षणप्राप्तं सन्नोपलभ्यते
सोऽसद्व्यवहारविषय इति । कुतः सामर्थ्यलक्षणत्वात् सत्वस्य । भवत्वेवङ्को
दोष इति चेदाह । तथापि कोतिशयः VN_{ms}:3b10 पूर्व्वकादस्मादुपव-
र्णितादुपलभ्यानुपलम्भात् । अस्य सामर्थ्यानुपलम्भस्य भवत्परिकल्पितस्य

२१ सात्] ? वशात्

। स्यात् म तं स स्वभावस्यैवानुपलम्भोऽयं तु पुनः सामर्थ्यस्येत्यत आह । न हीVN$_{ms}$:3b10 त्यादि । तथा च तस्य सामर्थ्यस्य योनुपलम्भः स स्वभावस्यैव इति तस्मात् पूर्वकैव स्वभावा नुपलब्धिरेवेयं सामर्थ्यानुपलब्धिः । तस्माद् दृश्यानुपलब्धिरेवासद्व्यवहारसाधनेति स्थितमेतत् । यस्माच्चैवन्तस्मादनेन वादिना क्वचिच्छशविषाणादावसद्व्य वहारमभ्युपगच्छ- 30a/msK ता दृश्यानुपलम्भादभ्युपगन्तव्यो- ऽन्यस्य तत्प्रतिपत्त्युपायस्याभावादिति भावः । ततः सोनुपलम्भोऽन्यत्रापि सामान्यविशेषसंयोगावय विद्रव्यादौ तथाविधे उपलब्धिलक्षणप्राप्ते अविशेष इति सोपि सामान्यविशेषादिस्तथास्वसद्व्यवहारविषयत्वेनास्तीत्यर्थः । स्यादेतन्नैव सामान्यविशे षादिस्तथाविधोनुपलब्धोस्य सद्व्यवहारविषय इत्यत आह । न वा क्वचिच्छशविषाणादावसद्व्यवहारो ऽभ्युपगन्तव्यः । कुतो विशेषाभावादनुप लम्भस्य । अयमत्रार्थो द्वयोरनुपलम्भे तन्निमित्ते तुल्येपि यद्यसद्व्यवहारः सामान्यादौ नोत्पद्यते । अन्यत्रापि तर्हि स नाभ्युपेयो विशेषहेत्वभावादि त्यनेन च पूर्वोक्तमेव कस्य चिदसतोभ्युपगमे तल्लक्षणाविशेषादिति स्मारयति । तस्मा त्सर्व्व एवंविधो दृश्यानुपलम्भोऽसद्व्यवहारस्य वि षय VN$_{ms}$:4a2 इति व्याप्तिः । अनुपलब्धौ सिद्धेतिशेषः ॥ ० ॥ § 87

42/s

कापिला स्त्वाहुः । सर्व्वमेव सर्व्वात्मकं अन्यथा यदि मृत्पिण्डदुग्धबीजादिषु घटदध्यङ्कुराद यो न विद्यन्त एव शक्त्यात्मना तदा कथं पुनस्तेभ्यस्तेषामुत्पत्तिः । नहि शशविषाणमविद्यमानन्तत्रोदेति । एवञ्च सति दृश्यः सन्ननुपलब्धोपि कश्चिद् घटा दिः क्वचिद्देशादौ कथञ्चिच्च संस्थानविशेषादिना नैवाभावव्यवहारविषयो भवतीति तेषां मतमासङ्कते । नैवे VN$_{ms}$:4a3 त्यादिना । § 88

...12 एतत् साङ्ख्यपशोः कोन्यः सलज्जो वक्तुमीहते ।
अदृष्टपूर्व्वमस्तीति तृणाग्रे करिणां शतम् [। १२]
प्रमाणवार्त्तिके २ परि० § 90

इत्यभिप्रायवानाह । सर्व्वस्ये VN$_{ms}$:4a3 त्यादि । यद्यदृष्टमपि तत्रास्ति तदासर्व्व एव क्षीरादयः सर्व्वे घटादिरूपै रनुमतत्वात् तत्साध्याम- 30b/msK र्थक्रियाङ्कुर्युरित्यर्थः । किञ्चेदमपरं न स्यादिदन्दध्यादिकार्यमतः क्षीरादेर्भवति नान्यतो जलादेः । यदि वा नातः क्षीरादेरिदं मध्वादि कं तथेदङ्कुङ्कुमादिकमिह कस्मीरा दिदेशे नेदमिह मालवकादि देशे यदि वा नेदं चन्दनादिकमिह । तथेदङ्कुन्दादिकमिदानीं शिशिरसमये नत्विदमि दानीन्निदाघकाले । अथवा नेदं कमलादिकमिदानीन्तथेदं खण्डादिकमेवं माधुर्यादिगुणविशिष्टं । नेदमेवङ्क-

२१ ङ्क] ? शङ्क
२९ स्मीरा] ? कश्मीरा

टुकादिरूपं । यद्वा नेदं निम्वादिकमे वमिति व्याख्यातव्यं [।] किङ्कारणमेव- मेतदित्यत आह । कस्यचिदपी VN_{ms}:4a4 त्यादि । इदमेवम्बिधमधुनास्य रूपन्नास्तीति योयम्विवेकोऽभावस्त स्य हेतोरभावात् । सर्व्वस्य सर्व्वरूपाणां सर्व्वदानुवृत्तेरिति मतिः । नन्विदमनन्तरमेव वस्तुतोऽभिहितमेव सर्व्वं सर्व्वत्र सर्व्वदा समुप युज्येतेत्यत्र तत्किमिदं पुनश्चर्वितचर्व्वणमास्थीयत इति चेत् । सत्यं पूर्वं कारणगतो व्यापारः कथितोऽधुना तु कार्यगत इति विशेषा ददोषः । इदञ्चान्यतरमुखेणदूषणवचनं शिष्यव्युत्पादनाय । ततश्च भेदाभावान्न विद्येते अन्वयव्यतिरेकौ यस्मिं निति विग्रहः । इदमत्रास्तीत्या द्यन्वयो नास्तीति व्यतिरेकः । परः प्राह [।] अवस्थेत्या दिना । एतदुक्तम्भवति । यत्र यद् 43/s व्यक्तन्तत्तत्रास्तीत्यादि व्यवहियते यत्र तु यन्नैव व्यक्तन्तत्र तन्नास्तीत्यतो ऽयमदोष इति । नन्वि VN_{ms}:4a5 त्याद्याचार्यः । ‘त एवावस्थानिवृत्तिप्र- वृत्तिभेदा न सम्भवन्ति तावकीने दर्शने । कुतः सर्व्वविषयस्यासद्व्यवहार- 31a/msK स्याभावात् । अथापि क्वचि द्विषयेऽसदव्यवहार इष्यते तदा तस्य कारणं भवद्भिर्वक्तव्यमित्याह । क्व वचिदि VN_{ms}:4a5 त्यादि । यदि वावश्यमनेन क्वचित्परिकल्पिते व्यतिरिक्तावयव्यादावसद्व्यवहारों गीकर्त्तव्यः । स चास्य न युक्तोहेत्वभावादित्याह । क्वचिदि त्यादि । कुतः । यस्मान्नहि अनुपलम्भादन्यो व्यवच्छेदस्याभावस्य हेतुरस्ति प्रसाधक इति शेषः । स च त्वया नेष्टक इति भावः । कस्मादेवं यतो विधिना स्वभावविरुद्धोपलम्भादौ प्रतिषेधेन व्यापकानुपलम्भादौ व्यवच्छेदे साध्येऽनुपलम्भस्यैव सर्व्वदा साधकत्वात् । अथा हमप्यस्मादेवानुपलम्भाद् व्यवच्छेदं साधयामीति ब्रूषे तदत्रापि ब्रूम इत्याह । सोनुपलम्भो यत्रैवास्ति स सर्व्वो ऽसद्व्यवहारविषय VN_{ms}:4a6 इति वक्तव्यं ॥ किमिति विशेषाभावात् । तथा चघटादिरपि क्वचित्प्रदेश- विशेषादावसद्व्यवहारविषयत्वं सिद्धं । तथाविधस्यानुपलम्भस्यात्रापि भावात् तत्किं ब्रूषे । नैव क्वचित् कश्चिद् दृष्टोप्यसद्व्यवहारविषय इति अभिप्रायः । अन्यथा अत्रापि व्यतिरिक्तावयव्यादौ मा भूदसद्व्यवहार इति यावत् । § 91

सर्व्वं प्रमाणनिवृत्तिरि VN_{ms}:4a7 त्यादि परः । तथा चायुक्तं उक्तं । नहि अनुपलम्भादन्यो व्यवच्छेदहेतुरस्तीति । एवञ्च सति न घटस्यापि क्वचिदसद्व्यव हारविषयत्वमा गमानुमानभावेन सर्व्वप्रमाणनिवृत्तेरेवाभावादिति मन्यते । कुतः पुनरिदमतिप्रज्ञाकौशलमासादितं भवतेत्याचार्योपहसति । सुकुमारप्रज्ञ VN_{ms}:4a7 इत्या दिना । न प्रसहते प्रमाणचिन्तापरिक्लेश VN_{ms}:4a7 मिति सुकुमारप्रज्ञत्वे कारणं । § 92

ननु च किमत्रायुक्तमुक्तमस्माभिर्येनोपहससीत्याह । नही VN_{ms}:4a8 31b/msK त्यादि । अदिश ब्देनागमपरिग्रहः । व्यभिचारश्च पूर्वमेव प्रतिपादितः । सर्व्वप्राणि प्रत्यक्षनिवृत्तिस्तर्हि गमयिष्यतीत्याह । न सर्व्वप्रत्यक्षनिवृत्तिरि 44/s VN_{ms}:4a8 ति । कुतोऽसिद्धेः । आत्मपर योरप्रतिपत्तेरित्यर्थः । न

७ मुखेण] ? मुखेन
२२ टादि] ? घटादे

ह्यत्र सर्वेषाम्प्रत्यक्षन्निवृत्तमिति निश्चये प्रमाणमस्ति किञ्चित् । आत्मप्रत्यक्षनिवृत्तिरेव तर्हि गमयतीति चेदाह । नात्मप्रत्यक्षा विशे षनिवृत्तिरपी VN_{ms}:4a8 ति [।] न केवलं पूर्वोक्तेत्यपि शब्दः । अविशेषेण निवृत्तिरविशेषनिवृत्तिः । आत्मप्रत्यक्षस्याविशेषनिवृत्तिरात्मप्रत्यक्षा विशेषनिवृत्तिरिति व्युत्पत्तिक्रमः । सन्निहितसकलतदन्यकारणस्य ह्यात्मप्रत्यक्षस्य निवृत्तिस्त्रिविधविप्रकर्षाविप्रकृष्टेऽभावङ्गमयत्येवेति कथनीयाविशेष वि प्रकृष्टवचनं । यस्मात् सर्व्वप्रमाणनिवृत्तिर्न्नासद्व्यवहारहेतुस्तस्मात् स स्वभावविशेषस्त्रिविधविप्रकर्षाविप्रकृष्टरूपो भावो यतः प्रमाणात्सं निहितसमस्ततदन्यत्क्रियादिकारणात् प्रत्यक्षान्नियमेन सद्व्यवहारम्प्रतिपद्यते समासादयति । तस्यैव यथोक्तस्य प्रमाणस्य निवृत्तिस्तस्य स्व भावविशेषस्यासद्व्यवहारं प्रसाधयति । अवधारणमनुमानावगमादिनिवृत्तेर्व्यवच्छेदाय । किङ्कारणन्तस्य स्वभावविशेषस्य स्वभावसत्तायास्तस्य यथो क्तस्य प्रमाणस्य येयं सत्ता तया व्याप्तः कारणात् । तथाहि यत्र स तादृग्विधः पदार्थस्तत्रावश्यं तेनापि प्रमाणेन भवितव्यं । समर्थस्य कारणस्य कार्या व्यभिचारात् । एवञ्चैतत्प्रमाणं तद्व्यापकत्वान्निवर्त्तमानं तामपि वृक्षवच्छिंशपां निवर्त्तयति । अनेन च यथोक्तादनुपलम्भादित्याद्युक्तमुपसंहरति स्यादेत दुपलब्धिलक्षणप्राप्तमपि क्षीरादिषु 32a/msK दध्यादिकं न प्रत्यक्षे णोपलभ्यतेऽपि त्वनुमानेनाशक्तादनुत्पत्तिरिति । अतो न तन्निवृत्याप्यसद्व्यवहारविषयत्वन्तस्येत्यत आह । न चे VN_{ms}:4a9 त्यादि । येनान्योपलब्धित्वेनानुमानादस्यो पलब्धिः स्यात् । किम्पुनरन्योपलब्धिर्न युज्यत इत्याह । न चेत्या दि । यस्मादर्थेचकारः । तस्य रूपस्योपलब्धिलक्षणप्राप्तस्यान्यथाभावप्रच्युतिर्न्न तमन्त रेणाप्रत्यक्षः स भावो युक्त इति शेषः । तदेतेन प्रत्यक्षमेव तस्योपलब्धिरपेक्षणीयस्य कस्यचिद्धेतोरभावादिति प्रसाधयति । प्रयो गः पुनः । यद्यदासन्निहितसकलाप्रतिबद्धसामर्थ्यकारणन्तत्तदा भवत्येव न चाक्षेपकारि । यथा समग्राप्रतिहतसामर्थ्यकारणसा मग्रीकोङ्कुरः । तथा च क्षीराद्यवस्थासु यथोपदिष्टपक्षधर्मवद् दध्यादिविषयं ज्ञानमिति स्वभावहेतुः । द्वितीयसाध्यापेक्षया व्यापकवि रुद्धोप लब्धिः । 45/s अन्यथा त्वन्तस्य भवत्येवातोयं हेतुरसिद्ध इति चेदाह [।] अन्यथा भावे चेष्यमाणे तदेवो पलब्धिलक्षणप्राप्तं दध्यादि न स्यात् VN_{ms}:4b1 प्राच्यरूपात् प्रच्यु तेः । तथा च तद्रूपतायां निरन्वयविनासप्रसङ्ग इति भावः । अपि चेVN_{ms}:4b1त्यादिनोपचयमाह । यदयम्भावः । अजातोऽनष्टश्च रूपातिशयोस्येति विग्रहः [।] नित्यमेकत्वरूपत्वाद् द्रव्यान्तरेण व्यवधाने दूरदेशस्थितौ च भवेयुरपि प्रत्यक्षाप्रत्यक्षत्वादय इत्यत आह । अव्यवधानदूरस्थान VN_{ms}:4b1 इति । न विद्यते व्यवधानदू रस्थाने चास्येति विग्र- 32b/msK हः । क्वचिदव्यवधानादूरस्थान इति पठ्यते । तत्र व्यवधानदूरस्थानशब्दयोः प्रत्येकं नञा समासं कृत्वा पश्चा[द्] विशेषणसमासः कार्यः । कश्चित्पुरुषमपेक्ष्य कोपि प्रत्यक्षोऽन्यश्चापेक्ष्य प्रत्यक्ष इति न विरोध इत्याह । तस्यैव

२९ विनास] ? विनाश

VN$_{ms}$:4b2 । तस्याप्युन्मीलितलोचनाद्यवस्थायां प्रत्यक्षोऽन्यदा चाप्रत्यक्ष इति न काचित् क्षतिरित्याह । तदवस्थेन्द्रियादेरेव VN$_{ms}$:4b2 तदवस्थमविकृतमिन्द्रियमस्येति विग्रहः । आदिग्रहणं मनस्काराद्याक्षेपाय । कदाचिदभिव्यक्तवेलायां प्रत्यक्षो भवति कदाचिच्चानभिव्यक्तक्षीरादिवेलायामप्रत्यक्षश्चेति येन प्रत्यक्षाप्रत्यक्षत्वेन कदाचिदनुमानस्योपलब्धिरशक्तादनुत्पत्ते रिति । कदाचित्तु व्यक्तावस्थायां प्रत्यक्षं । किं पुनरत्रायुक्तं । येनैवं ब्रूष इति चेदाह । एकस्मिन्नेवानतिशये दध्यादावमीषां प्रकाराणाम्प्र त्यक्षाप्रत्यक्षत्वादीनां विरोधादिति VN$_{ms}$:4b2 । ये परस्परविरुद्धरूपा न तेषामेकत्रानतिशये सम्भवः । तद्यथा शीतोष्णस्पर्शादीनां । परस्परविरु द्धाश्च प्रत्यक्षाप्रत्यक्षत्वादयः । इति व्यापकविरुद्धोपलब्धिमन्यते ॥ § 93

परः प्राह ॥ नानतिशय VN$_{ms}$:4b3 इति । एकस्याव्यक्तावस्थालक्षणस्यातिशयस्य निवृत्याऽपर स्य व्यक्तावस्थालक्षणस्योत्पत्या च क्षीरं दधीति व्यवहारस्योपगमात् । अनेनाजातानष्टरूपातिशय इत्यादेरसिद्धत्वमाह । न तावदयमतिशयो भवद्भिरति शयवद् भावव्यतिरिक्तोऽभ्युपगतोऽभ्युपगमे वा 33a/msK तदवस्थोऽनन्तराभिहितो दोषः स्यात् [।] तस्मादव्यतिरिक्त एवायं तत्र चायन्दोष इत्यागूर्याह । सोतिशयो व्यवस्थालक्षणस्तस्यातिशयवतोऽव- 46/s स्थातु रात्मभूतोऽनन्वय इत्येकान्तेन निवर्त्तमानः । व्या पकस्वभावात्प्रवर्त्तमानोऽसन्नेव कथन्न स्वभावनानात्वं । सुखदुःखयोरिवाकर्षति । अन्वाकर्षत्येवेत्यर्थः ।प्रयोगोपुनर्यो यस्या त्मभूतः VN$_{ms}$:4b3 स तन्निवृ त्तावेकान्तेन निवर्त्तते प्रवृत्तौ चासन्नेव प्रवर्त्तते यथा तस्यैवातिशयस्यात्मा । आत्मभूतश्चातिशयस्यातिशयवानिति स्वभावहेतुः । ततश्च तयोरवस्थ योरवस्थातुर्न्नानात्वं परस्परविरोधिधर्माध्यासितत्वात् सुखदुःखवदिति स्वभावहेतुरेव । नैवासावतिशयोऽनन्वयः प्रवर्त्तते निव र्त्तते वाऽतः पूर्वस्मिन्प्रमाणे साध्यविकलत्वन्दृष्टान्तस्य । उत्तरत्र त्वसिद्धिर्हेतोरिति चेदाह । सान्वयत्वेचा तिशयस्य निवृत्तिप्रवृत्योरं गीक्रियमाणे का कस्य निवृत्तिः प्रवृत्तिर्वेति VN$_{ms}$:4b3 । नैव काचित्कस्यचिन्निवृत्तिः प्रवृतिर्वा । सर्व्वस्य सर्व्वदा सत्त्वात् । तथा च सर्व्वं सर्व्वत्र समुपयु जेतेत्यादिना पुरोनुक्रान्तो दोषोनुपयुज्यत इत्यभिप्रायः । उपचयमाह । यदि च कस्यचित् स्वभावस्यातिशयाख्यस्य प्रवृत्तिर्निवृत्तिर्वेति स्वयमभ्यनुज्ञायते त्वया । एकातिशयनिवृत्याऽपरातिशयोत्पत्या व्यवहारभेदोपगमादित्यविधानात् । तदेतदेव परस्तथागतवचोऽभ्यासोपजातावदातमति र्ब्रुवाणः । नानुमन्यते भद्रमुखेणभवेदेवं यदि यथा मया प्रवृत्तिनिवृत्ती अभ्यनुज्ञायेते तथा तेनापि । यावतास्य निरन्वयोपजननविनाशोपगमो मम 33b/msK त्वाविर्भावतिरोभावमात्रन्तत्कथमिवानुमन्यत इति कदाचिद् ब्रूयात्पर इति तन्मतमाशङ्कते । तस्ये VN$_{ms}$:4b4 त्यादिना । सदेव भवद्भिः शून्यहृदयैरयमन्वयो घोष्यते । तत्र वक्तव्यङ्कोयमन्वयो नाम भावस्य जन्मविनाशयोरिति

१९ योगो] ? प्रयोगः
२७ जे] ? ज्ये
३१ मुखेण] ? मुखेन

सत्त्वं एषा । परः प्राह [।] किमत्राभिधानीयं यावता शक्तिरन्वयो भावस्य जन्मविनाशयोरिति व र्त्तते । कथम्पुनः सान्वय इत्याह । यतोस्त्येव प्रागपि जन्मनो निरोधादप्यूर्ध्वं VNms:4b5 सा शक्तिरवस्थातृलक्षणा येनैतदेव-न्तेनायम्भावो नापूर्वः सन् सर्वथा जायते अपि तु शक्तिरूपेण पूर्व्वं व्यवस्थित एव केवलमाविर्भवतीति सर्व्वथाग्रहणेन ज्ञापयति । तथा न पूर्व्वो विनश्य-त्येकान्तेनापि तु तिरोभवति । असतो नास्त्युदयः सतश्च नास्ति विनाश इति यावत् । आचार्य आह । यदि सा शक्तिः सर्व्वदा VNms:4b6 47/s
तिरोभावाविर्भावकालेऽ नतिशयातिशय रहिता एकरूपे ति यावत् । त-दा किमिदानीं अतिशयवद्विद्यते । यत[ः] कुतोयं व्यवहारविभागः क्षीर-न्दधितक्रमित्यादि । साङ्ख्य आह । अवस्था अतिशयवत्य VNms:4b6 इति । ता VNms:4b6 इत्याद्या चार्यः । विकल्पद्वयञ्च प्रकारान्तरास-म्भवात्कृतं । न वाहरीकवादो युज्यते तत्त्वान्यत्वयोः परस्परपरिहारस्थि तिलक्षणतया तृतीयराशिव्यतिरेचकत्वात् । एकत्वे को दोष इति चेदाह [।] एकश्चेत्तदा कथमिदमेकत्राविभक्ता त्मन्यविभक्तस्वरूपे योक्ष्यते VNms:4b7 । व्यपेक्षया भ वेदपीत्याह । निष्पर्यायं किम्पुनस्तत्परस्परव्याहत इत्याह जन्म अवस्थानामजन्मशक्तेः । तथार्थक्रियायामुपयोगोऽवस्थानां शक्तस्त्व-नुपयोग VNms:4b7 इ ति । प्रयोगाः पुनः [।] शक्तेरपि जन्मास्ति 34a/msK
। अवस्थाभ्योऽव्यतिरेकात् । अवस्थास्वरूपवत् । अवस्थानाम्वा न जन्म शक्तेरव्यतिरेकात् । शक्तिस्वरूपवत् । स्वभावहेतुविरुद्धव्याप्तो पलब्धि[ः] । एतेनैव प्रकारेणार्थक्रियोपयोगानुपयोगनिवृत्यनिवृत्यादिषु स्वभावहेतुविरुद्ध-व्याप्तोपलब्धयो योज्याः । आदिग्रहणेन पतनापतनपोरपि परिग्रहः । § 94

पु नरपि साङ्ख्यीय म्मतमाशङ्कते । अस्ती त्या VNms:4b8 दिना । केनचित्पर्यायेण अवस्थाशक्त्योरनन्यत्वम्परमार्थतस्तु भेद एव तेन ज-न्मादीनामविरोध इति । नूनम्भवतः स्वपक्षरक्षणा कुलबुद्धेरात्मापि विस्मृतः । इत्याकूतवानाह । विस्मरणशील VNms:4b8 इत्यादि । यतोऽनन्य-त्वपक्षेऽयन्दोषोस्माभिरुक्तोऽन्यत्वपक्षेत्वन्य एव भविष्यति । कः पुनरसावन्य इति तमेवदर्शयितुमुपक्रमते । अथाप्यनयोः शक्त्यवस्थयोर्विभागोऽन्यत्वन्त-दा न कश्चिद्विरोधः । केवलं सान्वयो भावस्य जन्म विनासादिति न स्यात् । किं कारणं । यस्मात् यस्यान्वयः शक्तित्वेनाभिमतस्य न त-स्य जन्मविनाशौ नित्यमेकस्मिन्नेव स्वभावे व्यवस्थानात् । यस्य वा ता 48/s
उत्पादविनाशाववस्थात्वेनाभी ष्टस्य न तस्यान्वयः । अपरापरावस्थोदयास्त-मयेनावस्थितरूपाभावात् । तयोः शक्तिव्यक्तयोरभेदाददोष इति कापिलः । अनुत्तर VNms:4b10 मित्याद्याचार्यः । किमत्रायुज्यमा नकं येनैवं वद-सीत्याह । अभेदो हि नामैक्यमुच्यते VNms:4b10 । तौ शक्तिव्यक्तिभेदा वित्ययञ्च भेदाधिष्ठानो न्यत्वनिबन्धनो व्यवहारो भाविक इति कल्पनाविर-चितस्याप्रतिक्षे पात् । किञ्च निवृत्तिप्रादुर्भावयोः सतोरनिवृत्तिप्रादुर्भावौ तथा

२८ विनासा] ? विनाशा

स्थितौ सत्यामस्थितिः । आदिग्रहणाद् गतावगतिरित्यादि योज्यं । एत-
34b/msK द् भेदलक्षणङ्कथं योज्यते भ वता । तथाह्यवस्थानिवृत्तिप्रादुर्भावाभ्यामनिवृत्तिप्रादुर्भाववत्याः शक्तेरभेदो नेष्यते त्वया । तथा शक्तेरवस्थानेपि नावस्थानामवस्थानं । न च शक्तेस्तासामन्यत्वमिष्टं । तस्मादेवं रूपं नानात्वमित्याह । एष हि निवृत्तिप्रादुर्भावयोरनिवृत्तिप्रादुर्भाव VN_{ms}:5a1 इत्यादिभेदः । तथा हि यन्निवृत्यादिना न यस्य निवृत्यादयस्तत्तस्माद् भिन्नं यथा ता लतरुस्तमालादित्यतिप्रतीतमेतत् । एतद्विरहश्चाभेद इति यन्निवृत्या यस्य निवृत्तिरित्यादि । ननु च भूतभौतिकचित्तचैत्तादीनाम्प्रतिनियतसहोत्पादनिरोध स्थितीनामेतद्विद्यते । न च तेषामभेदस्तत् कथमुक्तमेतद्विरहश्चाभेद इति चेत् । न तेषाम्भिन्नोत्पादादिमत्वात् । यथाक्रममुदाहरणद्वयमाह । यथे त्यादि । अन्यथे VN_{ms}:5a1 ति । यद्यनन्तरोक्तम्भेदाभेदलक्षणन्नाश्रीयते तदा भेदयोर्लक्षणाभावात्कारणाद् भेदाभेदयोरव्यवस्था स्यात् । सर्व्वत्रेति सुखादीनाम्परस्परं चैतन्यानाञ्च । सुखादिभ्यश्चैतन्यानां अभेदः । सुखादीनाम्प्रत्येकम्भेदो न भवेदिति यावत् । तदात्मनीत्यादिना परः स्व-
49/s समयप्रतीतम्भेदाभेदयोर्लक्षण माह । तेना विरोध VN_{ms}:5a3 इति जन्माजन्मादीनां । अनन्तरोक्तस्य वा । न वै मृदात्मनीत्यादिना मृत्पिण्डघटयोराधाराधेयभावं प्रतिक्षिपति' । किन्तर्हि मृदात्मैव कश्चित् विशिष्टग्रीवादिसन्निवेशावच्छिन्नो घट इत्यभीधीयते [।] नन्वेकमेव मृद्द्रव्यं सर्व्वत्र तत्कथमिदमभिहितमित्यत आह । नहि एकस्त्रैलोक्यमृदात्मे VN_{ms}:5a3 ति । कुतः प्रतिविज्ञ प्तिप्रतिभासभेदन्द्रव्यस्वभावभेदादिति सम्बन्धः । अन्योन्यभिन्नानामेव द्रव्याणाम्विज्ञाने प्रतिभासनादित्यर्थः । तथा प्रत्यवस्थाभेदभिन्नावस्थत्वात् ।
35a/msK प्रत्यर्थ क्रियाभेदं चाश्रित्य द्रव्यस्वभावभेदात् । परस्परासम्भविकार्यकारणा- दिति यावत् । परस्यापि सत्वरजस्तमश्चैतन्येषु भेदाभ्युपगम इदमेव कारणं युक्तमिति कथय [न्] नाह । एवं हीति VN_{ms}:5a4 । यदि प्रतिविज्ञप्तिप्रतिभासभेदादिना भेद इष्यते । चैतन्येषु चेति बहुवचनं बहवः पुमांस इति सिद्धान्तात् । यद्येवमिति प्रतिविज्ञप्ति प्र तिभासभेदादिना । पुनरप्याह । सत्यप्येतस्मिन् प्रतिविज्ञप्तिप्रतिभासभेदादौ कस्यचि दात्मन VN_{ms}:5a4 इति शक्तेरनुगमादैक्यमवस्थानामिति । आचार्य आह । यद्ये वं सुखादिष्वप्ययमेवाभेदप्रसङ्ग गश्चैतन्येषु च । सुखादिष्वपि हि गुणत्वाद् भोक्तृत्वकर्तृत्वादीनामनुगमाच्चैतन्येषु च भोक्तृत्वाकर्तृत्वागुणत्वादी नान्तथा सुखादि चैतन्येषु सत्वज्ञेयत्वादीनामन्वयादित्यभिप्रायः । प्रयोगो पुनरभिन्नाः पुरुषसुखादयः परस्परमन्वयान्वयभाक्त्वात् । श क्तिव्यक्तिवत् । शक्तिव्यक्ती वा भिन्नेऽन्वयोनन्वयभाक्त्वादेव । सुखादिचैतन्यवदिति स्वभावहेतु[ः] । अथापि स्याद्यत्र सर्व्वात्मनैवान्वयस्तत्राभेदो न तु यत्र केनचिद्रूपेण । घटादिषु च सर्व्वात्मनान्वयस्ततोयमदोष इत्यत आह । न च घटादिष्वपि सर्व्वात्मनान्वयो VN_{ms}:5a5 पि तु केनचिद्रूपेणेति न केवलं सुखादि

३१ योगो] ? गः

ष्वित्यपि शब्दः । कुतोऽवैश्वरूप्यसहोत्पादादिप्रसङ्गात् । तथाहि सर्व्वासामवस्थानां सर्व्वप्रकारेणान्वये सत्यैक्यम्प्राप्नोति । ततश्च विशिष्टरूपरसगन्धश वीर्यविपाकाभावात् । वैचित्र्यन्न भवेत् । एवञ्च पञ्चभूताभावप्रसङ्गोऽध्यक्षादिवाधाप्रसं गश्चेति भावः । सहोत्पत्तिश्च सर्व्वासामवस्थानाम्प्रसज्यते 35b/msK । आदिशब्देन ह्यनिरोधार्थक्रियाव्यापारविकारादय उपादीयन्ते । प्रयोगाः पुनर्यद्विशिष्टरूपरसगन्ध शब्दादिभिरनेकप्रकारं न भवति । न तस्य वैश्व- 50/s रूप्यमस्ति । यथैकस्य सुखाद्यात्मनः । तथा सति मताना मप्यवस्थानामनन्तरोक्तो धर्मो नास्ति न चासिद्धो हेतुर्यतो यद्यस्मान्न व्यतिरिच्यते न तद्विशिष्टरूपादिभिरनेकप्रकारं यथा तस्यैवात्मा । न व्यतिरिच्यन्ते चावस्था अभीष्टा इति व्यापकविरुद्धोपलब्धी । तथा यद्यस्मादपृथग्भूतं तत्तदुत्पादादिभिरुत्पादादिमत् । यथा तस्यैव स्वरूपं । अपृथग्भूताश्चा भिमता अवस्थास्ताभ्योऽन्यस्या इति स्वभावहेतुः । अन्यथा घटोयमित्यनन्यत्वमेवायुक्तं । नामान्तरम्वा अर्थभेदमभ्युपगम्य तथाभिधाना त् । उपचयमाह । न च घटं मृदात्मानञ्च कश्चिद VN$_{ms}$:5a5 त्यर्थ मुन्मीलितलोचनोप्ययं घटोयं च मृदात्मेति विवेकेनोपलक्षयति । येनैवं स्यादिदमि ह प्रादुर्भूतमिति तदनेनाभेदलक्षणमत्यन्तासम्बद्धमेवेत्याह । ननु च पिण्डरूपात्मृदात्मनो घटस्य विवेकेनोपलक्षणमस्त्येव तत्किमेवमुक्तमिति चे त् । सत्यमस्ति । न तु घटाद् भिन्नत्वं परोभिमन्यत इत्यभिप्रायाददोषः । यदि नाम भेदेनानुपलक्षणन्तयोस्तथापि कस्मादेवं न स्यादिति चेदाह ॥ नह्यधिष्ठानाधिष्ठानिनोराधाराधेययोः कुण्डेवदरयोर्व्विवेकेनानुनपलक्षणे सत्येवम्भवतीदमिह प्रादूर्भूतमिति VN$_{ms}$:4a6 । तदनेन घटमृदात्मनोराधाराधेयभावो 36a/msK नास्ति विवेकेनानुपलक्षणात्सत्वादितत्स्वभावयोरेवेति व्यापकानुपलब्धिं मन्यते । अधुना यद्यस्मिन्प्रादुर्भवति तत्ततोऽभिन्नमित्यस्याभेदलक्षणस्याव्या पितासा चिख्यासुराह । न च शक्त्यात्मनि प्रादुर्भावस्तस्या नित्यमवस्थानाभ्युपगमात् ॥ अन्यथावस्थैव सा स्यात् । तथा च तस्याः स्वात्मनःसकासादभ्यु पेतोऽभेदो न स्यात् । अभेदलक्षणाभावात् उपलक्षणश्चैतद्व्यक्तौ सुखादिषु पुरुषेषु च तुल्यदोषत्वात् । अन्ये तु स्वदर्शनापराधमलीमसधिय[ः] केचित् सांख्या एवमाहुः । यो यस्य परिणामस्स तस्मादभिन्नः । तद्यथा हेम्नः कुण्डलाद्यवस्थाविशेष इति तेप्यनेनैव पूर्व्वस्याभेदलक्षण स्याव्यापिताप्रदर्शनेनापहस्तिता इति चेतस्यारोप्याह । एतेनैवे VN$_{ms}$:5a6 त्यादि । युष्मद्दर्शनपरिणामोपि न युक्त इत्यभिप्रायवानपक्षेप ङ्करोति । किञ्चेद VN$_{ms}$:5a7 मित्यादिना । परेणापि किमत्र वक्तव्यं यावता भगवता कपिलेन स्पष्टमिद- 51/s मुक्तमित्यभिसन्धायाह । अवस्थितस्य द्रव्यस्य यथा काञ्चनस्य धर्मान्तरस्य केयूरस्य निवृत्तिः । धर्मान्तरस्य च कुण्डलादेः प्रादुर्भावः परिणाम इति । आचार्यस्तस्यैव तावदिदमीदृशं प्रज्ञास्खलितङ्कथं वृत्तमिति सविस्मयानुकंपन्न-

७ ति] ?
२४ पितासा] ? शा
२५ कासा] ? सकाश

श्वेतः । तदपरेप्यनुवदन्तीति निर्दयाक्रान्तभुवनं दिग्व्यापकन्तमः । कः प्राणिनो
हितेच्छा विपुलत्व स्यापराध इति मन्यमान[ः] प्राह । § 95

ननु यदि नाम तेनैवमुक्तं । भवद्भिस्तु निभालनीयमेतत् यत्तद्धर्मान्तरं
36b/msK कुण्डादिकं निवर्त्तते प्रादुर्भवति च किं त देवावस्थितं काञ्चनद्रव्यं स्यात्त-
तोर्था- न्तरम्वेति । कस्माद्विकल्पद्वयमेव कृतमितिचेदाह [।] अन्यविक-
ल्पाभावात् VN_{ms}:5a8 । निर्ग्रन्थवाद स्यायोगादित्यभिसन्धिः । यद्याद्यो
विकल्पस्तदा कोदोष इति चेदाह । यदि तद्धर्मान्तरन्तदेवावस्थितं द्रव्यं
VN_{ms}:5a8 । तदा तस्याव स्थानान्न निवृत्तिप्रादुर्भावावाविर्भावतिरोभावल-
क्षणाविति त स्मात्कस्य ताविति वक्तव्यम्भवद्भिः । प्रयोगो पुनः यस्यावस्थानं
न तस्य निवृत्तिप्रादुर्भावौ । यथावस्थातुर्द्रव्यस्य । तथा चावस्थानन्तस्य धर्मा
न्तरस्येति व्यापकविरुद्धोपलब्धिः । न चासिद्धो हेतुर्यतो यदवस्थातुरनन्यत्त-
स्यावस्थानं यथा तत्स्वरूपस्यैव । अनन्यच्चैतद्धर्मान्तरं तस्मा दिति स्वभावहेतुः
किञ्च यद्यवस्थितमेव द्रव्यं तद्धर्मान्तरं तदावस्थितस्य द्रव्यस्य धर्मान्तरमिति
। वचनं सिध्यति ॥ किङ्कारणमित्याह । न हि तदेव तस्य धर्मान्तरम्भवती
VN_{ms}:5a9 ति भवत्येव तदेव तस्य धर्मान्तरं यथा कृतकत्वं शब्दस्याव्य-
तिरिक्तमपि तस्मादिति चेदाह । अनपाश्रितव्य पेक्षाभेदं VN_{ms}:5a9 ।
एतदुक्तम्भवति । अत्र हि स एव सब्दोऽकृतकादिभ्योव्यावृत्तत्वात् तद्व्यावृत्त्य-
पेक्षया तन्मात्रजिज्ञासायां प्रतिक्षिप्तभेदान्तरेण शब्देन धर्मत्वे न व्यपदिस्यतेइह
तु पुनर्व्यपेक्षाभेदोपि नास्ति तत्कथन्तदेव तस्य धर्मान्तरम्भविष्यतीति । § 96

धर्मस्य द्रव्यादर्थान्तरपक्षे तर्हि को दोष इत्याह ॥ अथेत्या VN_{ms}:5a9
दि ॥ कस्माद्धर्मनिवृत्तिप्रादुर्भावाभ्यां न द्रव्यस्य परिणामो यस्मा[न्] न ह्य-
52/s र्थान्तरगताभ्यां निवृ त्तिप्रादुर्भावाभ्यामर्थान्तरस्य परिणतिर्भवति । तदेव कुत-
37a/msK श्चेत न्येपि परिणतेः प्रसङ्गात् । न च चैतन्यस्य परिणतिरिष्यते । प्रधानपुरुष-
योरैक्यापत्तेरकर्तृता चेति वचनात् । प्रयोगः पुनः । यद्यतोर्थान्तरन्न तद्गताभ्यां
निवृ त्तिप्रादुर्भावाभ्यां तस्य परिणतिः । तद्यथा चैतन्यभिन्नस्वभावस्याङ्कुरस्य
निवृत्तिप्रादुर्भावाभ्यां चैतन्यस्य धर्मान्तरञ्च द्रव्यादिति व्यापकविरुद्धोपलब्धिः
। भवे देतन्न यस्य कस्यचिदर्थान्तरस्यासम्बद्धस्यापि निवृत्तिप्रादुर्भावाभ्याम-
न्यस्य परिणतिरपि कुत[ः] चासम्बद्धस्यैव । यथा तस्यैवाङ्कुरस्य बीजस-
म्बद्धस्य निवृत्तिप्रादुर्भावाभ्याम्बी जस्य तेन सामान्येन साधने सिद्धसाधनं
। धर्मस्य द्रव्यसम्बन्धात् [त]द्विशेषेण तु साधनविकलता निदर्शनस्य ।
अङ्कुरस्य चैतन्येन सह सम्बन्धाभावादिति चेदाह । द्रव्यस्य धर्म इति
VN_{ms}:5a10 व्यपदेशो न सिध्यति VN_{ms}:5a10 । कुतः सम्बन्धाभावात्
। एवं मन्यते द्रव्यसम्बन्धोयं धर्म इत्येतदेव न विद्यते । तत् कुतो व्यावृत्ति
प्रसङ्गस्येति । अस्त्येव तर्हि द्रव्यधर्मयोराधाराधेयभावलक्षणस्सम्बन्धस्तत-

९ योगो] ? प्रयोगः
१७ ब्दो] ? शब्दो
१८ ते] ? व्यपदिश्यते

श्च सविशेषणेपि हेतौ असिद्धिरित्यत आह । नहि कार्यकारणभा वादन्यो
वस्तुभूतः सम्बन्धोस्ती VN_{ms}:5b1 ति । आधाराधेयभावोऽपि कार्यकार-
णभावविशेषादेव व्यवस्थाप्यते । यथा निर्णीतमाधारतोभिनिवृत्तेरात्मनस्तादृ
शो नु...यः कार्यन्तस्येत्यत्र प्रकरणे प्रमाणविनिश्चय इत्यभिप्रायः । अस्तु
तर्हि कार्यकारणभावस्तयोरिति चेदाह । न चानयोर्द्रव्यधर्मयोः कार्यकार-
णभाव VN_{ms}:5b1 इति । कुतः स्वयमतदात्मनोऽतत्कारणत्वात् । यद्धि
यत्स्वभावं न भवति न तत्तत्कारणतया भवद्भिरभ्युपेयं यथा रजस्तमसः
। तथा चेदमपि द्रव्यधर्मस्वभावो भवति तत्कथमिव तस्य कारणत्व- 37b/msK
मुपेयादिति व्यापकानुपलब्धिप्रसङ्गं मन्यते । न चायमसिद्धो हेतुरिति म-
न्तव्यं । अर्थाभावपक्षं समाश्रित्य दोषाभिधानस्य प्रकृत त्वात् । यदाह ।
धर्मस्य द्रव्यादर्थान्तरत्वं VN_{ms}:5b1 स्यादिति । अथाप्यस्मद्वै[फ]ल्ये स्यात्
पूर्वकान् कापिलानतिपत्य साङ्ख्यानां शकमाधववत् । द्रव्यस्य व्यतिरेकेपि
धर्मकार णत्वमिष्यते तदापि ब्रूम इत्याह । अर्थान्तरत्वेपि द्रव्यस्य धर्मकार-
णत्वे ऽङ्गीक्रिय माणेऽर्थान्तरस्य कार्यस्योत्पादनात् VN_{ms}:5b2 कारणात् ।
द्रव्यस्य परिणाम इतीष्टं स्या VN_{ms}:5b2 द् भवता ततः किं स्यात् इत्याह 53/s
[।] तद्विरुद्धस्यापि तथागता नुसारिणः [।] किङ्कारणन्तेनापि हेतुफलसंतानं
मृद्द्रव्याख्ये पूर्वकात् मृत्पिण्डा त्कारणभूता दुत्तरस्य घटद्रव्यस्य कार्यस्योत्पत्तौ
सत्यां मृद्द्रव्यं परिणतमिति व्यवहारभेदस्योपगमात् VN_{ms}:5b3 कारणात्
। स्यात् मतं । यदि नाम प्रकारद्वयेनापि परिणामो न युज्यते प्रकारान्तरेण
तु भविष्यतीत्येतदाह । न चे VN_{ms}:5b3 त्यादि । तस्मादुभ[य]थापि न
परिणाम इत्युपसंहारः । न निर्विवेकं निर्विशेषं द्रव्यमेव VN_{ms}:5b3 परो
ना पि द्रव्यादर्थान्तर मेकान्तेनैव किन्तर्हि द्रव्यसन्निवेशोऽवस्थान्त रन्नान्यः
यथाङ्गुलीनां सन्निवेशोऽवस्थान्तरम्मुष्टिः । यथाङ्गुलीनां सन्निवेशोऽवस्थान्तर-
न्तत्वान्यत्वाभ्यामनिर्वचनीयम्मुष्टिः कस्माद्धेतोर्न ह्यङ्गुल्य एव निर्विवेका मुष्टिः
। कुतः प्रसारितानाममुष्टित्वात् VN_{ms}:5b4 । अन्यथा प्रसारितानामपि
विशेषाभावात् मुष्ट्यवस्थायामिव मुष्टित्वप्रसङ्ग इति । अभावहेतुकाले रूप कः
। नाप्यर्थान्तरं मुष्टिरङ्गुलिव्यतिरेकेणाप्रतिहतकारणेन प्रयत्नवतापि मुष्टेरनुप-
लब्धेरिति । कदाचि त्कापिला एवं ब्रूयुरिति तन्मतं शङ्कते [।] न निर्विवेक
मित्यादिना । गतार्थमेतद् । नहि मुष्टेरङ्गुलिविशेषत्वादि VN_{ms}:5b5 ति 38a/msK
परिह- रति । असक्ताङ्गुल्य एव च निर्विवेका मुष्टिरिति कथयन् दृष्टान्तायोग-
माह । अतोपि यदुत । प्रसारितानाममुष्टित्वादिति तदप्ययुक्तमेव । किङ्कारणं
[।] यतोङ्गु ल्य एव हि विशिष्टहेतुप्रत्ययबलेन तथोत्पन्ना काश्चन मुष्टिर्न तु
सर्वाः । तदेव कुत इत्याह । न प्रसारिता अङ्गुल्यो निर्विवेकस्वभावा मुष्ट्य-
ङ्गुल्यश्चेति [।] च शब्दोत्र लुप्तनिर्दिष्टो ज्ञेयः । अथवा मुष्ट्यात्मिका अङ्गुल्यः

४ नु] ?

प्रसारिताः सत्यो नहि निर्विशिष्टरूपा इ ति व्याख्येयं । कस्मात् । अव-
स्थादूयेपि प्रसारिताप्रसारितरूपे । उभयोरप्रसारितप्रसारितावस्थयोर्यथाक्रमं
प्रतिपत्तिप्रसङ्गात् VN$_{ms}$:5b5 । प्रयोगः [पुनः ।] प्रसारितावस्थायामप्र-
54/s सारितावस्थायाः प्रतिपत्तिर्भवेत् अङ्गुलीनां विवेकाभा वात् । अप्रसारिताव-
स्थायामिव स्वभावहे तुः । एवमप्रसारितावस्थायां प्रसारितावस्थायां तत्प्रति
पत्तिः स्यादित्यपरो योज्यः । यत्तूभयस्येति व्यापकानुपलब्धिः योज्या ।
अथाऽ पि कथञ्चित्कश्चिद्विवेको स्थितयोर[व]स्थयोस्तदा स विवेकश्चासाम-
ङ्गुलीनां स्वभावभूतो वा भवेन्नवेति विकल्पद्वयं [।] प्रथमे तावद् दोषमाह
। य एव खलु विवेकः स्व भावभूतः । स एव स्वभेदलक्षणं सुखदुःखवदिति
VN$_{ms}$:5b6 । द्वितीयेप्याह । परभूते च विवेकोत्पादेऽङ्गुल्यः प्रसारिता
एवोपलभ्येरन् VN$_{ms}$:5b6 मुष्ट्यवस्थायामपीति शेषः [।] किमिति । य-
तो नहि स्वभावादप्रच्युतस्यार्थान्तरोत्पादे सत्यन्यथोपलब्धिर्भवत्यतिप्रसङ्गात्
38b/msK । उष्ट्रस्याप्यर्थान्तरस्य कलभस्योत्पादेऽत्यथोपलब्धिः स्या दित्यतिप्रसङ्गो
वक्तव्यः । प्रयोगः पुनः । यत्रस्वस्यात्मभावादप्रच्युतं न तस्यार्थान्तरोत्पादेपि
अन्यथोपलब्धिः । यथोष्ट्रस्य कलभप्रादुर्भावे । अप्रच्युताश्च स्व स्मात्स्व-
भावादङ्गुल्यो विवेकोत्पादेपीति विधिप्रतिषेधाभ्यां हेत्ववकल्पनायां कारण-
विरुद्धकारणानुपलब्धी । नन्वित्यादि परः । तत्त्वान्यत्वाभ्यामनिर्वचनीयं त-
दुक्तमिति वाक्यार्थः । उक्तमेतन्न पुनर्युक्तमित्या चार्यः । कथमयुक्तमित्याह ।
नहि सतो वस्तुनस्तत्त्वान्यत्वे मुक्त्वान्य[◌]प्रकारः सम्भवती VN$_{ms}$:5b7 ति
सद्वस्तुग्रहणं कल्प नाशिल्पोपरिचतस्यान्यापोहादेः सम्भवतीति प्रतिपादनाय
। कुत इत्याह । तयोरि VN$_{ms}$:5b8 त्यादि । प्रयोगः पुनः । यौ परस्प-
रपरिहारस्थितलक्षणौ तयोरेकत्यागोऽपरोपादाननान्तरीयकः । एकोपादान-
श्चापरत्यागनान्तरीयकं तद्यथा भावाभावौ । यथोक्तधर्मवन्तौ च तत्त्वान्यत्वप्र-
काराावि ति स्वभावहेतुः । नन्वङ्गुलीभ्यो मुष्टेस्तत्त्वान्यत्वप्रकारौ मुक्त्वाप्यन्यः
प्रकारः संभवत्येव । न ह्यङ्गुल्य एव मुष्टिः प्रसारितानाममुष्टित्वात् । नाप्य
र्थान्तरं पृथक्स्वभावानुपलब्धेरिति चेदाह । अङ्गुलीषु पुनरि VN$_{ms}$:5b8
त्यादि । प्रतिक्षणं विनाशो विद्यते यासां इति विग्रहः । ता एव क्षणिकत्वात्
तथाविधा जाय न्ते येन मुष्ट्यादिवाच्या भवन्तीत्यर्थः ॥ तदेतच्च वस्तुतो न
55/s मुष्टेरङ्गुलिविशेषादित्यत्रोक्तमपि प्रसङ्गात् युक्तमुक्तमित्यवसेयं । अन्यथा
किमनेन यद्ये वं कथन्तर्हि मुष्टिरङ्गुलीति च व्यपदेशभेद इत्यत आह ।
तत्र मुष्ट्यादिशब्दा विशिष्टविषया VN$_{ms}$:5b9 विशिष्टावस्थानामेवाङ्गुलीनां
39a/msK वाचकत्वात् । अङ्गुलीशब्दस्तु सामा न्यशब्दः सर्व्वावस्थानां तासामभिधाय-
कत्वात् । यथाक्रम- मुदाहरणद्वयमाह । वीजाङ्कुरादिशब्दवद् व्रीह्यादिशब्दवच्चे
VN$_{ms}$:5b9 ति । एवं शकलीकृतसकलपरपक्षः कु चोद्यशेषं परोपन्यस्तं
परिजिहीर्षुः । परमुखेन चोद्यमुपस्थापयति [।] तद्यदीत्या VN$_{ms}$:5b9

दिना । इदमस्याकूतं यथा हि तिलेष्वविद्यमानं घृतं । तथा तैलमपि । तद्यदि प्रागसदेव कारणे कार्यमुत्पद्यते तथा घृतस्यापि तिलेभ्य उत्पत्तिः स्यात् । असत्वात् तैलवत् । न वा तैलस्यापि तत एव घृतवत् । नहि असत्ये कश्चिद् वि शेष इति स्वभावहेतुव्यापकानुपलब्धित्वेनाभिमतयोर्व्याप्यव्यापकभावप्रसाधनप्रकार एषः । § 97

तदेतत् सर्वं[म]भ्यवधाय कृत्योत्थापनम्भवत इ ति मन्यमानः प्राह । ननु सर्व्वत्र सर्व्वस्यासत्वेप्ययन्तुल्यो दोषः VN_{ms}:5b10 । नहि सत्वे कश्चिद्विशेष इतिप्रयोगोपुनस्तावेव सत्वादिति हेतुविपर्ययं कृत्वा कार्यौ । अथापि कश्चिद्विशेषोस्ति तेन सत्वेपि न सर्व्वं सर्वस्मात् जायते तेन संदिग्धविपक्षव्यावृत्तिकत्वं प्रमाणयोरिति चेदाह । विशेषे चाऽ भ्युपगम्य माने सविशेषस्त्रैगुण्यात् सत्वरजस्तमोरूपाद् भिन्नः स्यात् । कस्मात्तस्य त्रैगुण्यस्य भावेपि विशेषस्याननुवृत्तेः कारणात् । प्रयोगः पुनः । यद्भावेपि यन्नानुवर्त्तते तत्तस्मादत्यन्तं भिन्नं । यथा शब्दस्पर्शरूपरसगन्धेभ्यश्चैतन्यन्नानुवर्त्तते च विशेषस्त्रैगुण्यभावेपीति स्वभावहेतुः । एतद्याभ्युपगम्योद्वाहितं । अधुना सत्कार्यवादे जन्मार्थ एव न युक्त इत्याह । सतश्चे VN_{ms}:5b10 त्यादि । नैव तस्य चासत्वेनाभिमतस्य जन्मास्ति । सत्वात् । निष्पन्नावस्थायामिवेति विरुद्धव्याप्तोपलब्धिरस्य मनसि वर्त्तते । अन्यथा पुनर्जातस्यापि पुनर्जातिः 39b/msK
प्रसज्यत इत्यनवस्था स्यात् । यदाह ।

...13 सतो यदि भवेज्जन्म जातस्यापि भवेद् भव [१३] § 99
इति । § 100
56/s

किञ्च साधनानां कारणानाम्बीजतेजोजलादी नां वैफल्यं प्रसज्येत साध्यस्य कर्त्तव्यस्य कस्यचिद्रूपस्याभावादिति प्रयोगः । यत्र साध्यन्न किञ्चिदप्यस्ति तत्र साधनसाफल्यं विद्यते यथा नभस्यनाधेयातिशये । न च साध्यङ्किञ्चिदप्यस्ति कारणे व्यवस्थिते सति कार्यं इति व्यापकानुपलब्धिः । न चायमसिद्धो हेतुरिति मन्तव्यं । यस्माद् यस्य कस्यचिदतिशयस्य तत्र कारणे स्थिते कार्ये कथञ्चिदुत्पत्ता विष्यमाणायां सोतिशयस्तत्रासन् कथञ्जायेत नैव जायेतासत्वात् । व्योमोत्पलमिव दुग्ध इति व्यापकानुपलब्धिरस्य चेतसि स्थिता । अथासन्नप्यतिशयो जा यते । तदा जातौ वा तस्यासतोपि सर्व्वोतिशयः सर्व्वस्माज्जायेतेति तुल्यः पर्यनुयोग इति । भवतोपि घृतातिशयोपि तिलेभ्य उत्पद्येतासत्वात् । तेनाति शयवदित्यर्थः । स्वभावहेतुप्रसङ्गः । परमतमाशङ्कते । नातिशयस्तत्रे VN_{ms}:6a2 त्यादिना । यथा नास्ति स कथन्तत्रासन् प्रकारो जायेतेति प्रक्षिपति । जातो वा सर्व्वः सर्व्वस्माज्जायेतेति तुल्यः पर्यनुयोग इति पूर्वोक्तो दोषो न युज्यत इत्यभिप्रायः । सर्वप्रकारेणैव

८ योगो] ? प्रयोगः

तर्हि निष्पन्नरूपातिशयोस्तीति चेदाह । न चेत्यादि [।] एवन्तावत्सदसत्कार्य-
वादिनोः सर्व्वस्मात्सर्व्वस्योत्पत्तिदोषस्तुल्य इति प्रतिपादितं । § 101

न च तयोरपि तुल्यश्चोद्यन्न तदेको वक्तुमर्हति । सत्कार्यवादे च न
कश्चिज्जन्मार्थ इति प्रसाधितं तेनायमस्तीत्यधिको दोषः । तदेवङ्कदाचित्प-
रोऽभिदध्यान्ननु भो यदि नाम मयैतन्न परिहृतं भवता त्ववस्यंस्थितेः किञ्चित्
40a/msK स्वपक्षस्य रक्षणाय वाच्यं । नहि परस्य पक्षं दूषयता स्वपक्षस्थितिरनवद्या
लभ्यते । न भवति नित्यः शब्दो मूर्त्तत्वात् । सुखादिभिर्व्यभिचारेणेत्यादाव-
नित्यत्वा सिद्धवदित्यत आह । असतोपि कार्यस्य कारणादुत्पादे यो यज्ज-
ननस्वभावस्तत एव तस्य जन्म जन्म नान्यस्मादिति नियम VN_{ms}:6a3
इति । अपि शब्दः सम्भावनायां । इदं अत्र र्थतत्वमविद्यमानमपि तैलं
तिलेभ्य एवोत्पद्यते । तदुत्पादनशक्तियुक्तत्वात् तिलानां नान्यस्मात् तज्जन-
नशक्तिविकलत्वात्तस्य । शक्तिप्रतिनियम एव च कथमि ति च पर्यनुयोगे
57/s वस्तुस्वभावैरुत्तरं वाच्यं । य एवम्भवन्ति यथा वा तथैव प्रधाना न्महान् एव
जायते नाहङ्कारो महतो ऽहङ्कारो न पञ्चतन्मात्राणीत्या दि प्रक्रिया । तत्र च
भवतः शक्तिप्रतिनियमावलम्बनमेवसरणं। अन्यस्य परिहारोपायस्याभावात्
[।] तदेतच्च न ममापि काकेन भक्षितं । तेन यदुक्तन्नह्यसत्वे कश्चिद् विशेष
इति तदयुक्तिमत् । कारणसामर्थ्यासामर्थ्यकृतत्वात् कार्योत्पत्यनुत्पत्योः ।
तस्मात् पुरोनुक्रान्तयोः प्रमाणयोः सन्दिग्धवि पक्षव्यावृत्तिकत्वसाधनकल-
ङ्काङ्कितो हेतुरिति । भवेदेतत्तस्यापि हेतो [ः] तज्जननस्वभावनियमः ।
कुतो जात इत्यत आह । तस्यापि स स्वभावनियमः । स्वहेतो रिति
VN_{ms}:6a4 । तस्यापि स कुत इति चेदाह । इत्येवमनादिभावस्वभाव-
नियम इति । न विद्यते आदिरस्येति विग्रहः अनादित्वाभ्युपगमाद्धेतुफ-
लप्रकृति परं पराया नानवस्थादोषो लघीयसीमपि क्षतिमावहत्यन्यथाऽदौ
कल्प्यमाने तस्याहेतुकत्वप्रसङ्गस्तेनास्थान एवेयमाशङ्का भवत इति भावः
40b/msK । अथवान्यथाऽ यङ्ग्रन्थो व्याख्यायते [।] निष्पर्यायेणासन्नेव तर्ह्यतिशयो
जायते । न च सर्व्वं सर्व्वस्माज्जायेतेति पर्यनुयोज्यं । यो यज्जननस्वभावस्तत
एव तस्यातिशयोत्पत्तिरिति शक्तिनियमसमाश्रयादिति कदाचित्स्वसिद्धान्तम-
नादृत्यापि परोभिदधात्याशङ्कायां न ममाप्येतच्छक्तिप्रतिनियमावलम्वनङ्केन-
चिद्दण्डेन निवारितमित्याग्र्याह । असतोपी VN_{ms}:6a3 त्यादि । पदवि
भागस्तु पूर्ववत् ।प्रयोगोपुनर्यस्य यज्जननाय समर्थं कारणमस्ति सोसन्नपि
जायत एव यथातिशयविशेषः । तज्जननाय समर्थङ्कारणमस्ति च कार्य-
विशेषस्येति स्वभावहेतुः । तथा यो यत्राविद्यमानतज्जननसमर्थकारणः स
तत्रासत्वेपि नोदेति । यथा तिलेषु घृतातिशयस्तथा चाविद्यमानतज्जननसम-
र्थकारणः कार्यविशेषः कारणविशेष इति व्यापकानुपलब्धिः । अपरः पर्य्यायः
। साधनस्य लिङ्गस्य । § 102

५ स्यं] ? स्थं
१५ णं] ? शरणं
३० योगो] ? प्रयोगः

...14 सदकारणादुपादानग्रहणात् सर्व्वसम्भवाभावात् ।
शक्यस्य श क्यकरणात् कारणभावाच्च सत्का र्यं [॥ १४]§ 104

इत्येवमादेर्वैफल्यं । साध्यस्य कर्तव्यस्य कस्यचित्संशयविपर्यासव्यवच्छेदस्य निश्चयप्रत्ययजन्मनश्चाभावात् । सर्व्वं हि साधनं विवादपदे वस्तुनि संशयविपर्यासावपनयन्तद्विषयन्निश्चयप्रत्ययमुत्पादयद्भिर्भर्त्ति नामानुरूपं न द्वयमप्येतत् कापिलमते सम्भवति । सदावस्थितस्य का र्यस्य हान्युपजननायोगात् । अथ सन्नप्ययं निश्चयः साधनवचनादनभिव्यक्तं । पूर्व्वमभिव्य- 58/s क्तिमुपयात्यतो न वैफल्यमिति मतमत आह । यस्य कस्यचिदतिसय स्या VNms:6a1 भिव्यक्तिलक्षणस्य तत्र साध्ये निश्चयरूपे कथञ्चिदसत उत्पत्तौ प्राप्तात्साधनात् सोऽतिशयस्तत्रासन् कथञ्जायते । जातो वा सर्व्वातिशयः 41a/msK । समस्तसाध्यनिश्चयाभिव्यक्तिलक्षणः सर्व्वस्मादन्यसाधनात् साधनाभासात् वोत्पद्येतेति तुल्यः प्रसङ्गः । पावकादिप्रतिपत्तिहेतवो धूमादयः सत्कार्यविनिश्चयाद्यभिव्यक्तिङ्कुर्युरित्यर्थः । उत्पत्त्य चाभिव्यक्तिमेतदुच्यते । नत्वियमविकृतरूपेषु कृतास्पदा सा हि तत्स्वरूपलक्षणा तद्विषयज्ञानलक्ष णा । रूपान्तरप्रादुर्भावलक्षणाभावा भवेत्स्वरूपं तावत् अविकार्यमिति न साधनैरन्यैर्वा कर्तुं शक्यते । विकारे वा पूर्व्वस्वभाववानिव पूर्व्वरूपप्रादुर्भावश्चेत्यसत्कार्य वाद एव समर्थितः पूर्वापररूपत्यागावाप्तिलक्षणत्वात् विकारस्य । चैतन्यस्यैकत्वादपरस्तद्विषयः प्रत्ययो न भवति परस्येति तद्रूपाभि व्यक्तिरनुपपन्ना । रूपान्तरप्रादुर्भावे च नान्यस्य किंचिदप्युपजायते विलक्षणत्वादिति तृतीयापि व्यक्तिरसम्भविनी द्वितीयायामप्ययमनिवारितो दोषः । तद्विषयप्रत्ययोदयेप्यर्थान्तरस्याभूतभाववैपरीत्यस्य व्यक्तेरयोगात् । न चानुपकारकः प्रत्ययस्य विषयः सम्भवी । तदुपकारकत्वे वा त स्मादेवास्योत्पत्तिरिति लिङ्गानपेक्षा । स्वत एव साध्यनिश्चयोस्याभिव्यक्तिरिति प्राप्तं । साधनापेक्षादेव साध्यनिश्चयात् स्वविषयज्ञानोत्पादेनैवापेक्षातिश योत्पत्तिलक्षणास्थिरेषु लब्धास्पदेति प्रतिपादितं सर्व्वदा वा भवेत् । लिङ्गस्यापि सदा सन्निहितरूपत्वात् । लिङ्गज्ञानापेक्षायामपि तुल्यः । तस्यापि सत्वे वादिनः स र्व्वकालास्तित्वादिति ।
§ 105

अपि चेत्यादिना सत्कार्यवादनिराकरणे कारणान्तरमाह । तदवस्थाया मिति VNms:6a4 [।] मृत्पिण्डावस्थायां पश्चाद्वदभिव्यक्तावस्थायामिव तदर्थक्रियेति घटसाध्योदकधारणविशेषाद्यर्थक्रिया । व्यक्तेरविशिष्टसंस्थानाया 41b/msK अप्रादुर्भावादिति चेत् । परमतासङ्कातस्या एवेत्यादि प्रतिविधानं । एतदुक्तम्भवति । ग्रीवादिसन्निवे शविशेषावच्छिन्न एषोर्थक्रियाविशेषकारी कश्चित् मृद्विकारो घट इत्युच्यते नान्यः । स चेत् प्रागपि मृत्पिण्डावस्थायामपि तदाव्यक्तावस्थायामिव तदर्थक्रियोपल्ब्धौ स्या तां । न च भवतस्त-

२ त्का] सांख्यकारिका ।
८ य] ? शय
३१ ङ्का] ? शङ्का

59/s स्मान्नास्त्येवासाविति निश्चयः समाधी यतां किमलीकनिर्बन्धेनेति । अवस्थातुर्भावादसावप्यस्तीति चेदाह । नहि रूपान्तरस्य भावे रूपान्तरमस्ति VN$_{ms}$:6a5 । पीत इव नीलमिति विरुद्धव्याप्तोपलब्धिराकृता । न चावस्थावस्थात्रोरभेदादसिद्धो हेतुरिति गर्जितव्यं । यस्मान्न च रूपप्रतिभासभेदेपि वस्तुभेदो युक्त [ः,] अतिप्रसङ्गात् । रूपप्रतिभासभेदग्रहणमुपलक्षणार्थं । तेनार्थक्रियाभेदोप्यभ्युपगन्तव्यः । एवं मन्यते । यदि भिन्नप्रतिभासि ज्ञानं भेदं साधयति तदा सुखदुःखमोहानां असङ्कीर्णा भेदव्यवस्था भवेत् । नान्यथा तथा च मृत्पिण्डघटयोरपि परस्परमत्यंतम्भेद इति प्रतिजानीमहे । भिन्नाकारज्ञानपरि च्छेद्यत्वात् । परस्परासम्भविकार्यकारित्वाच्चसुखादिवदिति स्वभावहेतू । अन्यथा सुखादीनामपि परस्परमभेदप्रसङ्गः शक्तिव्यक्तिवत् । विशेषो वा वाच्य इति । तस्मादित्युपसंहारः । नहि तस्य घटादेस्तस्मिन्नुपलब्धिलक्षणप्राप्ते स्वभावे स्थितौ सत्यामनुपलब्धिर्युज्यते । अथापि भवति तदाऽस्थितिश्च तस्मिन्स्वभावेऽतत्वमत त्स्वभावत्वमुपलब्धिलक्षणप्राप्तात्स्वभावादेकान्तेन भेद इति यावत् । § 106

एवं स्वभाव[ा]नुपलब्धौ साधनाङ्गसमर्थनं प्रपञ्चेनाभिधाय परिशिष्टास्व-
42a/msK नुपलब्धिष्वाचिख्यासुराह । व्यापकानुपलब्धावि VN$_{ms}$:6a8 त्यादि । धर्मयोर्यथा शिंशपा- त्ववृक्षत्वयोर्व्याप्यव्यापकभावं केनचित्प्रमाणेन प्रसाध्य व्यापकस्य वृक्षत्वादेर्न्निवृत्तिप्रसाधनं समर्थनं साधनाङ्गस्येत्यध्याहारः । यथा नास्त्यत्र शिंशपा वृक्षाभावादिति । ननु तत्र स्वभावानुपलब्ध्यैव तदभावः सिध्यति तत्किमनया । नहि निष्पादितक्रिये कर्मणां विशेषाधायि साधु साधनम्भवति । साधकतमङ्करणमिति पाणिनिः १।४। ४२ वचनात् अनधिगतार्थाधिगमरूपञ्च प्रमाणमुक्तमज्ञातार्थप्रकाशो वेति । सत्यमेत त् । तथाहि नेयं सर्व्वत्र प्रयुज्यते । किन्तर्हि व्योमगतत्रपादिमात्रे यत्र सालसरलपलाशशिंशपादिपादपभेदावधारणन्नास्ति तत्र । सर्व्वथा यत्रैव व्याप्या
60/s भावो न निश्चीयते क्वचित् कुतश्चिद् भ्रान्तिनिमित्तात् तत्रैवेयं प्रयुज्यते । कारणानुपलब्धिरपि यत्र कार्याभावो न निश्चीयते तत्रैव प्रयोक्तव्या ना न्यत्र वैयर्थ्यात् । यथा सन्तमसे धूमाभावानिश्चये नास्त्यत्र धूमोऽग्न्यभावादिति । कार्याभावे संशयात् । कारणाभावे च निश्चयात् । स्वभावविरुद्धोपलब्धिरपि सं गविषयभावावस्थितगात्रस्पर्शवालाकलापाकुलानलालीढ एव व्योमादिमात्रवर्तिनिर्देशे प्रयोक्तव्या । कारणविरुद्धोपलब्धिश्चाप्यदृश्यमान-
42b/msK कमारोमोद्ग मदन्तवीणादिभेदभावाभा वाक्यशक्यगानुसमीपावस्थितपुरुषसमाक्रान्तभूतल एव प्रकृतेनान्यत्र वैफल्यात् । अनयादिसाऽन्यासामप्यनुपलब्धीनाम्प्रयो गविषयोऽनुसर्त्तव्य इति । तेषां स्वभावव्यापककारणानां । विरुद्धास्तेषामुपलब्धयस्तास्विति विग्रहः । द्वयोर्विरोधयोर्मध्ये एकस्योपदर्शनं । द्वौ पुनर्विरोधावविकलका रणस्य भवतोन्यभावे भावः । परस्परपरिहारस्थितलक्षणश्च । अनया दिशा स्वभावविरुद्धकार्योपलब्ध्यादिष्व-

३२ दिसा] ? दिशा

पि साधनाङ्गसमर्थनं सुज्ञानमेवेति नोक्तं । तथा पि किञ्चिन्मात्रप्रयोगभेदादेकादशानुपलब्धिव्यतिरिक्तास्वपि कारणविरुद्धव्याप्तोपलब्धिकार्यविरुद्धव्याप्तोपलब्धिव्यापकविरुद्धकार्योपलब्धिकार्यविरुद्धका र्योपलब्ध्यादिषु साधनाङ्गसमर्थनमुक्तम्वेदितव्यं । तासां पुनरुदाहरणानि यथाक्रमं । नात्र धूमस्तुषारस्पर्शात् । नेहाप्रतिवद्धसामर्थ्यान्यग्निकार णानि सन्ति तुषारस्पर्शात् । न तुषारस्पर्शोऽत्र धूमात् । नेहाप्रतिबद्धसामर्थ्यानि शीतकारणानि सन्ति धूमादिति । § 107

...15 हेतुकार्यविरुद्धाप्तभावो व्यापक कार्ययोः ।
विरुद्धकार्ययोरन्यः प्रतिषेधस्य साधकः ॥ [१५]§ 109

...16 नेह धूमो हिमस्पर्शात् समर्थन्नाग्निकारणं ।
नेह धूमाद्धिमस्पर्शो न शक्यं शीतकारण [१६] मितिति§ 111

[—] सङ्ग्रहश्लोकौ । § 112

एवं तावदेकेन प्रकारेणासाधनाङ्गवचनत्वादिनो निग्रहस्थानमिति प्रतिपादितं । प्रकारान्तरेणापि तदेवोपपादयति । अथवेत्यादि VN$_{\mathrm{ms}}$:6b1 न चेति समुदायश्चायमत्रावृत्या पूर्वोदितार्थपरित्यागेनार्थान्तरसमुच्चये वर्त्तते ॥ नतु धवस्थित्याथवा खदिरमित्यादाविव पूर्व्वार्थपरित्यागेन विकल्पादिवि 43a/msK
धस्याप्यर्थस्य विवक्षितत्वात् । इह च पर्याये साधनशब्दः करणसाधनः । 61/s
इहाङ्गशब्दोऽवयववचनः पूर्वस्मिन्कारणवचन इति विशेषः । त्रिरूपहेतुवचन समुदायग्रहणेन तेषु लक्षणादिवचनानां साधनत्वं तिरयति । स्याद् बुद्धिः साधर्म्यवति प्रयोगेनासपक्षे हेतोरसत्वमुच्यते । वैधर्म्यवति च न सपक्षसत्वमनन्तर मेव निषेध्यमानत्वात् । तत्कथन्तस्यैकस्याप्यवचनमसाधनाङ्गवचनमित्येतन्न वक्ष्यमाणे व्याहतमिति । एतच्च नैवमेव हि व्याख्यायते । त्रिरूपो हेतुरर्थात्मकः । परमार्थतोवस्थितस्तस्य वचने ये प्रकाशके पक्षधर्मवचनं सपक्षसत्ववचने पक्षधर्मवचनं विपक्षसत्ववचने वा तयोस्समुदायः तस्य व चनद्वयसमुदायस्याङ्गम्पक्षधर्मादिवचनमिति पक्षधर्मवदनन्तावदविचलमितरयोः त्वन्यतरान्यतरत् कादाचित्कं । तेन वचनद्वयसमु दायरूपस्याङ्गिनोङ्ग द्विविधमेव सदा तस्येदानीमङ्गस्यैकस्याप्यवचनमसाधनाङ्गम्वचनं । न केवलं द्वयोः प्रथमव्याख्यानुसारेणेत्यपि श ब्दात् । द्वयोर्ह्यवचनं तूष्णीम्भावः । स चोक्तोऽप्रतिभया तूष्णींभावादिति पर्यायान्तरमप्याह । § 113

अथवे VN$_{\mathrm{ms}}$:6b1 त्यादि । तस्यैवेति त्रिरूपवचनसमुदायस्य यन्नाङ्ग ना वयवः । कथं पुनः प्रतिज्ञादीनामसाधनाङ्गत्वमिति चेत् । उच्यते । प्रतिज्ञावचनसाधनं । साक्षात् पारंपर्येण वा तस्याः सिद्धेरनुत्पत्तेः तथाह्यर्थ ए व प्रतिबन्धार्थङ्गमयति । नाभिधानमर्थप्रतिबन्धविकलत्वात् तस्मात् प्रतिज्ञाव-

चनं हेतुवचनं वा न साक्षात्साधनमर्थसिद्धौ । संशयश्च पक्षवचनादर्यै दृष्टो [43b/msK] न निश्चयस्तदतोपि न साक्षात् साधनं । स्यान्मतं संशय एवासिद्धः पक्षवचनाद्वादिप्रतिवादिनोर्निश्चितत्वादथान्येषां भवति । एवं सति कृतकत्वादिवचनेप्यव्युत्पं नानां संशयो भवतीत्यनेकान्तः । तदेतदसम्बद्धं । वादिप्रतिवादिनोर्हि निश्चितत्वमेकस्मिन् वा धर्मेऽनित्यत्वादिके प्रत्याययितुमारब्धे भवेत् प्रत्यनीकधर्मद्वये वा ॥ न तावदेकस्मिन् विवादाभावतः । साधनप्रयोगानर्थक्यप्रसङ्गात् [।] नापि प्रत्यनीकधर्मद्वये वस्तुनो विरुद्धधर्मद्वयाध्यासप्रसङ्गात् । यदाह्येकस्मिन्वस्तुनि प्रमा णबलेन विरुद्धौ धर्मौ वादिप्रतिवादिभ्यां निश्चितौ [62/s] भवतस्तदा तद्वस्तु द्व्यात्मकं प्राप्तं । अथ न प्रमाणसामर्थ्यात् तौ निश्चितावपि तु स्वस्मात्स्वस्मादाग मात् । एवमपि तु धर्मयोः प्रमाणेन निश्चयात् कथन्न पक्षवचनात् संशयो भवतीति वाच्यं । तस्मात् पक्षवचनं न साक्षात् साधनं । नापि पारम्पर्य्येण सा ध्याभिधायकत्वेनासिद्धे हेतुदृष्टान्ताभासोक्तिवदशक्यसूचकत्वात् । हेतुवचनन्तु शक्यसूचकत्वात् शक्तितः साधननिष्टं सदोच्यते साधनाङ्गम्प्रतिज्ञाव चनत्वे सति साधनोपकारकत्वाद्धेतुवचनवत् । साधनविषयप्रकाशनद्वारेण च प्रतिज्ञासाधनमनुगृह्णाति । अन्यथाह्यविषयं तत्साधनं प्रवर्त्तते । ज्ञा नात्ममनःसन्निकर्षादीनामपि साधनोपकारकत्वमतो वचनत्वे सतीति विशेषणं । इतश्च साधनाङ्गसाध्यसाधनविषयप्रकाशनात् दृष्टान्तवचनवदिति । इदमप्यत्यर्थमसारं । यस्मादनित्यं शब्दं साधयेत्यभ्यर्थना वाह्यं वचनत्वे सति साधनोपकारकं साध्यसाधकविपर्ययप्रकाशकञ्च न [44a/msK] च तदन्तरङ्गं साध्यसिद्धा वाङ्गं । को वा विषयोपदर्शनस्योपयोगो यदि ह्यनेन विना न साध्यसिद्धिः स्यात् । सर्व्वसोभेतयावता विनाप्यनेन यावत् । [यः] कश्चित्कृतकः स सर्वोऽनित्यो यथा कुम्भादिः शब्दश्च कृतक इत्यनुक्तेपि पक्षशब्दोऽनित्य इत्यर्थाङ्गमात्र एव । तस्मादस्य निर्देशो निरर्थक एव । स्यादयं विपर्यासो यदि हेतुव्यापारविषयोपदर्शनाय पक्षवद् वचनन्नैव प्रयुज्यते तदा कथम्पक्षसमाश्रयलब्धव्यपदेशा । पक्षधर्मत्वादयः सम्पद्यन्ते । तेषु वा निश्रितात्मसुसम्भूतसामर्थ्यात् पक्षगतिरसम्भाव्यैव । सामर्थ्य लभ्यपक्षबलेन पक्षधर्मत्वादयः सम्पद्यन्त इत्यप्ययुक्तं । तेष्वसत्सु सामर्थ्यलभ्यस्यैव पक्षस्यासम्भवात् । अन्योन्याश्रयं चेदम्पक्षधर्मत्वादिसामर्थ्या यातपक्षवशेन पक्षधर्मत्वादयः सम्पद्यन्ते । पक्षधर्मत्वादिबलेन च पक्ष इति । तदत्रोच्यते । न खलु साधनकाले पक्षधर्मत्वादिविकल्पोऽस्ति केवलं यत्रैव जिज्ञासितविशेषे धर्मिणि शब्दादौ तु च करीशादिस्थगिततेजसि वा कुण्डादौ यो धर्मः कृतकत्वधूमत्वादिलक्षणोनुमानतः प्रत्यक्षतो वा प्रतीयते । प्रत्याय्यते वा । तद्विशेषयोगितया वा निश्चितेऽपरस्मिन्घटमहानसादावस्थितत्वेन स्मर्यते तद्विशेषविरहिणि वा गगनसागरादौ नास्तित्वेनैव स्मर्यते । स वस्तुधर्मतयैव विनापि पक्षधर्मत्वादिव्यपदेशेन तत् धर्मिणं

४ व्युत्पं] ? व्युत्पन्
२१ सोभेत] ? शोभेत

जिज्ञासितधर्मविशिष्टं सामर्थ्यादेव प्रतिपादयति । स चास्य सामर्थ्यविषयः पक्ष इति गीयते । ततः पश्चात् तत्समाश्रयभाविन्यो यथेष्टपक्षधर्मत्वादिसंज्ञाः शास्त्रेषु संव्यवहारार्थम्प्रतन्यन्ते । यदि वा प्रत्यालोचनप्रकरणबलात् साधनका लेपि भवन्तु पक्षधर्मत्वादिविकल्पाः । कथं योहि वस्तुनो धर्मो वादिना 44b/msK विवा[दा]स्पदीभूतधर्मिविशिष्टतया साधयितुमिष्टः स पक्षस्तस्य योन्यो धर्मः स पक्षधर्मः । प्रकृतसाध्यधर्मसामान्येन च समानोर्थः सपक्षः । तद्विरही वासपक्ष इति । यस्यापि हि साधनकाले पक्षप्रयोगोस्ति तस्यापि न 63/s वाद्यकाण्डमेव पक्षं जातेऽनि त्यः शब्द इति । कस्तु प्रस्तावान्तरेनापि प्रकरणबलेनैव पक्षधर्मत्वादयोपि वक्तव्या [ः] । तच्च पक्षप्रयोगदूषकस्यापि समानं । तस्मात्प्रतिज्ञावचनं न साधनां गं । § 114

उपनयनिगमनवचनन्तु यथा न साधनाङ्गन्तथोच्यते ॥ तत्रतावदु दाहरणापेक्षस्तथेत्युपसंहारो न तथेति वा साधनस्योपनयः न्या० सू० १।२।३८ । यथा त थेतिप्रतिबिम्बनार्थं । किम्पुनरत्र प्रतिबिम्बनन्दृष्टान्तगतस्य धर्मस्याव्यभिचारत्त्वे सिद्धे । तेन साध्यगतस्य तुल्यधर्मता । एवञ्चायङ्कृतक इति सा ध्येन सह सम्भव उपनयार्थः । ननु च कृतकत्वादित्यनेन सम्भव उक्तः । नोक्तः । साध्यसाधनधर्ममात्रनिर्देशात् । साध्यसाधनधर्ममात्रनिर्देशः कृतकत्वादनित्यः शब्दो भवति । तत्पुनः शब्दे कृतकत्त्वमस्ति । नास्तीत्युपनयेन सम्भवो गम्यते । अस्ति च शब्दे कृतकत्वमिति । तथा च हेतुवचनाद् भिन्नार्थप्रतिपाद कत्वमुपनयस्याभिन्नरूपत्वे प्रसिद्धपर्यायव्यतिरिक्तत्वे च सति हेतुवचनोत्तरकालमुपादीयमानत्वात् दृष्टान्तवचनवदिति शक्येत अनुमातुं ।
§ 115

हेत्वपदेशात् प्रतिज्ञायाः पूनर्वचनन्निगमनं न्या० सू० १।१।३९ । प्रतिज्ञायाः पुनर्वचनमिति प्रतिज्ञाविषयस्यार्थस्याशेषप्रमाणोपपत्तौ विपरीतप्रसङ्गप्रतिषेधार्थं यत्पुनरभिधानं तन्निगमनं । न पुनः प्रतिज्ञाया एव पुनर्वचनं 45a/msK । किङ्कारणं यस्मात्प्रतिज्ञासाध्यनिर्देशः सिद्धनिर्देशो निगमनमिति । पुनः शब्दश्च नानात्वे दृष्टः [।] पुनरियमचिरप्रभा नि श्चरति । पुनरिदङ्गन्धर्व्वनगरं दृश्यत इति । अत्र च सामर्थ्यादुपनयानन्तरभावी हेत्वपदेशो गृह्यते । न प्रतिज्ञानन्तरभावी । असम्भवात् । नहि कश्चित्प्रतिज्ञा नन्तरं हेत्वपदेशान्निगमनं प्रयुंक्ते । अनित्यः शब्दः कृतकत्वात् । तस्मादनित्यः शब्द इति । अतश्च प्रतिज्ञार्थवाक्याद् भिन्नार्थं निगमनवचनं । प्रतिज्ञावाक्याद् भिन्न रूपत्वे सति हेतुवचनोत्तरकालमभिधीयमानत्वात् दृष्टान्तवचनवत् । न च साध्यार्थप्रतिपादकन्निगमनं । शब्दान्तरोपात्तस्यावधारणरूपेण प्रवृत्तत्वात् । योय मागच्छत्ययं विषाणीति केनचिदुक्ते तस्मादनश्व इत्यादिवचनवत् । तस्माच्छब्दसहितं वाक्यम्विचारविषयाय प्रसाध्यार्थप्रतिपादकन्न भवति । कारणोपदेशोत्तरकालमुपात्तत्वात् । दृष्टान्तः पूर्ववत् । तदेतत् प्रतिषिध्यते न खल्वेवं प्रयोगः क्रियते । अनित्यः शब्दः कृतकत्वात् । प्रतिज्ञाप्रयोग स्यानन्तरं

८ रेना] ? रेणा

निराकृतत्वात् । अपि तु कृतकः शब्दः । पश्चैवं स सर्वोऽनित्यो यथा क-
64/s लशादिः । यो वा कृतकः स सर्व्वोऽनित्यो यथा घटादिः । तथा च कृतकः
शब्द इ त्येवमुभयथा यथेष्टं प्रयोग[ः] क्रियते । साध्यसिद्धेरुभयथापि
भावात् । तत्र यदि कृतकः शब्दो यश्चैवं स सर्व्वोऽनित्यो यथा घटादिरित्य-
45b/msK भिधाय तथा कृत कः शब्द इति प्रतिबिंबनार्थ मुपनयवचनमुच्यते ।
तदेदमनर्थकं विनाप्यनेन प्रतिबिंबनेनानन्तरोक्तप्रयोगमात्रात् प्रतीतिभावात् ।
साधनञ्च यदनर्थकं न तत्साधनवाक्ये विद्वद्भिरुपादेयं । तद्यथा दशदाडिमादि
वाक्यं तथा चानर्थकं प्रतिबिंबनार्थमुपनयवचनमिति व्यापकविरुद्धोपलब्धेः ।
स्वार्थानुमितावप्ययमेव न्यायो दृष्टो नहि कश्चित्सचेतनः कृतकत्वस्य भावं
शब्दे गृही त्वा तस्य चाविनाभावित्वमनुस्मृत्य तथा च कृतकः शब्द इति
प्रतिबिम्बनार्थकरोति । अथापि यः कृतकः स सर्व्वोऽनित्यो यथा घटः ।
तथा च कृतकः शब्द इ ति सम्भवप्रदर्शनार्थमुपनयवचनमुच्यते । तदेत-
द् द्वयमप्यङ्गीकुर्मः । प्रतिज्ञानन्तरभाविनस्तु साधनमात्रनिर्देशमनित्यः शब्दः
कृतकत्वादित्येव न प्रतिपद्यामहे । प्रतिज्ञायाः प्रयोगाभावात् । ततश्चोपनय-
स्यावयवान्तरत्वप्रतिपादनायोक्तो हेतुरसिद्धतोरगदष्टत्वाङ्गतावशक्त एव । यत्
पुनरिदं सिद्धार्थनिर्देशलक्षणं निगमनं पौनरुक्त्यपरिहाराय वर्ण्यते तन्नैवोप-
पद्यते विना निगमनेनार्थसिद्धेरेव पञ्चावयवसाधनवादिनोऽनुपपत्तेः अन्यथा
निगमनात् प्रागेवार्थस्य सिद्धत्वात् व्यर्थतया न साधनाङ्गन्निगमनम्प्राप्नोति
। ततश्च नेदमुपादेयं साधनवाक्ये सिद्धमित्यप्रतिज्ञा । भवेद्व्यामोहो विप्र
तिपन्नस्य प्रमाणान्तरव्यपेक्षा नास्तीति सिद्धमनित्यत्वमुच्यते । निगमनं तु
46a/msK प्रतिविषयस्यार्थस्याशेषप्रमाणोपपत्तावशेषावयवपरामर्शेनावधारणार्थम नित्य
एवेति प्रवर्त्तत इति । यदि तर्हि प्रमाणान्तरव्यपेक्षा नास्ति तत्तर्हि [साध्यं]
सामर्थ्यादवधार्यत एव । तथाहि यदकृतकन्तदनित्यमेव । यथा कुण्डादिश-
ब्दश्च कृतक इत्येवमनि[त्य]त्वाविनाभाविनः कृतकत्वस्य शब्दे भावख्यातौ
तत्सामर्थ्यादेवानित्यः शब्द इति निश्चयो भवति [।] तदस्य वचनं सामर्थ्य
प्रतीतार्थप्रत्यायकत्वात् पुनरुक्तमनु पादानार्हञ्च । न चात्र विपर्ययप्रसङ्ग-
स्य लेशोप्याशङ्क्यते । येन तद्व्यवच्छेदाय सफलमेतस्योपादानं स्यात् ।
अनित्यत्वेनैव कृतकत्वस्य व्याप्तिप्रसाधनात् । प्रयोगस्तु [।] यत्सामर्थ्यात्
प्रतीयते न तस्य वचनम्प्रेक्षावता कर्त्तव्यं । तद्वचनम्पुनरुक्तम्वा तद्यथा
गेहे नास्ति कुमारो जीवति चेत्येतत्सामर्थ्यात् प्रतीयंमानस्य तद्वहि र्भाव-
स्य वचनं । पक्षधर्मान्वयव्यतिरेकतद्वचनसामर्थ्याच्च प्रतीयते तस्मादनित्य
एवेत्येवमादिना पुनः सिसाधयिषितोर्थः प्रथमसाध्यापेक्षया व्यापकविरुद्धोप-
लब्धिर्द्वितीयसाध्यापेक्षया च स्वभावहेतुः । अत एव निगमनस्यावयवान्तर-
त्वप्रतिपादनायोक्ता हेतवोऽसिद्धाः । तदप्येतेनैव प्र त्युक्तं । यदाह । § 116

६ दे] ? दि

...17 प्रत्ययेक्ष प्रतिज्ञादीन्वाक्यार्थप्रतिपत्तये ।
प्रोच्यमानन्निगमनं पुनरुक्तन्न जायते ॥ [१७]§ 118 65/s

...18 विप्रकीर्णोश्च वचनैर्नैकोर्थः प्रतिपाद्यते ।
तेन सम्बन्धसि ध्यर्थम्वाच्यन्निगमनं पृथग् [॥ १८]§ 120
इत्यलमतिप्रसारिण्या कथया ॥ ० ॥ § 121

अन्वयव्यतिरेकयोर्वेति पर्य्यायान्तरकथनमुपादानमिति न्या० सू०
२।१।१२ वर्तते द्वितीयस्यासामर्थ्यं जातायाः सिद्धेः पुनरजन्यत्वात् ।
[प्रमाण-] समुच्चय टीकाकारास्त्वाहुः नन्वि VN$_{ms}$:6b4 त्यादि । ने
VN$_{ms}$:6b4 त्याद्युत्तरः । यदि चेत्युपचयहेतुः । साधनावयवः प्रतिज्ञां
प्राप्नोति नियमेन साध्यप्रतीतिनि मित्तत्वात् पक्षधर्मादिवचनवत् । सन्दिग्ध- 46b/msK
व्यतिरेको हेतुरिति चेदाह । नहि पक्षधर्मवचनस्यापीति VN$_{ms}$:6b6 ।
तत्तुल्यमिति विरुद्धानैकान्तिकयोः पक्षधर्मसद्भावेप्यगमकत्वात् । तत एव-
संसयोत्पत्तेः पक्षधर्मवचनन्न साधनं साधारणादिवचनवदिति चेदाह । ऐतेन
VN$_{ms}$:6b7 तत्तुल्यमित्यादिना संशयोत्पत्तिः प्रत्युक्तेति । एतदेव व्यनक्ति
पक्षधर्म वचनादपीति । तदनेनानन्तरस्य हेतोर्व्यभिचारङ्कथयति । § 122

ननु च पक्षधर्मस्य श्रावणत्वादेरप्रदर्शिते सम्बन्धेनैव साधनावयवत्वमतो
विपक्षत्वाभावान्न व्यभि चारः । प्रदर्शिते तु सम्बन्धे साधनावयवत्वं तदा
च तस्मात् संशयो नास्तीति सुतरान्नानेकान्त इति ॥ एवं मन्यते । प-
क्षवचनेपि तुल्यमे VN$_{ms}$:6b6 तदिति तदपि सा धनं स्यात् । अथ
प्रतिपद्येथा सत्यं स्याद्यदि साध्यं स्यान्न चास्त्यन्यतः साध्यसिद्धः । न च 66/s
निष्पादितक्रिये दारुणि दात्रादयः कश्चनार्थं पुष्यन्ति । अप्रदर्शिते तु संब
न्धे संशयोत्पत्तिहेतुत्वादिदमुक्तन्तत एवसंसयोत्पत्तेरिति । यद्येवं न तर्हि त-
त्प्रयोगमन्तरेण साध्यसिद्धेरभाव इति व्यर्थ एव तत्प्रयोगः स्यात् अन्यथा
कः पक्षवचनं साधनादपाकर्त्तुं समर्थः । ततश्च त्रिरूपलिङ्गा ख्यानं परार्थ
मनुमानमित्याद्याचार्यवचो व्याहन्येत । कथं तर्ह्युक्तं । § 123

पक्षधर्मत्वसम्बन्धसाध्योक्तेरन्यवर्जनमिति नास्ति विरोधः । पक्ष-
धर्मत्वसंबन्धाभ्यां साध्यस्योक्तिप्रकासनमाक्षेपस्तस्मादन्येषां पक्षोपनयवच-
नादीनामुपादेयत्वेन साधनवाक्यवर्जनमि ति व्याख्यानात् । विवरणेप्ययमर्थो 47a/msK
यस्मात् पक्षधर्मत्वसम्बन्धवचनमेवान्वयव्यतिरेकाभ्यामविवक्षितार्थसिद्धिकारणं
युक्तं नान्यत् । तस्मादनुमेयस्योपदर्शनार्थं सिद्ध्यर्थं पक्षवचनमुपादेयं नान्य-
दित्युपस्कारः । पक्ष उच्यते आक्षिप्यते प्रकाश्यते अनेनेति पक्षवचनन्त्रिरूपं
लिङ्गं । आक्षेपो ह्यभिधानतुल्य इति वचनमित्युक्तं वचेर नेकार्थत्वाद्वा ।
अस्माकं तु [।] § 124

१ येक्ष] ?
१३ यो] ? संशयो
२२ यो] ? संशयो
२७ कास] ? प्रकाश

...19 तत्रानुमेयनिर्देशो हेत्वर्थविषयो मत [१९]§ 125
इत्यपि वचनं विरुध्यते । यस्मा § 126

...20 तत्रेति तर्कशास्त्रस्य सम्बन्धोत्राभिधीयते ।
प्रयोगस्य तु सम्बन्धे बहु स्यादसमं जसं ॥ [२०]§ 128

...21 तस्यैव प्रकृतेरुक्तमेतच्चास्यैव लक्षणे ।
परविप्रतिपत्तीनान्निषेधाय विशेषत [॥ २१]§ 130
इत्यलं प्रसङ्गेन ॥ ० ॥ § 131

67/s तद्भावरूपं साधनमङ्गन्धर्मो विषयित्वेन । यस्यार्थस्य प्रस्तुतस्य स साध नाङ्गस्तस्यैवाभिव्यक्तिरुत्तरेण पदद्वयेन ॥ अजिज्ञासितं प्रतिवादिनाऽशास्त्राश्रयव्याजादिभिरित्यादिपदेनासम्बद्धप्रसङ्गपरिग्रहः । प्रक्षे पो नाममात्रेण घोषणं विस्तरेण । यथा बुद्धीन्द्रियदेहकलापव्यतिरेकात्मास्ति नास्तीत्येतावत् मात्रे वुभुस्तिते नैयायिकाः प्रमाणयन्ति । सदाद्यविशेषवि षया विषयज्ञेयविषया मदीयाः प्रत्यक्षादयः प्रत्यया मदीयशरीरादिव्यतिरिक्तसम्वेदकसम्वेद्याः स्वकारणायत्तजन्मवत्वादिभ्यः पुरुषान्तर प्रत्ययवदिति ततः सदनित्यन्द्रव्यवत् कार्यकारणं सामान्यविशेषवदिति द्रव्यगुणकर्मणामविशेष इति महता व्यासेन सदाद्यविशेषाद् व्याचक्षते । नह्यत्र स दाद्यविशेषविषया विषयज्ञेयविषयत्वन्धर्मविशेषणं कथंचिदपि प्रकृतसाध्यसिध्युपकारि । परव्यामोहनानुभाषणशक्तिविघातादिहेतोरित्यत्रादिश ब्देनोत्तरप्रतिपत्तिशक्तिविघातहेतोः परिग्रहः
68/s क्रियमाणः प्रसङ्गो यस्येति विग्रहः । नैरात्म्यवाद्युदाहरणेन किं ज्ञापयति ।
47b/msK यत्र नाम विहितप्रतिसिद्धोवा दिदोषगुणसौगतधर्मविनयस्याप्यहङ्कारनिमित्तसकलोद्ध वादिमलक्षालनायोद्यतमत्रैव नात्मवादिनस्तत्साधने नृत्यगीतादेः प्रसङ्गः । तत्रान्येषामन्यस्य च का ग णना । ननु च वयं बौद्धा ब्रूम इति कथं यावता सविशेषणस्य प्रतिषेधाभिधानात् । अहम्बौद्धो ब्रवीमीति भवितव्यं । यथाहंगार्गोब्रवीम्यहं पटु ब्रवीमि इति न च बहु ष्वेवेतद्बहुवचनमितिपाणिनिः २।४।२१ शक्यमभिधातुँ कश्चिदिति वचनात् । नैव यस्मादसावात्मनि परान् स्वयूथ्यानप्यन्यान्बहूनपेक्ष्य तथा प्रयुक्तवान् । ईदृश्यामेव च वादिनो विवक्षा यामिदमुक्तमुदाहरणं नान्यस्यामिति प्रतिपत्तव्यं [।] अथवा जडशाब्दिकाभिनिवेशनिवारणायेदमेवमुक्तं तथा च व्यर्थता शब्दानुसासनस्य प्रतिपादयि ष्यति । अत एवान्येन महारथेनापीदं प्रयुक्तं ॥

२० तिसिद्धो] ? प्रतिषिद्धो
२४ थाहंगार्गो] ? गार्ग्यो
२९ न] ? नुशासन

...22 त्वं राजा वयमप्युपासितगुरुप्रज्ञाभिमानोन्नता । [२२]§ 133
इति । § 134

सभ्यः साधुसंमतानामित्युपहसति । अहो शब्दश्चेहाध्याह्रियते । द्वादशानाम्प्रमाणादिलक्षणानां यः प्रपञ्चो विस्तरस्तस्य प्रकाशनाय यच्छास्त्रं मीमांसाख्यं तस्य प्रणेता स चासौ जैमिनिश्च तेन प्र तिज्ञातं यत्तत्त्वं नित्यताभिधानं । तस्याधिकरणं यः शब्दः स च घटश्च तयोरन्यतरस्तेन स द्वितीयो 69/s घट इतीत्थं प्रतिज्ञामुपरचय्य द्वादशलक्षणादिव्याख्यानङ्करो ति । प्रमाणलक्षणमेव तावदेकं महता कालेन व्याचष्टे । चोदनालक्षणो धर्म मीमांसा सू० १।१।२ श्चोदनेति क्रियायाः प्रवर्तकम्वचनमाहुश् चोदना हि भूतं भवन्तं भविष्यन्तं सूक्ष्मं व्यव हि तं विप्रकृष्ट... मर्थं शक्नोत्यवगमयितुं नान्यत् 48a/msK किञ्चनेन्द्रियं [।] तथाहि [सत्] संप्रयोगे पुरुषस्येन्द्रियाणाम्बुद्धिजन्म तत्प्रत्यक्षं । अनिमित्तं विद्यमानोपलम्भनत्वादि मीमांसा सू० १।१।४ त्यादिना । संस्कारदुःखतासिद्धिमन्तरेण नानित्यतासिद्धिरप्रतीत्य समुत्पन्नस्य क्षणिकत्वायोगात् । स तर्हि तादृशो धर्मः पृथग्वाच्यो नेत्याह । तथाविधस्त्वित्यादि । एवंविधस्यापि प्रस्तुतसाध्यधर्मनान्तरीयकस्य प्रतिवादिनाऽजिज्ञासितस्य तद्व्यतिरेकेण प्रतिज्ञायामन्यत्र चाहेतुदृष्टान्तयोः कदा पुनरेतदसाधना ङ्गवचनं यथोक्तं निग्रहस्थानमित्याह । प्रतिवादिना तथाभावेऽसाधनाङ्गत्वे प्रतिपादिते सति । यदा तु न प्रतिपादयति तदा द्वयोरेकस्यापि न जयपराजयौ भवत[ः] कुतः साधनानभिधानान्न वादिनो जयः । प्रतिवादिना तथाभावस्याप्रतिपादितत्वाच्च पराजयोपि नास्त्येव । तस्य प्रतिपन्नापेक्षत्वात् । अत एव प्र तिवादिन्यपि तयोरभावः ॥ ४ ॥ § 135

सम्प्रति प्रतिवादिनो निग्रहस्थानमधिकृत्याह । अदोषोद्भावनमित्यादि VN$_{ms}$:7b6 । यत्र विषये जिज्ञासिते अजिज्ञासिते पुनर्दोषस्यानुद्भावनेपि नापराध इत्यभिप्रायः । के पुनस्ते साधनस्य दोषा इत्याह । न्यूनत्वं षट्प्रकारमेकैकद्विद्विरूपानुक्तौ [।] स्यान्मतिः सपक्ष विपक्षयोः सदसत्त्वयोर्यौगपद्येनाप्रयोगे कथञ्च प्रकारात् न्यूनतोच्यते [।] यदा सर्वोपसंहारेण व्याप्तिव्यतिरेकाभ्यान्तदाक्षेपोपि नास्ति तदेयं व्यवस्थाप्यते । अ थोच्यते 70/s तदाप्यप्रदर्शितान्वयव्यतिरेकादिदृष्टान्तदोषो भवति । भवत्वयमपरोस्यापराधो न ह्येकदोषालीढान्येव साधनानि भवन्ति त्रयो हेत्वाभासा दृष्टान्ताभासाश्चाष्टादश न्यायविन्दौ [तृतीये परिच्छेदे] सोदाहरणा[ः] प्रपञ्चेन 48b/msK द्रष्टव्याः । तेषामनुद्भावनं पर्यायशब्दद्वयेन व्याचष्टे । तच्चानुद्भावनं त्रिभिः कारणैरित्याह । ततः पुनः साधनस्य निर्दोषत्वादित्यादि । § 136

ननु च युक्तो निर्दोषे साधने प्रतिवादिनो दोषानुद्भावनान्निग्रहः । सदोषे त्वज्ञानासामर्थ्याभ्यामनुद्भावनेपि दोषस्य दुष्टसाधनप्रयो गाद्वादिन एव पराजयो युक्तो न प्रतिवादिन इति । अत्राह । न हि दुष्टसाधनाभिधानेपीति VN$_{ms}$:7b8 । यद्येवं दुष्टेनापि साधनेन वादिना प्रतिवादिनस्तिरस्कृतत्वात्

११ माहुश्] मीमांसाशबरभाष्ये १।१।२

कस्माज्ज यो न भवति तस्येत्याह । केवलमित्यादि VN_{ms}:7b9 । यद्येवं
किन्न पराजयः । तत्वसिद्धिभ्रंशादिति चोद्यं । नानिराकरणादित्याद्युत्तरं ।
दुर्जनानाम्विप्रतिपत्तिरशोभनो व्य वहारः तस्मान्न योगविहितो न्याय्यः क-
श्चिद्विजगीषुवादो नाम यच्छलादिभिः क्रियत इत्यध्याहारः । उक्ते सति
न्याये तत्वार्थी चेत् प्रतिवादी प्र तिपद्येत तमर्थं न्यायोपेतं । अथ स्वपक्ष-
रागस्य वलीयस्त्वादुक्तेपि न्याये न प्रतिपद्येत । तदा तेन प्रतिवादिना तस्य
न्यायस्यार्थस्याप्रतिपत्तावन्य समीपवर्त्त्यात्मज्ञो जनकायो न विप्रतिपद्येतेति
कृत्वा न्यायानुसरणमेव सतां वाद इति वर्त्तते । तत्वरक्षणार्थमितिपरः ।
यथोक्तं तत्वा[ध्य]वसाय संरक्षणार्थञ्जल्पवितण्डे बीजप्ररोहसंरक्षणार्थं क-
ण्टकशाखावरणवदिति न्या० सू० ४।२।५० । नेत्याद्याचार्यः । एवन्तत्वं
सुरक्षितम्भवति । एकान्तेन प्रतिद्वन्द्युन्मूलनादिति भाव[ः ।] तदभाव इति
साधनप्रख्यापनसाधनाभासदूषणयोरभावे । अन्यथापीति मिथ्याप्रलापाद्य-
भावेपि ॥ ० ॥ § 137

कथमसौ न दोषः साधनस्येत्याह । तस्य दोषत्वे नाभिमतस्य भा-
71/s वेपि सिद्धेर्वि धाताभावात् । साधयितुमनिष्टोप्याकाशगुणत्वादिकार्यत्वेनानित्य-
49a/msK त्वमात्रसाधने ध्वनौ विवक्षिते सति काणादाः केचिच्चोदयन्ति न्यायानभिज्ञाः
। शास्त्रोपगमात् सर्व्वस्तदिष्टः साध्यः । तत्प्रधाने च हेतुप्रतिज्ञयोर्दोष इति
तद्यायुज्यमानं शास्त्राश्रयेप्यस्त्यपगतमात्रस्यैव साध्यत्वात् । अन्यथा गन्धे
भूगुणताविपर्ययसाधनादयमेव हेतुरस्यामेव प्रतिज्ञायां विरुद्धः प्राप्नोति [।]
तथेदमपरमदोषोद्भावनं । यथाह भारद्वाजो नास्त्यात्मेति प्रतिज्ञापदयोः प र-
स्परविरोध इति । यस्मादात्मेति वस्त्वभिधीयते नास्तीति तस्य प्रतिषेधः । इद-
मप्ययुक्तमनादिवासनोद्भूतात्मविकल्पपरिनिष्ठितप्रतिभासभेदस्य श ब्दार्थस्य
72/s परेष्टानित्यचित्तत्वादिविशेषणात्म लक्षणभावोपादानत्वस्य निराचिकीर्षितत्वात् ।
अत्रैव हि धर्मिणि व्यवस्थिताः सदसत्वञ्चिन्तयन्ति सन्त [ः] किमयमात्म-
विकल्पप्रतिभास्यर्थो यथाभिमतभावोपादानो न वेति । न तु पुनरत्रायमेव
विकल्पप्रतिभास्येवार्थोऽपह्नूयते तस्यैव बुद्धावुपस्थाप नाय शब्दप्रयोगात् प्र-
त्यात्मवेद्यत्वाच्च । विकल्पप्रतिबिम्बव्यतिरिक्तं तु बाह्यं स्वलक्षणं नैव शब्दार्थ
इति न तस्य विधिर्नापि प्रतिषेधणं। अन्यथा § 138

...23 परमा चे कतानत्वे शब्दानामनिबन्धना [।]
न स्यात् प्रवृतिरथेषु दर्शनान्तरभेदिषु ॥ [२३]§ 140

...24 अतीताजातयोर्वापि न च स्याद नृतार्थता ।
वाचः कस्याश्चिदित्येषा बौद्धार्थविषया मता ॥ [२४]§ 142
73/s

२८ णं] ? नं

स चायम्विकल्पो भावोपादानत्वेन निराचीकीर्षितो देशकालप्रतिनियतिमनपेक्ष्य विकल्पप्रतिबिंबविषयत्वादेव चात्मशब्दस्य न निर्विषयत्वमस्ति । ततश्च यदु क्तं यच्च यत्र प्रतिषिध्यते तत् तस्मादन्यत्रास्ति । यथा नास्ति नासमानाधिकरणो घटशब्दो न घटाभावं प्रतिपादयितुँ शक्नोति । अपि तु देशकालविशेषात् प्रतिषेधाग ति[ः] । नास्ति घट इति देशविशेषे 49b/msK प्रतिषेधो गेहे नास्ति इति । कालविशेषे वा प्रतिषेधः । इदानीं नास्ति । प्राग्नास्ति । ऊर्ध्वं नास्ति । सर्व्वस्यायं प्रतिषेधो नाननुभूतघटसत्व स्य युक्तः । तथा नास्त्यात्मेति किमयन्देशविशेषः प्रतिषिध्यते । उत्तरकालविशेष इति । यदि तावद्देशविशेषप्रतिषेधः । स आत्मनि न युक्तोऽदेशत्वादात्मनः । न च देशविशेषप्रतिषेधादात्मा प्रतिषिद्धो भवति । न चायम्भवतामभिप्रायः । शरीरमात्मा न भवतीति चेत् । कस्य वा शरीरमात्मा यं प्रति प्रतिषेधः । शरीरे नास्त्या त्मेत्येवं प्रतिषेध इति चेत् । कस्य शरीरे आत्मा यं प्रति प्रतिषेधः । क्व तर्ह्यात्मा । न क्वचिदात्मा । किमयं नास्त्येव । न नास्ति विशेषप्रतिषेधात् । केयं वाचो युक्ति र्न्न शरीरे नान्यत्र । न च नास्ति । एषैवेषा वाचो युक्तिः । यद्यथा भूतन्तत्तथा निर्दिश्यत इति न चायमात्मा क्वचिदपीति । तस्मात्तथैव निर्देशः । न च कालविशेषे प्रतिषेधो युक्तः । आत्मनि त्रैकाल्यस्यानभिव्यक्तेरात्मप्रतिषेधश्च कुर्वाणेनात्मशब्दस्य विषयो वक्तव्यः । न ह्येकं पदं निरर्थकं पश्यामः ॥ अथापि शरी रादिषु आत्मशब्दं प्रतिपद्येथाः । एवमप्यनिवृत्तौ व्याघातः कथमिति । नास्त्यात्मेत्यस्य वाक्यस्य तदानीमयमर्थो भवति शरीरादयो न सन्तीति । एवमादि बह्वसं बद्धं तदपहस्तितम्भवति । प्रतिज्ञार्थैकदेश इत्येतदप्यसत् सामान्यविशेषस्याभावात् । यद्वा न प्रयत्नानन्तरीयकत्वस्य प्रतिज्ञार्थैकदेशता धर्मिणमुपलक्ष्य निवृत्तत्वात् 50a/msK [।] यस्य हि यदुपलक्षकं न तस्य तदेकदेशत्वं यथा न काकस्य गृह्वैकदेशत्वमिति ॥ § 143

74/s

२ २. न्यायमतखंडनम्

75/s

अन्यत्तु न युक्तमिति VN_{ms}:8b5 यदुक्तमक्षपादेन द्वाविंशतिविधं निग्रहस्थानं । प्रतिज्ञाहानिः । प्रतिज्ञान्तरं । प्रतिज्ञाविरोधः । प्रतिज्ञासंन्यासो हेत्वन्तरमर्थान्तरन्निरर्थकमविज्ञातार्थमपार्थकमप्राप्तकालं न्यून मधिकं पुनरुक्तमननुभाषणमज्ञानमप्रतिभा विक्षेपो मतानुज्ञा पर्यनुयोज्योपेक्षणन्निरनुयोज्यानुयोगोपसिद्धान्तो हेत्वाभासाश्च निग्रहस्थानानि न्या० सू० ५।२।१ । तानीमानि द्वाविंशतिविधानि विभज्य वक्ष्यन्ते*। प्रतिदृष्टान्तधर्मानुज्ञा स्वदृष्टान्ते

६ *] न्यायवात्स्यायनभाष्ये ५।२।१ ।

प्रतिज्ञाहानिः । न्या० सू० ५।२। तत्र भाष्यकारमतं दूषयित्वा वार्त्तिककारोयं स्थितपक्षमाह । तमेव ब्रूम इति । भाष्यकारमतस्य भारद्वाजेनैव दूषि तत्वादस्माकमर्द्धन्तावदवसितं भारस्येति भावः । तत्रेदम्भाष्यकारस्य मतं । साध्यधर्मप्रत्यनीकेनधर्मेण प्रत्यवस्थितः प्रतिदृष्टान्तधर्मं स्वदृष्टां तेनुजानन् प्रतिज्ञां जहातीति प्रतिज्ञाहानिः । निदर्शनमनित्यः शब्द ऐन्द्रियकत्वात् घटवदिति कृते पर आह । दृष्टमैन्द्रियकं सामान्यं नित्यङ्कस्मात् न तथा शब्द इति प्रत्यवस्थित इदमाह यद्यैन्द्रियकं सामान्यं कामं घटोपि नित्योस्त्विति । स खल्वयं साधनस्य दृष्टान्तस्य नित्यत्वं प्रसञ्जयन्निगमनानन्त[र]मेव पक्षञ्जहाति पक्षञ्च जहतः प्रतिज्ञाहानिरित्युच्यते । प्रतिज्ञाश्रयत्वात् पक्षस्येति ।* वार्तिककारेण चैवमेतद् दूषितं । *एतत्तु न बुध्यामहे कथमत्र
76/s प्रति ज्ञा हीयत इति हेतोरनैकान्तिकत्वं सामान्यदृष्टान्तेन परेण चोद्यते । तस्यानैकान्तिकदोषोद्धारमनुक्त्वा स्वदृष्टान्ते नित्यतां प्रतिपद्यते । नित्यताप्रतिपत्तेश्चा सिद्धतादृष्टान्तदोषो भवतीति सोयं दृष्टान्तदोषेण वा हेतुदोषेण वा निग्रहो न प्रतिज्ञाहानिरिति । दृष्टान्तञ्च जहत् प्रतिज्ञाञ्जहातीति उपचारेण
50b/msK निग्रहस्थानं । न च प्रधानासम्भवे उपचारो लभ्यत इति प्रतिज्ञाहानेर्मुख्यो विषयो वक्तव्य इति । इदानीम्वार्तिककारमतं स्वयमेवोपन्यस्यति । प्रतिदृष्टान्तस्येत्यादिना VN_{ms}:8b6 कः पुनर त्र दृष्टान्तोऽभिमतो यदि तावत् यत्र लौकिकपरीक्षकानोबुद्धिसाम्यं स दुष्टान्त न्या० सू० १।१।२५ इति पारिभाषिकस्तदा भाष्यकारमतादविषेशस्तत्र च प्रतिविहितं । अथान्यः स न ग म्यत इत्याह । तत्र दृष्टश्चासौ पञ्चावयवेन साधनेनान्ते च निगमनस्य व्यवस्थित इति दृष्टान्तः पक्षः । ततः स्वशब्देन सह विशेषणसमासः । तद्विपरीतः प्रतिदृष्टान्त [ः] । यथाऽनित्यः शब्दः ऐन्द्रियकत्वादिति ब्रुवन्वादी प्रतिपक्षवादिनि सामान्यादिकमैन्द्रियकं नित्यं च । ततोविपक्षेपि वृत्तेर्व्यभिचार्ययं हेतुरित्येवं सामा न्येन प्रत्यवस्थिते सत्याह यद्येवं शब्दोप्येवमस्त्विति एषा प्रतिज्ञाहानिर्नाम निग्रहस्थानं । कस्मात् । प्राग्प्रतिज्ञातस्य शब्दानित्यत्वस्य त्यागात् । प्रतिज्ञाश ब्देन धर्मिविशेषणभूतो धर्म उच्यते समुदायावयवत्वात् । एतत् प्रतिक्षिपति । अत्र भारद्वाज मते उपगतायाः प्रतिज्ञायास्त्यागात् कारणात् । येयं प्रति ज्ञाहानिर्व्यवस्थापिता तस्यां विशेषनियमः किङ्कृतः । कोसावनेन प्रकारेण स्वपक्षे प्रतिपक्षधर्मानुज्ञास्वरूपेण प्रतिज्ञाहानिरिति । स्यात् मतमयमेव प्रति ज्ञाहानिः प्रकारो नान्योस्ति ततो नियमार्थमुच्यत
77/s इति । सम्भवति ह्यन्येनापी ति । अथ मतिः प्रधानमेतन्निमित्तं तस्यास्ततोस्मिन् प्रदर्शितेऽन्योपि प्रकाशित एव भवती ति । तदत्राप्याह । इदमेव च हेतुदोषोद्भावनादिकङ्कारणं यस्मादेवं हेतुदोषोद्भावनादिना प्रतिपादितेन
51a/msK प्रतिवादिना प्रतिज्ञा हातव्या सम्यग्दूषणाभिधानात् । यच्चेद- मभ्यधायि सामान्यं नित्यमैन्द्रिकमित्युक्ते शब्दोप्येवमस्त्वित्यत्र प्रतिविधत्ते । इदम्पुन-

१० *] तत्रैव ५।२।२ ।
१० *] न्यायवार्त्तिके ५।२।२ ।
१८ कानो] ? णां

रसम्बद्धमेव VN$_{\text{ms}}$:9a1 । यस्मात् कः स्वस्थात्मा सामान्योपदर्शनमात्रेण सामान्यमस्ति न चैन्द्रियकन्नित्यश्चेत्येतदविचार्य शब्दं नित्यं प्रतिपद्येत । एतावत्तु भवेत् सामन्यस्यापि नित्यस्यैन्द्रियकत्वे तस्य ऐन्द्रियकत्वस्यानित्येपि घटे दर्शनात् संशयितः स्यात् [।] अपि च प्रतिदृष्टान्तधर्मानुज्ञैवात्र न युक्तेत्याह । न च तद्धर्मं तस्य सामान्यस्य धर्मन्नित्यत्वं यतोऽनित्यः शब्द इति वदता कस्यचिन्नित्यः शब्द इत्ययमशो ति प्रत्यासन्नः प्रतिपक्षः स्यान्न सामान्यन्तस्य धर्म्यन्तरत्वात् । तथा ह्येकाधिकरणयोरेव नित्यत्वानित्यत्वयोर्विरोधो न नानाधिकरणयोः । आञ्जस ग्रहणमयमपि विरुद्धधर्माधिकरणत्वात् प्रतिपक्षो न त्वतिनिकटो यथा नित्यः शब्द इत्ययमिति परिदीपनार्थं । नानेन प्रकारेण प्रतिज्ञाहाने निग्रहार्ह इति वर्तते । केनानेनेत्याह । प्रतिपक्षधर्मानुज्ञया । अथवा अनेनेत्यसाधनाङ्गवचनेन । यथोक्तमिदमेव प्रधानं निमित्तमिति ॥ § 144

78/s

प्रतिज्ञा तार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्देशः प्रतिज्ञान्तरमिति VN$_{\text{ms}}$:9a5 न्या० सू० ५।२।३ द्वितीयलक्षणसूत्रं [।] निग्रहस्थानमिति सर्व्वत्रानुवर्तते । अस्यार्थः प्रतिषेधो विपक्षे हेतुसद्भाव कथनं तस्मिन्सति सपक्षविपक्षयोर्द्धर्मभेदेन करणभूतेन पूर्व्वप्रतिज्ञार्थप्रतिपत्यर्थं प्रतिज्ञान्तरङ्करोति । यथा घटोऽसर्वगत एवं शब्दोप्यसर्व्वगतो घटवदेवा नित्यः शब्द इति शेषः सुज्ञानः । इदं निराकरोति अत्रापी VN$_{\text{ms}}$:9a8 त्यादिना । अविद्धकर्णस्तु भाष्यटीकायामिदमाशङ्क्यपरिजिहीर्षति [।] ननु चासर्व्वगतत्वे सतीति । हे तुविशेषणमुक्तं । सविशेषणश्च हेतुर्विपक्षे नास्तीति न प्रतिज्ञान्त- 51b/msK
रं निग्रहस्थानं । नहि तदेवमसर्व्वगतः शब्द इति प्रतिज्ञान्तरोपादानात् । हेतुविशेषणोपादाने हेत्वन्तरं निग्रहस्थानमिति । एतच्चातिस्थूलं । स ह्येवं पक्षधर्ममेव विदग्धबुद्धिर्विशिनष्टि न तु प्रतिज्ञान्तरमुपादत्ते सिद्धत्वात् । यदपि हेतुविशेषणोपादाने हेत्व न्तरन्निग्रहस्थानमित्यभ्यधायि तदप्यतिपेलवं । यस्मादेवं तदेव नामास्तु प्रतिज्ञान्तरत्वसम्बद्धं । उदाहरणसाधर्म्यादिश्चेति । उदाहरणसाधर्म्यात्साध्यसाधनं हेतु न्या० सू० १।१।३४ रित्येतस्य प्रतिज्ञालक्षणस्य साध्यनिर्देशः प्रतिज्ञेत्येतस्याभावात् । उपादवता चानेन प्रतिज्ञां प्रतिज्ञासाधनाय प्रतिज्ञामात्रेण युक्तिरहिते न सिद्धिरिष्टा भवति । 79/s
ततश्च प्रागपि प्रथमप्रतिज्ञानन्तरमपि हेतुमैन्द्रियकत्वन्न ब्रूयात् । तस्मादेवं प्रकाराणाम्बालप्रलापानां प्रतिज्ञासाधनाय प्रति ज्ञान्तरमुच्यत इत्येवं रूपाणां प रिस ङ्ख्यातुमसक्यत्वात् लक्षणनियमोप्यसम्बद्ध एव । कोसौ । प्रतिज्ञान्तराभिधाने प्रतिज्ञान्तरं नाम निग्रहस्थानमिति । § 145

ननु नायमीदृशो लक्षणनियमः प्रतिज्ञातार्थप्रतिषेधे धर्मविकल्पात्तदर्थनिर्देश इत्येवं कृतत्वात् । नास्ति दोषस्तस्यैव पर्य्यायान्तरेण कथनात् ।

६ शो] ? से

३१ स] ? श

अथोच्यते य था विद्वांसो न प्रतिज्ञां प्रतिज्ञासाधानयाहुस्तथा साध्यसिध्यर्थमसिद्धविरुद्धानैकान्तकादीनपि प्रयुञ्जते ततश्चासाधनाङ्गवचनमित्यादि त्वयापि न वाच्यं भवेदतः प्राह [।] विदुषामपी VN_{ms}:9b6 ति । अनुद्दिश्याप्रमाणकं 80/s शास्त्रोपगममिति मामकीने तन्त्रे सामान्यं यथा भूतं सिद्धमित्येव न प्रद- 52a/msK र्श्यत[इ]त्यर्थः । तथाहि व्युत्थित चेतसो न परसमयव्यवस्थोपरोधमाद्रियन्ते तत्वदर्शनाध्यवसायशूराः शूरयः । अप्रमाणकम्वचनं प्रमाणोपेतस्याभ्युपगमस्य विद्वद्भिरलङ्घनीयत्वात् । एतच्च स्या त् प्रमाणैरसमर्थितसाधनाभिधानाद्वाद्यपि जेता न भवति प्रतिपक्षस्य निराकरणात् ॥ ४ ॥ § 146

प्रतिज्ञाहेत्वोर्विरोधः प्रतिज्ञाविरोधो न्या० सू० ५।२।४ VN_{ms}:9b10 नाम निग्रहस्थानं । गुणव्यति रिक्तं द्रव्यमिति प्रतिज्ञा । रूपादिभ्योर्थान्तरस्यानुपलब्धेरिति हेतुः । सोयम्प्रतिज्ञाहेत्वोर्विरोधः । यदि गुणव्यतिरिक्तं द्रव्यं रूपादिभ्येऽर्थान्तरस्यानुपलब्धिर्नोपपद्यते । अथ रूपादिभ्योर्थान्तरस्यानुपलब्धिर्गुणव्यतिरिक्तं द्रव्यमिति नोपपद्यते । एतेनैव प्रतिज्ञाहेत्वोर्विरोधेन प्रतिज्ञाविरोधः स्ववचनेन व्याख्यात [।] सूत्रकारेणास्योपलक्षणार्थमुक्तमेतत् । श्रमणा VN_{ms}:10a1 प्रतिविरतपुरुषसम्भोगा गर्भश्च नान्तरेण पुरुषसम्भोगमिति स्ववचनव्याहतिः । हेतुविरोध एतेन चोक्त इति वर्तते । सर्व्वं पृथग् नाना नास्त्येको भाव इति यावत् । समूहे भावसब्दप्रयोगात् समूहवाचकघटादिभावशब्दवाच्यत्वादित्यर्थः । यस्मात् समूह इ ति ब्रुवाणेन एकोभ्युपगतो भवति । एकसमुच्चयो हि समूह इति । तथा हि गवादिद्र- 81/s व्याणि समुदितानि प्रतिपद्यमानेन समूहोभ्युपेयः । स चायं समूहयन्ति द्र व्याण्येतानि गवादिभावेन व्यवस्थितानीति न व्यवतिष्ठते । भेदोप्यल्पतरतमत्वेन यत्तत्र परमाल्पं यदभेद्यं ततो निवर्त्तते यतश्चायं भेदो निवर्त्तते तदेकं । अथ म न्यसे यं तमभेद्यं परमाणु मन्यसे सोपि रूपादीनां समुदाय इति । एतस्मिन्वै दर्शने ये रूपादयः समुदितास्ते परमाणुरिति परमाणौ 52b/msK रूपं स कस्य समुदाय इ ति वक्तव्यं । एवं शेषेषु गुणेषु । अथ न तं समुदायम्प्रतिपद्यसे । अष्टौ द्रव्याणि समुदितानि परमाणुरिति शास्त्रं व्याहतं । कामेऽष्टद्रव्यकोऽशब्दः परमाणुरिति अभिधर्मकोशे २।२२ । तस्मादनुपपत्तावनेकोपपत्तिरित्यतिमौढ्यं । असिद्धश्चायं हेतुः । यस्मादनेकविधलक्षणैर्गन्धादिभिर्गुणैर्बुध्यादिभिश्चावयवैः सम्बद्ध एको भाव उपपद्यते । अतः शब्दादेकार्थाधिगतौ शेषोनुसक्तोर्थो गम्यत इति । § 147

ननु चायमपि प्रतिज्ञाहेत्वोर्विरोध इति प्रथमादस्याविशेषः । मैवमुभयाश्रित त्वात् विरोधस्य । विवक्षातो ऽन्यतरनिर्देश इति भारद्वाजे नैवोक्तत्वात् । प्रतिज्ञाया दृष्टान्तविरोधो यथा व्यक्तमेकप्रकृतिकं परिमितत्वात् शरावादिवदिति शरावादिर्दृष्टान्त ए कप्रकृतित्वं बाधते । दृष्टान्तभूतायाः प्रकृतेः प्रकृत्यंतरत्वात् । एकप्रकृतित्वे वा शरावादिर्दृष्टान्तोऽयुक्तः । हेतोश्च दृष्ट-

६ शू] ? सू
१७ ब्द] ? शब्द
३० क्तो] ? षक्तो

न्तादिभिर्विरोधो यथा गुण व्यतिरिक्तं द्रव्यमर्थान्तरत्वेनानुपलभ्यमानत्वात् ।
घटादिवदिति । घटादीनाम्भेदेन ग्रहणाद्धेतुं बाधते दृष्टान्तः । आदिग्रहणेन
हेतोरुपनयनिगम[न]आभ्यां विरोधो गृह्यते । अनयोरुदाहरणमनित्यः शब्दः
कृतकत्वात् । यत्कृतकन्तदनित्यं यथाकाशन्तथा च कृतकः शब्द इत्युपनयेन
हेतोर्विरोधः । तथा ह्युदा हरणा पेक्षस्तथेत्युयुपसंहारो न तथेति चेति न्या०
सू० १।१।३८ साध्यस्योपनय उक्तः । इह च विपरीतमुदाहरणमित्येत-
दपेक्षोपनयेन हेतोर्विरोधः । ईदृशे च प्रयोगे त स्मादनित्य इत्युपसंहारे
निगमनेन । प्रमाणविरोधश्च प्रतिज्ञाहेतोर्यथाऽनुष्णोग्निर्द्रव्यत्वाज्जलवदिति प्र-
त्यक्षम्बाधते । परपक्ष VN$_{ms}$:10a2 इत्यादि । एतच्च यच्च स्वपक्षा नपेक्षञ् 53a/msK
चेत्यादि VN$_{ms}$:10a3 । एतदप्युभयम्प्रतिज्ञाहेतोर्विरोध इत्यनेनैव सङ्गृहीत-
त्वात् पृथग् निग्रहस्थानत्वेन नैव वक्तव्यमिति दर्शयति । परपक्ष इत्यत्र
परेणप्र माणे कृते कणा दोऽनैकान्तिकमुद्भावयति । स्वपक्षानपेक्षश्चेत्यत्र तु 82/s
वैशेषिक एव प्रमाणङ्करोति । परस्तं व्यभिचारयतीति भेदः । यदि तर्हि गो
त्वादिना व्यभिचारे कृते विरुद्धमुत्तरं तथा सत्यनैकान्तिको निर्विषय इत्याह
। उभयेत्या VN$_{ms}$:10a4 दि । वादिप्रतिवादिप्रसिद्ध उभयपक्षसंप्रतिपन्नः
सोऽनैकान्तिकस्तद्विषयत्वादुप चारेण तथा च वृत्तिस्तेनानैकान्तिकचोदनेति
। अत्रापी VN$_{ms}$:10a3 त्यादि । नैतदपि प्रतिक्षिपति तदाश्रयः सा प्र-
तिज्ञाऽश्रयो यस्य विरोधस्य स तथा । तत्कृतो वेति त या प्रतिज्ञया कृतः
। परिशिष्टमतिस्फुटं । व्यतिरिक्तानामपि कुतश्चित् पर्वतादेः सकाशाद्विप्रक-
र्षिणाम्पिसाचादीनां तत्रेदमेव निग्रहाधिकरणं । यदुत प्रतिज्ञायाः प्रयोगः । न
विरोधः प्रतिज्ञायाः निग्रहाधिकरणमिति वर्तते । किमिति । तदधिकरणत्वात्
। प्रतिज्ञाश्रयत्वात् इत्यर्थः । यदि पु नस्तदधिकरणो न भवेद् भवेन्निग्र- 83/s
हाधिकरणमित्याह । यदी VN$_{ms}$:10b1 त्यादि । प्रस्तावस्य वादस्योप-
संहारः परिसमाप्तिस्तस्यावसानन्निमित्तं प्रतिज्ञाप्रयोगः । तन्मात्रेणै वासाध-
नाङ्गाभिधानात् वादिनोभङ्गात् । क्वचित्प्रस्तावोपसंहारावसरत्वादिति पठ्यते
। तत्रापि वादपरिसमाप्तेः प्रतिज्ञापदप्रयोगे सत्यवसरोऽधिकार इत्यर्थः ।
अथ बुद्धिर्यथा भवद्भिः कस्यचिदर्थस्य क्षणिकत्वादिकमेकमेव साध्यं बहुभिः
सत्वोत्पत्तिमत्वप्रत्ययभेदभेदित्वादिभिर्हेतुभिः प्रतिपाद्यते तथैक मपि दूष्यम्प-
रोपन्यस्तं साधनवाक्यं प्रतिज्ञोपादानद्वारेण तद्विरोधद्वारेणान्यथा वा दूष्यते ।
तथा च नायन्दोषः पराजितपराजयाभावादिति । तदत्राह । ये तु हेतवः उच्य-
न्ते VN$_{ms}$:10b2 तेषाम्विकल्पेन पूर्वहेत्वनपेक्षया । एवं वैतत् । अथवान्यथा
साधयामीत्येतत् साध्यसाधनाय वृत्तेः कारणात्सामर्थ्यमस्ति [।] किं पुनः
कारणं न समुच्चये नैव प्रयोग इत्याह । अन्यथा यदि VN$_{ms}$:10b3 समुच्च-
ये नैवापरहेत्वन्तरप्रयोगोभीष्टस्तदा द्वितीयस्य वैयर्थ्यात् विकल्पेन सामान्य-
मिति वर्तते । वैयर्थ्यमेव प्रतिपादयति । यदि हि तत्रा प्येकप्रयोगमन्त-
रेणापरस्य प्रयोगो न सम्भवेत् । उभयप्रतिषेधेन विध्यवसायात् । यद्येकस्य

२० र्षिणाम्पिसा] ? शा

प्रयोगेऽपरस्य समुच्चयेन प्रयोगः सम्भवेदि त्यर्थः । तदा न द्वितीयस्य कश्चित् साधानार्थो प्रतीतप्रतिपादनाभावात् । प्रथमहेतुप्रतिपादित एवार्थे व्यापृतत्वान्निष्पादितक्रिये दारुणि प्रवृत्त स्यैव दात्रादेर्न कश्चित्साधकतमत्वार्थ इति यावत् । ननु च साधनवद्विकल्पेनैव दूषणमपि भविष्यति । एवं मन्यते । नैवं परोभ्युपगन्तुर्महति । ए वं हि तेन स्वयमेव प्रतिज्ञाया असाधनाङ्गत्वम्प्रतिपन्नम्भवेत् । ततश्चैतद् व्याहन्यते । प्रतिज्ञाहेतूदाहरणोपनयनिगमनान्यवयवा न्या० सू० १।१।३२ इति । अन्यैरेव हेतुभिरित्यव यविद्रव्यनिषेधकैः पूर्व्वोक्तप्रकारैः कुम्भादिशब्दस्यैकघटाद्यवयविद्रव्यलक्षणविशेषानभिधान-
84/s मनेकस्य चार्थस्य रूपादेर्यत्सामान्यमेकार्थ क्रियासामर्थ्यात्म कन्तदभिधानश्च प्रतिपाद्य सर्व्वस्य शब्दार्थस्य रूपादेरेकार्थक्रियासमर्थस्य नानार्थरूपत-
54a/msK या करणभूतया । एकश्चासौ वस्तुविशेषस्वभावश्चावयविद्रव्यरूपस्त स्य भाव एकवस्तुविशेषस्वभावता तस्या अभावमुपदर्शयन्नास्त्येको भाव इत्यभिद ध्याद् बौद्धो न तु रूपाणीन्द्रियार्थान् प्रतिक्षिपन् । स्यात् मती रूपाद्यव्यतिरेकात् सामर्थ्यमप्यनेकं तत्कथन्तदेकमित्युच्यते कथं वा तस्य शब्दार्थत्वं । नहि स्वलक्षणं शब्दार्थ इत्युच्यते । नानाभूतमपि सामर्थ्यभिन्नवत्स्वव्यतिरेकादेकार्थक्रियाकारितयैकप्रत्यवम र्षहेतुत्वात् परम्परयैकमित्याख्यायते । यथोक्तम् । § 148

...25 एकप्रत्यवमर्षस्य हेतुत्वाद्धीरभेदिनी [।]
एकधा हेतुभावेन व्यक्तीनामप्यभिन्नतेति ॥ [२५]§ 150

पुरुषाध्यवसायानिरोधे न शब्दार्थत्वं तस्य व्यवस्थाप्यते । पुरुषोह्यनादिमिथ्याभ्यासवासनापरिपाकप्रभावादन्तर्मात्राविपरिवर्तिनमाकारं बाहयेष्वेवारोप्य दृश्यविकल्पयो रेकत्वम्प्रतिपन्नः परमार्थतस्तु निर्विषया एव ध्वनयः । व्यक्तीनाम्विज्ञानाकारस्य चार्थान्तरानुगमाभावेनाभिलापागोचरत्वात् । यथाध्यवसायश्चाका रस्य सत्वात् । यथोक्तं सूत्रे ॥

...26 येन येन हि नाम्ना वै यो यो धर्मोभिलप्यते ।
न स सम्विद्यते तत्र धर्माणां सा हि धर्मतेति ॥ [२६]§ 153

तदयमत्र समदायार्थो रूपादी नाङ्गटस्य च यथा क्रममनेकत्वमेकत्वश्च वहुवचनैकवचनाभिधयत्वात् [।] तद्यथा नक्षत्राणि शशीत्येवमादिभिरनुमानाभासैः परेण घटादिशब्दस्य विषयो योयमेकार्थोऽवयव्यभिधानोभ्युपगतः स एव प्रतिक्षिप्यते । नतु रूपरसादयः परमाणुस्वभावास्तथा हि तेषाम्प्रत्येकमेकैकात्मकत्वमिष्टमेव । केवला स्तदातिसफलबीजवन्न समुदायमासादयन्तीति नियतसहोत्पादत्वपरिदीपनायोक्तं ॥

...27 कामेष्टद्रव्यकोऽशब्दः परमाणुरतीन्द्रियः [।]

कायेन्द्रियो नवद्रव्यो दशद्रव्योऽपरेन्द्रिय इति । [२७]§ 156 54b/msK
अभिधर्मकोशे २।२२ § 157

यथा तु परमाणूनामैन्द्रियकत्वमनित्यत्वञ्च तद्विस्तरेणोक्तमन्यत्रास्माभिः । यत्पुनरेतद्बहुवचनैकवचनाभिधेयत्वादिति तद्व्यभिचा रि । तथाहि यदैकस्यामपि योषिति जले सिकताद्रव्ये वा दारा आपः सिकता इति व्यवहारः 85/s । तदा किन्तत्र बाहुल्यं येनैवं भवति शक्तिभेद इति चेत् । सर्व्वत्रोच्छिन्नमिदानीमेकवचनमेकशक्तेरभावात् । वस्त्वभेदादन्यत्रैकवचनमिति चेत् । इहाप्यस्तु । तदयन्निर्वस्तुको नियमः क्रियमाणः स्वातन्त्र्यमिच्छायाः शब्दप्रयोगे ख्यापयति । एतेन तदपि प्रत्युक्तं यदाह कुमारिलः [।]

...28 तत्र व्यक्तौ च जातौ च दारादिश्चेत्प्रयुज्यते ।
व्यक्तेरवयवानाम्वा संख्यामादाय वर्तत [२८]§ 160

इति ॥ षण्णगरीति च कथम्वहुष्वेकवचनं । नहि नगराण्येव किञ्चित् कुतस्तेषां समाहारः । प्रासादपुरुषादीनां विजातीयानामनारम्भात् कुतस्तत्समु दायो द्रव्यं असंयोगाच्च नापि संयोगः । प्रासादादीनां परस्परसंयोगात् । प्रासादस्य स्वयं संयोगात्मकस्य निर्गुणतयापरेणासंयोगाच्च । तत एव च संख्याभावः । तत्संयोगपुरुषविशिष्टा सत्ता नगरमिति चेत् । किमस्यानिरतिसयाया विशेषणं सत्तायाश्चैकत्वात् नगरबहुत्वेपि नगराणीति बहु वचनं स्यात् [।] द्वयस्य परस्परसहिततेति चेत् । अनुपकारकयोः कः सहायीभावः । पुरुषसंयोगसत्तानां च वहुत्वान्नगरमिति कथमेकवचनं । तथा भू तानां क्वचिदभिन्ना शक्तिः सा निमित्तमिति चेन्न । शक्तेर्वस्तुरूपाव्यतिरेकात् । व्यतिरेके चानुपकार्यस्य पारतन्त्र्यायोगात् । उपकारे वा शक्त्युपकारिण्या अपि श क्तेर्व्यतिरेक इत्यवस्थितेरप्रतिपत्तिः । तदव्यतिरेके अन्यासा- मपि 55a/msK प्रसंग इति यत्किञ्चिदेतत् । प्रकारान्तरमप्याह । दृष्टोपदर्शन श्चे तदिति । किं पुनः पञ्चम्यन्त निर्देशेपि दृष्टान्तो भवतीत्याह । कृतकानित्यत्वादि VN$_{ms}$:10b7 ति यथा येनोक्तं ।

...29 हेतोः साध्यान्वयो यत्राभावेभावश्चकथ्यते ।
पञ्चम्या तत्र दृष्टान्तो हेतुस्तूपनयाऽ त्मक [२९]§ 163

इति ॥ क्वचिदर्थे घटादिद्रव्ये विप्रतिपत्तौ सत्यां रूपादिव्यतिरिक्तमस्ति नास्तीत्यनेकस्यार्थस्य परस्परव्यावृत्तस्य नगरादेः सामान्यं षण्णगरीत्यादि यद् बुध्यारोपितं तत्र प्रसिद्धं शब्दप्रयोगमादर्श्य परस्परव्यावृत्तानामेकार्थान- 86/s नुगतानां बुद्धिसमाकृते समूहे भावशब्दप्रयोगादित्यनेन पश्चा दुपनयेन पक्षधर्मोपसंहारमागूर्य प्रतिपादितविप्रतिपत्तिस्थानः सन्सामान्येनोपसंहरति । सर्व्वं पृथगि VN$_{ms}$:10b8 ति । प्रतिपादितं प्रतिपत्तिस्थानम नेनेति विग्रहः । एतदुक्तम्भवति । कपालादिव्यतिरेकेनावयव्यस्ति नास्तीति विवादे सत्ययं

---

१७ तिस] ? श
३४ तिरेकेना] ? णा

त्रिलक्षणहेतुसूचनपरो दृष्टान्त उपन्यस्तो न हेतुः । प्रयोगस्त्वत्रैवं क्रियते । ये परस्परव्यावृत्ता न ते व्यतिरिक्तैकावयविद्रव्यानुगतमूर्त्तयः । तद्यथा षण्णगर्यादयः । तथा च परस्परव्यावृत्ताः कपालादय इ ति ॥ § 164

ननु च यद्ययं दृष्टान्तप्रयोगस्तत्किमृजुनैव तत्प्रयोगक्रमेण न प्रयुक्तो यथा यत्सत् तत्क्षणिकं यथा घट इत्यादौ । किम्पश्चम्यन्तनिर्देशेन । विप्रतिपत्ति विषयश्च किन्न दर्शितः कपालादेरवयविप्रतिषेधविशिष्टः । यथान्यत्रानित्यः शब्दः कृतकानित्यत्वादिति । चकारात् स्पष्टश्च कस्मात् हेतुः साध्यानुगतो
55b/msK न प्रद र्शितः । तथाह्यत्र परस्परव्यावृत्तानामेकार्थाननुगतानां बुद्ध्या समाहिते समूहभावशब्दप्रयोगादित्यभ्यूह्य वाक्यपरिसमाप्तिः क्रियते । अत्रोत्तरं न समासनिर्दे शात् संक्षेपाभिधानादित्यर्थः । एवमपि प्रयोगदर्शनात् कृतकानित्यत्वादित्यादौ । असाधनं वाक्यत्वाच्च साधनप्रयोगोत्प्रेक्षासूचकं वाक्यमेतत् । नत्विदं साधनवा क्यमित्यर्थः । अत एवेति दृष्टान्तवाक्यत्वादेवेति । यश्चायं हेतुस्तन्तुपटरूपे भिन्नकारणे विशेषवत्त्वाद्रूपस्पर्शवदिति ॥ अयमपि तन्तुपटयोर्भेदासिद्धौ तदा श्रितस्यापि गुणस्य विभागासिद्धेरसिद्धाश्रय इति नालमिष्टसिद्धये । तथा हि सूक्ष्मस्थूलद्रव्यसमवायो विशेषवत्त्वं भिन्नकालोत्पन्नद्रव्यसंवाया वेति व्याचक्षते । § 165

परे । ननु विचित्राभिसन्धयः योक्तारः । तत्र ये केचिद्धेत्वभिप्रायेनैव वाचः प्रयुञ्जते तान्प्रत्यस्माभिः प्रतिज्ञया हेतोर्बाधनमु च्यते न तु ये दृष्टान्ताभिमानिन इत्यत्राह [।] नचे VN$_{ms}$:10b9 त्यादि । भगव त्तथागत मतावलम्बिनामुपर्ययमुपक्षिप्तो विरोधो भवद्भि राक्षपादै र्न च नः स्वप्न व्ये तादृशोस्तीति पिण्डार्थः । स्यात् मतमस्त्येव योगाचारो यः [—] § 166

87/s

...30 पङ्केन युगपद्योगात् परमाणोः पतङ्गतां ।
षण्णां समानदेशत्वात् पिण्डः स्यादणुमात्रक [ः ॥ ३०] § 169

इ त्यादिना परमाणोरेकत्वमनभ्युपगच्छन्नपि पिण्डं समूहापरपर्यायमिच्छतीत्येतदुच्यते । योपी VN$_{ms}$:11a1 त्यादि किन्तर्ह्यभाव एवाणोरनेन प्रकारेण साधयितु मिष्टः । कथं । एकानेकप्रतिषेधात् । पङ्कायोगादिना तावदेकत्वं प्रतिसिद्धं । तत्समुदायरूपमनेकत्वमपि तदभावादेव न विद्यते । यथोक्तन् ननु [।]

56a/msK ...31 तस्य तस्यै कता नास्ति यो यो भावः परीक्ष्यते ।
न सन्ति तेनानेकेपि येनैकोपि न विद्यत [३१] § 172

इति ॥ ननु पङ्कयोगादिना कथमेकत्वमपोदितं । यावता तत्र तस्य सावयवत्वमापादितं ॥ त एव चावयवास्तस्याल्पीयांसः परमाणवो वि

१७ भिप्रायेनैव] ? णैव   २८ तिसि] ? षि

भागपर्यवसानलक्षणत्वात् परमाणूनां । अथ तेषामप्यङ्गानामनेनैव विधानेन सावयवत्वमापाद्यते । तथा सति तत्राप्येतदेवोत्तरमित्यनेनैव प्रकारे ण न शक्यते परमाणोरेकत्वनिषेधं कर्त्तु । विभागस्य विभज्यमाणतन्त्रत्वात् । कथश्चानभ्युपगताणुस्तस्य षड्कयोगादिकमभ्युपगच्छतीति त दसत्त्वप्रतिपादने सर्वे हेतवः स्वत एवाश्रयासिद्धा इति । एतच्च नैवं यस्मात्समर्था वादिनोऽपगतावयवविभागमासादितापकर्षयन्तं भाव मणुरित्याचक्षते तस्य तेन षड्कायोगादिनैकत्वमपाक्रियते । ते च यद्येवं निराकृताः सन्तो यथोपगतस्य सावयवत्वं प्रतिपद्यन्ते तदा स्व प्रतिज्ञायाश्च्यवेरन् । न हि अनङ्गीकृतसावयवत्वास्तथा प्रत्यवस्थानमर्हन्ति । त एवावयवाः सन्तु परमाणव इति । तैरेव च तल्लक्षणम्व्यवस्थापनीयं योगाचा रे ण च निषेध्यमिति निगृह्यन्ते । अत एव नानवस्था । प्रसङ्गसाधनत्वाच्चासिद्धतादोषोपि नास्तीत्यलमेतेन । अथोच्यते न वयं भवन्तं प्रतीदं ब्रूमो यस्तु कश्चिदधौ तपादो वाद्येवं 88/s प्राह तम्प्रतीति । तच्चासत्सर्वं पृथग्भावलक्षणपृथग्त्वात् नानेकलक्षणेनैकभावनिष्पत्तेरित्यत्र प्रस्तावे भारद्वाजे नास्मान्प्रत्येव कामेष्टद्रव्य क इत्यादिना 56b/msK सिद्धान्तमस्माकीनमुपक्षिप्याप्यभिधानात् । तथाप्यभ्युपगम्य दोषान्तरमाह । न चायम्पूर्वकाद् गुणव्यतिरिक्तमित्यादिपदसूचितात् परस्परार्थमा धाय भिद्यते । हेतुप्रतिज्ञयोः सम्बन्धिन्योः बाधयोरुदाहरणोपेतयोः पृथग्बाधोदाहरणयोर्न कश्चिदर्थभेदः शब्दभेदस्तु केवलः । तथाविधस्य च पृथगुदा हरणेऽतिप्रसङ्गोऽकृतकः शब्दः कृतकत्वादित्याद्यप्युदाहर्त्तव्यम्भवेत । सह पृथग्वेति क्वचित्पाठः । तत्रायमर्थः सह यौगपद्येन यथा प्रथमे पृथक् प्रत्येकं । य थेह अथवा विरोधचिन्ताप्यत्रायुक्तेत्याह [।] अपिचे VN_{ms}:11a5 त्यादि । सर्वं पृथक् समूहे भावशब्दप्रयो[गा] दित्ययं हेतुः । सर्वस्य धर्मिणो धर्म एव न भवति शब्दधर्म त्वादित्यसिद्धः । तथा च व्यधिकरणत्वादसिद्धतैव दोषो गुडो मधुरः काकस्य कार्ष्ण्यादिति यथा । तत्र न विरोधो भिन्नाधिकरणत्वाद्धेतुप्रतिज्ञार्थयोः । स्याद् बुद्धिः समूहवाचकशब्दवाच्यत्वादित्येवं भाविविक्तेन भाष्यटीकायां प्रयोगाद् व्यधिकरणत्वं नास्ति । एवं मन्यते न तावदय मु द्योतकरे णेवं प्रयुक्तस्य वायमस्माभिर्दोषोभिधातुमारब्धो येपि सम्प्रत्यन्यथा प्रयुञ्जते तेषामपि यद्ययं दोषो न भवति । भवतु अनन्तरोक्तस्तु दोषो वक्ष्य माणश्च ब्रह्मणाऽपि न शक्यते परिहर्तुमिति । प्रतिज्ञाहेत्वोर्विरोधस्य च निग्रहस्थानान्तरत्वमङ्गीकृत्य मयेदमभ्यधायि । न त्वस्य तद्युक्तं । हेत्वाभासाश्च निग्रह स्थानानी न्या॰ सू॰ ५।२।२४ त्यनेनैव सङ्गृहीतत्वादित्येतद्विभणिषुराह । अपिचे VN_{ms}:11a5 त्यादि । द्वाववयवौ यस्या दोषजातेर्दो षप्रकारस्य 57a/msK सा द्वयी । कामित्याह । विरुद्धतामसिद्धताञ्च । कथम्पुनर्विरुद्धतेत्याह । विरुद्धतेत्यादि । अयमत्र संक्षेपार्थः । प्रतिज्ञाहेत्वोर्यत्र प्रयोगेविरोधश्चोद्यते तत्रा वश्यं सिद्धेन धर्मिणा भाव्यं । सिद्धे च तस्मिन्धर्मणिहेतोर्वा सत्त्वम्भवेत्

३ माण] ? न
३५ णि] ? धर्मिणि

साध्यधर्मस्य । द्वयोर्वा । तत्र न तावत् द्वयोरपि सत्त्वं प रस्परविरोधित्वेन शीतोष्णयोरिव एकाधिकरणत्वाभावात् । अन्यथा सहैकत्रावस्थानाद्रसरूपवदविरोध एव भवेदिति प्रतिज्ञाहेत्वोर्विरोधो दूरतर एव प्रसज्यते । तद्वक्ष्यति । विरुद्धयोः स्वभावयोरेकत्रासम्भवान्न चान्यथा विरोध इति । अथ हेतोस्तत्र 89/s सत्त्वं । एवमपि यत्र हेतुस्तत्र न साध्यधर्मस्तद्विप र्ययस्तु विद्यत इति व्यक्तमस्य विरुद्धत्वं । नित्यः शब्दः कृतकत्वादिवत् । तदाह [।] विरुद्धता सिद्धेर्हेत्वोर्धर्मिणि भाव VN$_{ms}$:11a6 इति । यदा पुनस्तस्मिन्धर्मिणि प्रमा णान्तरेण साध्यधर्मस्य सत्त्वं निश्चितं तदा तत्र हेतोरवृत्तिर्विरोधिना क्रोडीकृतत्वात् । अतश्चासिद्धत्वं हेतोः । कृतकः शब्दोऽकार्यत्वादिति यथा । तज्ज्ञा ते असिद्धता पुनर्द्धर्मिणीत्यादि । अथमन्यसे । प्रमाणेन सिद्ध एव गुणव्यतिरिक्ते द्रव्यादौ धर्मिणि प्रतिज्ञाहेतोर्विरोधो व्यवस्थाप्यते ततो नायं दोष इत्य त इदमासङ्कतेअसिद्ध VN$_{ms}$:11b8 इत्यादिना । एवमपि यदि नाम धर्म्यभावेन पक्षधर्मस्यासम्भवात् विरुद्धत्वं परिहृतं । असिद्धत्वं पुनस्तदवस्थमेवेति मनस्या धायाह । प्रमाणयोगे तूभयोर्वादिप्रतिवादिनोर्धर्मिणि हेतोर्वृत्तिसंशयः । प्रमाण निवृत्तावप्यर्थाभावासिद्धेः । अतश्चासिद्धतैव 57b/msK सन्दिग्धाश्रयत्वात् । इह नि कुञ्जे मयूरः केकायितत्वादित्यादिवत् । तु शब्दः प्रतिपादकप्रमाणायोगे धर्मिणः सन्दिग्धाश्रयताहेतोर्धर्मिबाधकप्रमाणवृत्तौ स्फुटमेवाश्रयासिद्धतत्वं । सर्व्वगत आ त्मनि साध्ये सर्वत्रोपलभ्यमाणगुणत्ववदित्यस्य समुच्चयार्थः । तथा ह्यसिद्धेः धर्मिस्वभाव इत्यत्र प्रतिपादकप्र- 90/s माणावृत्तेरसिद्धो धर्मी विवक्षितः स्यात् । बाधक प्रमाणवृत्तेर्वा । पूर्वस्मिन्पक्षे कण्ठेनैवोक्तो दोष उत्तरत्र शब्देन समुच्चितः । अत्रोद्योतकरमुत्तरमाशङ्कते । उभयाश्रयत्वा VN$_{ms}$:11a9 दित्यादिना । गतार्थत्वात् सुज्ञानं सर्व्वमेतत् । न सर्व्वत्रेत्यादिना निराकरोति । यथोक्तं प्राग् न द्वयीं दोषजातिमित्यत्र । अथ प्रतिज्ञामात्रभाव्येव हेत्वनपेक्षः प्रतिज्ञाविरोधो व्यवस्था प्यते यथा नास्त्यात्मा श्रमणा गर्भिणीत्यत्रेत्यत आह [।] अनपेक्षे च हेतुग्रहणमसम्बद्धं VN$_{ms}$:11b3 । अनुपकारकत्वात् । यदपीदं हेतुविरोधस्योदाहर णं दत्तं नित्यः शब्द इत्यादिना तत्प्रतिज्ञाविरोधस्य हेतुनायुक्तमिति कथनायाह । न चेदि VN$_{ms}$:11b3 त्यादि । स्यात् मतमुभयाश्रयत्वाद्विरोधस्यैवमपि न हेतुत एवेत्यत उच्यते उभयाश्रयेपी VN$_{ms}$:11b4 त्यादि । एवमुपदर्शितान्युदाहरणानि प्रक्षिप्यातिदिष्टदूषणायाह । यच्चोक्तमेतेन प्रतिज्ञायाः दृष्टान्तविरोधादयोपि वक्तव्या भण्डालेख्यन्या येने VN$_{ms}$:11b5 ति । इति शब्दो वक्तव्य इत्यत्र प्रतिपत्तव्योऽन्यथापरेणोत्तरस्याप्रयुक्तत्वात् दुःश्लिष्टो भवेत । भण्डग्रहणन्नित्यपुरुषोपलक्षणार्थं । यथा हि भण्डा प्राकृतान् विस्मापयन्तश्चित्रलक्षणोपेतकपिशालभञ्जिकादिप्रतिच्छन्दकमालिख्य विचित्रशिल्पकलाकौश- 58a/msK लसादिनोऽतिदि शंत्येवं प्रकाराण्यप्यस्मत्कौशलनिर्मितान्येकतालमात्रेण ह-

१२ ते] ? शङ्कते
१८ माण] ? न
३५ सादि] ? शालि

स्त्यादिरूपकस्थानानि प्रतिपत्तव्यानीति तथा जातीयकमेतद्दु द्योतकरस्य । तथा ह्येतदेव भाव उप दर्शितहेतुविरोधादिकं हेत्वाभासव्यतिरिक्तलक्षणोपेतं । तदतिदिष्टे पुनः कैव चिन्ता । तामेव चातिदिष्टस्य दृष्टान्तविरोधादेर्हेत्वाभास-व्यतिरिक्त लक्षणापेततामभिधातुमुपक्रमते । तत्रापी VN$_{ms}$:11b5 त्यादिना । यत्र प्रतिज्ञायाः दृष्टान्तविरोधस्तत्रापि पक्षीकृतधर्मविपर्ययवति दृष्टान्ते सति विरोधः स्यात् प्र तिज्ञायाः दृष्टान्तेनेति शेषः । पक्षीकृतश्चा सौ धर्मश्च तस्य 91/s विपर्ययः स विद्यते यस्मिन्निति विग्रहः । दृष्टान्त इति च साधर्म्यदृष्टान्तो । अभिप्रेतः । यस्मा द्वैधर्म्यदृष्टान्तः साध्यधर्मविपर्ययवानेव तत्र को विरोधः । तत्रोदाहरणं । नित्यः शब्दो घटवदिति । विरुद्धे च दृष्टान्ते सति यदि पक्षधर्मस्य वृत्ति रनन्यसाधारणा प्रसाध्यते प्रमाणेन विरुद्धस्तदा हेत्वाभासः । नान्यसाधारणेत्यनन्यसाधारणा । अन्यशब्देन पक्षीकृतधर्मविपर्ययवतः पृथ-ग्भूतः पक्षीकृतधर्मवानभिप्रेतः पक्षीकृतधर्मविपर्ययवत्येववर्तते इत्येवं यदि साध्यत इत्यर्थः । यथानयोरेव साध्यदृष्टान्तयोः कार्यत्वादि ति तद्विपक्षीकृत-धर्मबहिर्व्योमादौ न वर्तते तद्विपरीते पुनर्घटे वर्तत इति । साधारणायाम्वृत्तौ साधितायां सपक्षविपक्षयोरिति शेषः । अनैकान्तिकः साधारणाख्यः । यथान-योरेव साध्योदाहरणयोः प्रमेयत्वादिति । अप्रसाधिते चातद्वृत्तिनियमे तयोः सपक्षविपक्षयोर्वृत्तिनियमे सपक्ष एव वर्त्तते वि पक्ष एवेति अनैकान्तिक एव 58b/msK सन्दिग्धान्वयः सन्दिग्धव्यतिरेको वा । यथा सर्व्वविद्वीतरागो वा विवक्षितः पुरुषो न वा तथा वक्तृत्वाद्रथ्यानरवदिति । तयोरेव सपक्ष विपक्षयोरवृत्तौ वा सत्यामसाधारणः । नित्यः शब्दः श्रावणत्वादिति यथा । परः प्राह विरुद्ध-दृष्टान्तावृत्तौ हेतोर्विपर्ययवृत्तौ च सत्यान्न कश्चिद्धेतुदोषः तद्यथाऽनित्यः शब्दः प्रत्ययभेदभेदित्वात् नभोवदिति साधर्म्येण । वैधर्म्येण च घटवदिति । अत्र नासिद्धत्वं ध[ि]र्मणि हेतोः सद्भावात् । नाप्यनैकान्तिकत्वमुभ यत्रावृत्तेः । प्रतिबन्धसद्भावाच्च । न च विरुद्धत्वं सपक्षविपक्षयोर्वैपरीत्येन वृत्यभावात् । दृष्टान्तेन तु विरोधः प्रतिज्ञायाः इत्ययं हेतुदोषानति क्रान्तो विषयः प्रतिज्ञायाः दृष्टान्तेन च विरोधस्येति । इदमपनुदति । न । तदापि संशयहेतुत्वानतिवृत्तेः । यस्माद् दृष्टान्ते न प्रतिज्ञाया विरोधः सा धर्म्ये दृष्टान्ते दोषो न वैधर्म्ये । कस्मादभिमतत्वाद् विरोधस्य । पक्षीकृतधर्मविपर्ययवानेव हि वैधर्म्यदृष्टान्त उच्यत इत्यभिप्रायः । यदि ना मैवं तथापि कथं हेत्वाभासानतिवृत्तिरित्याह साधर्म्यदृष्टान्ते च विपरीतधर्मवति नभसि नाऽव्यभिचारधर्मता शक्या दर्श-यितुँ । तदर्थश्च दृष्टान्तः प्रदर्श्यते ॥ यदाह 92/s

...32 त्रिरूपो हेतुरित्युक्तं पक्षधर्मे च संस्थितः ।
रूढे रूपद्वयं शेषं दृष्टान्तेन प्रदर्श्यत [३२][§ 175]

इति । ननु च कथमशक्या यावता प्रत्ययभेदभेदित्वमनित्यत्वाव्यभि चार्येव तत्वत इत्यत आह । वस्तुतः साध्याव्यभिचारेपी VN$_{ms}$:11b7 ति । विद्यमानोप्यव्यभिचारः प्रमाणेनाप्रतिपादितत्वादसत्कल्प इति भावः

59a/msK । तदेतन्नाप्रदर्शितावि   नाभावसम्बद्धाद्धेतोः साध्यनिश्चयः । तत्तस्मान्न प्रतिज्ञाया दृष्टान्तविरोधोपि हेत्वाभासानतिवर्तते । अस्यापि तदानीं संदिग्धविपक्षव्यावृत्तिकत्वादित्यागूरितं । न केवलहेतुविरोध इत्यपि शब्दः परमतमासङ्क्ते । उभयथापि हेतुद्वारेण दृष्टान्तद्वारेण च । न हेतुद्वारेण प्राग्दृष्टान्तदोषात् प्रसङ्गेन पराजितस्य वादि नो दोषान्तरस्य दृष्टान्तविरोधस्य वाच्यस्य वानपेक्षणात् पराजितपराजयाभावादित्याकूतं । विशेषेण साधनावयवानुक्रमवादिनो नैयायिकस्य स हि प्रतिज्ञाहेतूदाहरणोपनयनिगमनानामानुपूर्वी प्रतिपन्नः । कः पुनः तस्यातिशय इत्याह । उदाहरणसाधर्म्यमि VN_{ms}:11b9त्यादि । अङ्गीकृत्य चेदमवादि न तु दृष्टान्तविरोधो हेत्वाभासरूपासंस्पर्श्यस्ति । यथोक्तमनन्तरमिति । एतेन विकल्पतो दोषविधानं प्रत्युक्तं । एवन्तावद्व्यवस्थितमेतद्यथा प्र तिज्ञाया दृष्टान्तविरोधो हेत्वाभासान्नातिवर्तत इति । यत्पुनरुदाहृतमविद्धकरणेन भाष्यटीकायां व्यक्तमेकप्रकृतिकं परिमितत्वाच्छरावादि वदिति । तत्रापि विरुद्धो हेतुः परिमितत्वस्य हेतोः सपक्षेऽभावे वा वृत्तेः । विपक्षे चानेकप्रकृतिके शरावादौ वृत्तेः । मृदः प्रतिक्षणं प्रत्यवयवश्च भिद्य मानत्वात् । संप्रति हेतोरपि दृष्टान्तेन विरोधो हेत्वाभासान्तर्गत इति कथयति । हेतोरपि दृष्टान्तविरोधे सत्यसा[धा]रणत्वमुभयत्रावृत्तेः । विरुद्धत्वम्वा । कदा विरुद्धत्वमित्याह । वैधर्म्ये यदि स्यादप्यत्रोदाहरणमुक्तं तेनैव गुणव्यतिरिक्तं द्रव्यमर्थान्तरत्वेनानुपलभ्यमानत्वाद् घटवदिति अत्रापि दृश्यत्वे
59b/msK सतीति हेतुविशेषणे विरुद्धः सपक्षे अवर्तमानत्वात् । विपक्षे च रूपादीनां
93/s स्वरूपे वर्तमागत्वात् । विशेषणानुपादाने तु व्यभिचारो र्थान्तरत्वेनानुपलब्धानामपि पि शाचादीनां परस्परव्यतिरेकित्वात् । न चात्र घटवदिति दृष्टान्तो युक्तस्तस्यैव द्रव्यान्तरत्वेन पक्षीकृतत्वात् । तस्य रूपादिभ्यो भेदेन ग्रहणं पूर्वमेव प्रतिसिद्धं ग्रहणे चासिद्धो हेत्वाभास इत्यस्मन्मतमेव स्थितं । अथ हेतोः प्रमाणविरोधे को हेत्वाभास इत्याह । असिद्धोग्नेः शैत्यस्याविद्यमानत्वात् । यत्पुनरत्रो दाहरणमन्यदनुष्णोग्निर्द्रव्यत्वाज्जलवदिति तदयुक्तं । नहि प्रत्यक्षं द्रव्यं हेतुं बाधते । तस्य धर्मिणि सिद्धत्वात् । किन्तु प्रतिज्ञार्थमनुष्णत्वं ॥ अथ प्रतिज्ञार्थस्य प्रत्यक्षेण बाधितत्वाद्धेतोस्तेन व्याप्तिर्नास्तीति हेतोः प्रमाणविरोध उच्यते । एवन्तर्हि विरुद्धेन साध्यधर्मेणाव्याप्तेः सन्दि ग्धव्यतिरेको हेत्वाभास इत्यस्मत्पक्ष एव समर्थितः । § 176

...33 हेतोःप्रमाणविरोधस्य हेत्वाभासानतिक्रमात् ॥ [३३] § 177

तदुक्तम् § 178

...34 प्रत्यक्षादि[वि]रोधा ये व्याप्तकालो पपातिनः ।

३ मास] ? श
२३ तिसि] ? षि
३० माण] ? मान

ते सर्वे न विरुद्धेन व्याप्तिधर्मेण युज्यत [३४] इति ॥§ 180

स्यान्मतम्प्रतिज्ञायाः प्रमाणविरोधस्तन्मात्रभावित्वाद्धेत्वाभासेऽन्तर्गमयितुं न पार्यत इत्यत आह । प्रतिज्ञायाः प्रमाणविरोधः स्ववचनविरोधेन व्याख्यातः VNms:12a2 कृतप्रतिक्रियस्तत्रेदमेव निग्रहाधिकरणमसाधनाङ्गभूतायाः प्रतिज्ञायाः साधनवाक्ये प्र योग इत्यादिना । इति तस्मात् सर्व्व एवेत्युपसंहरति । यत्तु विरुद्धमुत्तरमिति पूर्व्वपक्षोक्तमपरमुपक्षिपति तदसम्बद्धमेव । यस्माद्यदि ही VNms:12a3 त्यदि । अनि त्यः शब्द ऐन्द्रियक- 60a/msK त्वाद् घटवदित्येकं बौद्धेनान्येन वा कृते मीमांसकः काणादोन्यो वा स्वपक्षसिद्धेन गोत्वादिना सामान्ये न परस्य साधनवादिनो बौद्धस्य हेतोर्व्यभिचारसिद्धिमाकांक्षेत गोत्वमप्यैन्द्रियकं तदपि भवतोऽनित्यं प्रसज्यत इत्येव यदि परं प्रत्ये वाध्यारोप्याभिदध्याद् व्यभि चारं तदा तस्य बौद्ध स्य त- 94/s त्सामान्यमैन्द्रियकं नित्यञ्च स्वपक्षविरुद्धं नित्यपदार्थानभ्युपगामान्नाभिमतमतश्च कथं व्यभिचार इति विरोधो व्याहतिरयुक्तत्वमिति यावत् युज्यत उत्तरस्येत्यध्याहर्तव्यं । न तु पुनरेवमसौ परस्यैवोपरि भारमुपक्षिप्य व्यभिचारमुद्भावयति तत्कथमुत्तरस्य विरोधः यतः स ह्युत्तरवादी स्वयं प्रतिपन्ने नित्यत्वेन गोत्वे हेतोरैन्द्रियकत्वस्य वृत्तेः संशयानः सन् किङ्घटवदैन्द्रियकत्वादनित्यः शब्दो भवतु किम्वा गोत्वा दिवन्नित्य इत्यप्रतिपत्तिमनिश्चयमात्मनस्तथा ब्रुवाणः ख्यापयति सत्पक्षे खल्वैन्द्रियकमपि गोत्वं नित्यं तस्मादयं सांप्रत्यनैकान्तिक इती त्थमात्मीयमेवाभ्युपगमं पुरस्कृत्यानेकान्तञ्चोदयति । ततः साध्विवोत्तरमिति समुदायार्थः । स्यात् मतम्बौद्धस्य नास्त्येवगोत्वं नित्यं ततो व्याहतमेवोत्तर मित्यत आह । स च हेतु VNms:12a5 रैन्द्रियकत्वादिति सत्यसति वा गोत्वे परमार्थतः । अप्रसाधितसाधनसामर्थ्यः सन् विपर्यये बाधकप्रमाणावृत्या संशयहेतुत्वाद नैकान्तिक एव । अप्रसाधितं साधनाय सामर्थ्यं साध्या विनाभावित्वलक्षणमस्येति विग्रहः । साधनशब्दो भावसाधनः । यदा तु बाधकप्रमाणबलेन हेतोरवि नाभावं सर्व्वोपसंहारेण 60b/msK साधयति यत्किञ्चिदिन्द्रियज्ञानग्राह्यं स्वनिर्भासज्ञानजनकत्वात्तत्र सर्व्वमनित्यं नित्यत्वे सर्व्वदा तद्विषयं ज्ञानं प्रसज्यते न वा कदाचिदपि तथाहि ।

...35 स्वात्मनि ज्ञानजनने यच्छक्तं शक्तमेव तत् ।
अथवाऽशक्तं कदाचिच्चेदशक्तं सर्वदैव तत् ॥ [३५]§ 183

...36 तस्य शक्तिरशक्तिर्वा या स्वभावेन संस्थिता ।
नित्यत्वादचिकित्स्यस्य कस्तां क्षपयितुं क्षम [३६]§ 186

इति ॥ § 187

तदानीं गोत्वादीनामपि नित्यानामेकप्रघटेन इव पातितत्वात् गोत्वे हेतोरवृत्तेर्न संशय एव भवति । एतेने VNms:12a6 त्यादि सुज्ञानं

। तत्रा प्यनैकान्तिकहेत्वाभासत्वानतिवृत्तिरिति संक्षेपः । तत्संशयहेतुत्व-मुखेनानैकान्तिकत्वमसमर्थिते सति हेतौ । अन्यत्रापी त्येकपक्षप्रतिपन्नेपि वस्तुनि तुल्यमिति नोभयसिद्धेतरयोर्वस्तुनोरनैकान्तिकत्वविशेषः । यथा क-
95/s थितमनन्तरमेव । स च हेतुः सत्यसति वेत्यादिना । इतर देकपक्ष प्रतिप-न्नमनैकान्तिकविषयत्वाद्यानैकान्तिकमिति व्याख्यातं । स्याच्चित्तन्नानिष्टेर्दूषणं सर्व्वप्रसिद्धस्तु द्वयोरपि साधनं । दूषणम्वेत्येतत्कथमेवन्न व्याहन्यत इति तच्च नैवं । निश्चितदूषणाभिसन्धिवचनात् । तत एव तदनन्तरमाहान्यः पुनः साध्यत्वमीक्षत इति । एतत्तु स्यात् । तदा द्वयोरेकस्यापि न जय पराज-यौ । यदप्युक्त मुद्योत करेण प्रतिज्ञाविरोधसूत्रमेव विवृण्वता दृष्टान्ताभासा इत्यादि तदप्यवयवान्तरवादिनो नैयायिकस्यायुक्तं । बौद्ध एवैवं ब्रुवा णः शोभत इत्यभिप्रेतं [।] तद्वचनेन हेत्वाभासवचनेन गम्यमानस्य दृष्टान्ताभास-
61a/msK स्य तस्माद्धेतोः सकाशात् सा धनान्तरत्वा- भावप्रसङ्गात् । दृष्टान्तस्येति शेषः । § 188

ननु च दृष्टान्ताभासानां हेत्वाभासेष्वन्तर्भावेऽतिदिष्टे हेतोर्दृष्टान्तेऽवय-वान्तरं न प्राप्नोतीति वचन मसम्बद्धमेवेत्यत आह । दृष्टान्ताभासाना मि VN_{ms}:12a9 त्यादि । अयमस्य प्रयोगो मनसि विजृम्भते । य-द्यतोऽर्थान्तरभूतं न तदाभासवचनेन तदाभासवचनं न्याय्यं न च त-दाभासेषु तदाभासानामन्तर्भावः । तद्यथा प्रत्यक्षाभासानामनुमानाभासेषु । तथा च भवतो हेतोर्दृष्टान्तोर्थान्तरभूत इति व्यापकविरुद्धोपलब्धिः अतोऽव-श्यं दृष्टान्तस्य हेतावन्तर्भाव एष्टव्यः । तत्र च न दृष्टान्तः पृथक् साध-नावयवः स्यात् । अपृथग्वृत्तेः एकव्यापारत्वादित्यर्थः । एतदेव व्या चष्टे यो दृष्टान्त VN_{ms}:12b1 इत्यादिना । एवं प्रतिज्ञाहेत्वोर्विरोधस्य प्रपञ्च-स्य हेत्वाभासैः सङ्गृहीतत्वान्न पृथग्वचनं कर्त्तव्यमित्यभिधायाधुना प्रतिघहा न्यादीनामपीयमेव गतिरित्यावेदनायाह । अपि चे VN_{ms}:12b1 त्यादि
96/s । पूर्व्वपक्षवादिग्रहणमुत्तरपक्षवादि नोऽज्ञानादीनि हेत्वाभासस्पर्शानि संतीति कथनार्थं । तत्सम्बन्धीनीति हेत्वाभासपूर्व्वपक्षवादिसम्बन्धीनि वा । अथोच्यते । अर्थान्तरगमनादीनां हेत्वाभासासंस्पर्शित्वा न्नतेस्त्वन्तर्भाव इ ति । तच्चासत् । अर्थान्तरगमनादेरपि हेतोरसमर्थ एवमतिसम्भवात् । कुतः असमर्थस्य न्यायबलेन साध्यप्रतिपादने वादिन इति शेषः । मिथ्याप्रवृ त्तेरर्थान्तरगम-नादिनेत्यभिप्रायः ॥ ४ ॥ § 189

उत्तरः पश्चाद् फलभावी स चासौ प्रतिज्ञासन्यासश्च तस्यापेक्षया किन्न
61b/msK किञ्चिदित्यर्थः । अशक्तः परिच्छेदः सं ख्ये येषां क्लीवप्रलापचेष्टितानां तानि तथा क्लीवादीनां प्रलापा येषां वादिनान्तेषां चेष्टितानि प्रतिज्ञासंन्यासादीनि वै किमुपन्यस्तैः [।] क[ः] पुनरेवं सति दोष इत्याह । एवं ह्यतिप्रसङ्गः VN_{ms}:11b6 स्यात् । एवमाद्यपीति मूर्च्छाविपथुत्रसत्वादीनामादिशब्देनाव-रोधः । तस्मादेतदप्यसम्बद्धं विद्वत्सदस्येवं प्रकारस्य स्थूलत्वादित्याभिप्रायः

२७ तेस्त्व] ? ष्व

तदत्र भाविविक्तः स्वयमाशंक्य किल प्रतिविधत्ते स्थूलत्वेनेदं निग्रहस्थान-
मिति चेत् । प्राश्निकप्रतिवादिसन्निधौ प्रतिज्ञातार्थापह्नव ङ्करोतीति । अस- 97/s
म्बद्ध मुच्यते तन्नाभिप्रायापरिज्ञानात् । न ब्रूमो ध्वंसी शब्द इति किन्तु
संयोगविभागाभ्यां न व्यक्त इत्ययं प्रतिज्ञातार्थ इत्याह सामान्यस्य च
स्वाश्रयव्यङ्ग्य त्वात् विवादाभाव इति । निग्रहस्थानन्तु पूर्वमप्रतिज्ञातार्थत्वात्
। अनैकान्तिकदोषेण प्रतिषेधे हेतौ प्रतिज्ञातार्थापह्नवङ्करोतीति निगृह्यत इति
तत्रवाच्यं यदि वादी साकांक्ष एवान्तराले केनचिद् दुर्व्विदग्धेनानैकान्तिक-
दोषेण चोदितः सन्प्रतिज्ञातार्थफलीकरणेन स्वाभिप्रायमाविष्करोति । तदा
न्योपि न कश्चिद्दोषः । किमङ्ग पुनः प्रतिज्ञासंन्यासः । अथ निराकांक्षः
सन् पश्चाच्चोदितः प्रतिज्ञां विशिनष्टि । तदप्यनैकान्तिकदोषेणैव निगृह्यत इति
किमुत्तरप्रतिज्ञासंन्यासापेक्षयेति न किञ्चित्परिहृतं किञ्च स्फुटमिदं प्रतिज्ञान्त-
रेन्तर्भवतीति नः पृथग्वाच्यमिति ॥ ४ ॥ § 190

अविशेषोक्ते हेतावि त्यादि सूत्रं अत्र निदर्शनमुदाहरणमित्यर्थः । का-
पिलः प्रमाणयति प्रधानसिद्धिप्रत्याशया । एकप्रकृतीदं व्यक्तं व्यक्तादिप-
रिमितत्वाद् घटशरावादिवदिति । एका प्र कृतिरस्येति विग्रहः । प्र- 62a/msK
कृतिरुपादानकारणं । या च किल सा प्रकृतिर्विकारग्रामस्य तत्प्र-
धानमितीयमलीकप्रत्यासासाङ्ख्यस्या परिमाणश्चतुरस्रम्परिमण्डलमित्यादि । 98/s
मृत्पूर्व्वकाणामित्यन्वयमाह । अस्य हेतोर्व्यभिचारेण प्रत्यवस्थानं प्रतिवादिना
क्रियते । नानाप्रकृतीनाङ्गवाश्वादीनामेकप्रकृतीनाञ्च कुम्भोदञ्चना दीनान्दृष्ट-
म्परिमाणमित्येवं प्रत्यवस्थिते सति प्रतिवादिनि । यदि वा प्रत्यवस्थितः
प्रतिषिद्धः प्रधानवाद्याह । एकप्रकृतिसमन्वये सति परिमाणदर्शना दिति
सविशेषणत्वाद्धेतोर्व्यभिचाराभाव इति मतिः । कथं पुनरेकप्रकृतिसमन्व-
य इत्याह । सुखदुःख मोहसमन्वितं हीदं व्यक्तं परिमितं गृह्य ते ।
सर्व्वत्र तत्कार्यदर्शनादित्याकूतं । तथाहि सुखबहुलानाम्प्रसादलाघवप्रस-
वाभिष्वङ्गाद्धर्ष प्रीतयः कार्यं । रजोबहुलानां शोषतापभेदस्तं भोद्वेगापद्वेषाः
। तमोबहुलानां सावरणमादनायध्वंसवीभत्सदैन्यगौरवाणि । एतानि च स-
र्व्वाणि सर्व्वत्रैव यथोत्कर्षापकर्षभेदमुपलभ्यन्ते । त स्मात्त्रैगुण्यप्रकृतीदं विश्वं
। तदिदमित्यादिना निग्रहस्थानत्वे कारणमाह । अत्रापी त्याद्यस्य प्रतिषेधः
सुज्ञानः । अविरामादच्छेदादपरिसमाप्तत्वात् साधनाभिधानस्येत्यर्थः ॥ ० ॥
§ 191

यथोक्तलक्षण इत्येकाधिकरणौ विरुद्धौ धर्माविति पक्षप्रतिपक्षलक्षणं
स्मरयति । परिग्रहे वादिप्रतिवादिभ्यां कृते सति हेतुतः साध्यसिद्धौ प्र-
कृतायां हेतुवसात्साध्यसिद्धिरित्येतस्मिन्प्रकरणे सति प्रकृतोर्थः शब्दनित्य-
त्वं । तेनासङ्गतत्वात् । तदसम्बद्धत्वात्तदनुपकारकत्वादित्यर्थः [।] तथा 62b/msK
हि विनापिरूपसिद्ध्या प्रातिपदिकादिव्याख्यानं यथा कथञ्चित्प्रतिपादिताद-

११ कि] न्यायभाष्ये २५९-६० अल्पभेदेन ।
१७ त्यासा] ? शा
३३ सा] ? शा

र्थादिवार्थः सिध्यति । न्याय्यमेतदिति स्वमतेनाविरुद्धत्वादभ्यनुजानाति । क-
दा च पूर्वो त्तरपक्षवादिनोर्न्याय्यं निग्रहस्थानमित्याह । प्रतिपादिते दोषे
सति वादिप्र[ति]वादिभ्यामन्योन्यमसाधनाङ्गवचनमेतददोषद्भावनञ्च भवेदिति
99/s अन्यथा न ह्य [न] योरेकस्यापि जयपराजयावित्युक्तं । प्रकृतं परित्य-
ज्येति न्याय्यतामेवास्य प्रतिपादयति । प्रकृतमत्र साध्यसाधनहेत्वभिधानं
तदकृत्वेति उपन्यस्ते दोषे न समर्थनं । अपरस्य VN$_{ms}$:13a7 रूप-
सिध्यादेः । अतन्नान्तरीयकस्यापीति । उपन्यस्तसावनसमर्थनाङ्गस्येत्यर्थः ।
अपरस्य नामादिव्याख्यानादेरुपक्षे पः पराजयस्थानमिति वर्त्तते ॥ ४ ॥
§ 192

वर्णक्रमनिदेश[व]न्निरर्थकं न्या० सू० २।१।८ यत्र वर्णा एव केवलं
क्रमेण निर्दिश्यन्ते । न पदन्नापि वाक्यं । अर्थान्तरे किलाप्र कृतार्थ-
कथनमिह वर्णमात्रोच्चारणमिति शेषः ॥ असम्वद्धतामेवाह । नहि वर्ण-
क्रमनिर्देशादेव VN$_{ms}$:13a9 केवलादानर्थक्यमपि तु यदेव किञ्चिदसाध
नाङ्गस्यासिद्धविरुद्धादेः शब्दरूपसिध्यादेश्च वचनन्तदेवानर्थकं । किं कार-
णं । साध्यसिद्ध्युपयोगिनोऽभिधेयस्याभावात् । साध्यसिद्ध्युपयोगिनोऽभावे
पि कस्यान्यत्प्रयोजनमस्तीत्यपि न मन्तव्यं इति कथयति । निष्प्रयोज-
नत्वाच्चेति । साध्यसिद्धेरेव प्रस्तुतत्वादन्यप्रयोजनवत्वेपि आनर्थक्यमेव तत्र
प्रस्ता व इत्यभिप्रायः । तस्मात्प्रकारविशेषोपादानवर्णक्रमनिर्देशवदित्यसम्ब-
63a/msK द्धं । परः प्राह । न साध्यसिद्धौ यदनर्थकमनङ्गन्तन्निरर्थकमभिप्रेतमपि
तु यस्य वचनस्य काकवासितादेरिव नैव कश्चिदर्थः । तथा च नार्थान्त-
100/s रापार्थकादीनामनेनैव संग्रहस्तत्र कस्यचिदर्थलेशस्य सद्भावात् । आचार्य
आह [।] यस्य कस्य चिद VN$_{ms}$:13b3 प्यादिनोपि निरर्थकाभिधाने
वाहित इव किन्न निग्रहो भवति । कथं स्यादित्याह [।] निग्रहनिमित्त
त्तस्य निरर्थकाभिधानस्य वाद्यवादिनोरवि शेषात् । नेति परन्तस्य वादिन
इह वादप्रकरणे । आयातमित्याचार्यः । तस्य तेनैव निरर्थकाभिधानेन ।
तत्रैवं स्थिते वादे तुल्यं । सर्वस्यासाधनाङ्ग वादिनो निरर्थकाभिधायित्व-
मित्यध्याहर्त्तव्यं । क्वचित्तवेतिपाठः । तत्र नोपस्कारेण किञ्चित् । अनेनैव
निरर्थकाभिधानेन । प्रत्युच्यते । यस्य नैव कश्चिदर्थ इति । एतदप्यसम्बद्धं ।
यस्मान्न च वर्णक्रमनिर्देशोपि निरर्थकः क्वचित्प्रकरणे प्रत्याहारादावर्थवत्वाच्च
। तस्मादत्रैव वादेस्य वर्ण्णक्र मस्यानर्थक्यं । तच्चार्थान्तरादेरपि तुल्यमिति
चित्तं कक्कङ्घिङ्गितमित्यत्रादिशब्देन उत्प्लुत्य गमनं तालदाननृत्तआदीनाङ्ग्रहणं
॥ ४ ॥ § 193

त्रिर भिहितमिति त्रिवचनङ्कार्यमिति न्यायत्वं दर्शयति । सकृदुक्तं स्प-
ष्टार्थमपि कदाचिन्न ज्ञायत इति त्रिरुच्चारणङ्कार्यं । कस्मात्पुनः पदवाक्य-
101/s प्रमाणवि द् भिर्वाक्यन्न ज्ञायत इत्याह । क्लिष्टशब्दमित्यादि । क्लिष्टश-
ब्दं मनागुच्चारितत्वात् । अपशब्दत्वादित्यपरे । कस्मादेवं प्रयुक्तमित्याह ।

३१ नृत्त] ? नृत्य

असामर्थ्यसम्वरणा ये VN$_{ms}$:13b9 ति । स्पष्टार्थस्य प्रयोगे दूषणम्वक्ष्य-
तीति भयात्प्रयुंक्ते । इदञ्च साधनदूषणवादिनोः समानं । दूषणवाक्यमपि
ह्येवंभूतनिग्रहप्राप्तिकारणं । नेदं निरर्थकाद्- भिद्यते । तथा हि श्लिष्टश- 63b/msK
ब्दादिभिः प्रकृतार्थसम्बद्धङ्गमकमेव ब्रूयात् । एतद्विपरीतम्वा । प्राक्तने प्रकारे
नास्यासामर्थ्यन्तत्र तु परिषदादयो जाड्या त्तदुक्तन्न प्रतिपद्यंत इति नेयता
विद्वान्वादी निग्रहमर्हति । § 194

...37 वक्तुरेव हि तज्जाड्यं यच्छ्रोत्रा नावबुद्ध्यतें । [३७]§ 195

ततोसौ निग्रहार्ह एवेत्याकूतवानाह परः । परिषत् प्रज्ञामिति । न्याय-
वादिन VN$_{ms}$:13b9 इति परिहरति । न्यायवादिनः उक्तमिति सम्बन्धः ।
वादी तु जाड्यात्परिषदादेरविज्ञातसाधनसामर्थ्य इति कृत्वा विजेता न स्यात्
। परिषत्प्रतिवादिप्रत्यायनेन जयव्यवस्थापनात् । अविज्ञातं प्रतिपादनसाम-
र्थ्यं परिषत्प्रतिवादिभ्यां यस्येति कार्यं । द्वितीयन्तु विकल्पमधि कृत्याह ।
असम्बद्धाभिधाने निरर्थकमेवे VN$_{ms}$:14a1 ति ॥ ४ ॥ § 196

अनेकस्य पदस्येति । यदानीमसम्बद्धार्थप्रतिपादकत्वे वाक्यार्थप्रतिपाद-
कत्वं निराकरोति वाक्यस्यासम्बद्धार्थप्रतिपादकत्वे प्रकरणाध्यायप्रतिपत्यभावः
। समुदायप्रतिपत्यभावाच्च निग्रहस्थानं । उदाहरणं दश डाडिमाः षडपू पाः
कुण्डमजाजिनं पललपिण्डं । अथ रौरुकमेतत् कुमार्यः स्फैयकृतस्य पिता
प्रतिशीन इति अत्र च भारद्वाजेन निरर्थकापार्थकयोरभेद इत्याशङ्क्य प्र-
तिविहितं तत्र हि वर्ण्णमात्रमिह यदान्यसम्बद्धानीति । तदेवाचार्योप्युपक्षिपति
। इदं किले VN$_{ms}$:14a2 त्यादिना । असम्बद्धा वर्ण्णा यस्मिन्निरर्थक इति
विग्रहः । कि ल शब्दोऽनभिमतत्व प्रदर्शनार्थः । अनभिमतत्वमेवाह । नन्वयं 102/s
पदानामसम्बन्धादपार्थकवदसम्बन्धवाक्यमपि निरर्थकात् पृथग् वाच्यं स्यात्
। स्यात्मतमपार्थकं नैवासम्बद्धपदार्थासम्बद्धवाक्यार्थयोः सङ्गृहीतत्वात् पृथ- 64a/msK
ग् न वाच्यमित्यत उच्यते । नोभयसङ्ग्रहाद VN$_{ms}$:14a3 पार्थकं युक्तं ।
कस्मादसम्बद्धपदार्थेनापार्थकेनैवासम्बद्धवा क्यस्येव निरर्थकस्यापि वर्ण्णक्र-
ममात्रलक्षणस्य सङ्ग्रहप्रसङ्गात् । अथोच्यते । निरर्थकं किमुच्यते । यस्यार्थ
एव नास्ति केवलं वर्ण्णक्रममात्रं । असम्बद्धपद वाक्ययोस्तु साध्यसिद्ध्य-
नुपयोगेपि न सर्वथा नैरर्थक्यमतोऽर्थतत्वे साम्यात् द्वयोरेवैकीकरणमित्य-
त आह । एवं विधाचेत्यादि । कपोलवादितादीनामपि पृथगभिधानप्रसङ्ग
इत्यत्रातिप्रसङ्ग उक्तः । नहि किञ्चित्मात्रेण विशेषो न शक्यते क्वचित्प्रदर्श-
यितुमित्यभिसन्धिः अथ निरर्थकापार्थकयोः सङ्ग्रहनिर्देशदोषं भेदनिर्देशे च
गुणम्पश्यताऽ क्षपादेन न सङ्ग्रहनिर्देशः कृत इति मन्यसे । न साधु मन्यस
इत्याह । न च सङ्ग्रह VN$_{ms}$:14a4 इत्यादि ॥ ४ ॥ § 197

१६ डा] ? दा

यथा लक्षणमर्थवसादित्यर्थः सामर्थ्यं । अनुपदर्शिते हि विषये निर्विषया साधनप्रवृत्तिर्मा भूदिति साध्यनिर्देशलक्षणा प्रतिज्ञा पूर्व्वमुच्य ते । तदनन्तर मुदाहरणसाधर्म्यात्साध्यसाधनं हेतु रित्येवं लक्षणो हेतुस्तत्साधनायोच्यते । ततो हेतोर्वहिर्व्याप्तिप्रदर्शनार्थसाध्यसाधर्म्यात्तद्धर्मभाविदृ ष्टान्त उदाहरणमि न्या० सू० १।१।३६ त्येवं लक्षणमुदाहरणं । ततः प्रतिबिंबनार्थं साध्यधर्मिणि सम्भवप्रदर्शनार्थम्वाउदाहरणापेक्षस्तथेत्युपसंहारो न तथेति वेति साधनस्योपनयन्या० सू० १।१।३८ इत्येवंलक्षण उपनयः । तत उत्तरकालं सर्व्वावयवपरामर्षेणविपरीतप्रसङ्गनिवृत्यर्थं हेत्वपदेशात् प्रतिज्ञायाः पुनर्वचनं
64b/msK निग मनमि न्या० सू० १।१।३९ त्येवं लक्षणं निगमनमिति । अयमसौ यथालक्षणमर्थवसात्क्रमः । तथाहि लोकेपि पूर्व्वङ्कार्यं मृत्पिण्डाद्युपादीयते पश्चात्तु करणश्चक्रदण्डादिकमिति न्यायः । तत्रैतस्मिनक्रमन्यायतः । स्थितेऽव-
103/s यवानां प्रतिज्ञादीनां विपर्ययेणाभिधानं निग्रहस्थानं । यथा घटवत्कृतकत्वादनित्य इति । नैवमपि सिद्धेरिति भार द्वाजः स्वयमेवाशङ्क्य परिहरति । न प्रयोगापेतशब्दवदेतत्स्यादिति अनेनेति गोणीपदेन । यथा [।] § 198

...38 अम्बम्बिति यथा वालः शिक्ष्यमाणः प्रभासते
अव्यक्तं तद्विदान्तेन व्यक्ते भवति निश्चयः । [३८]§ 200

तथा किल गोण्यादयः शब्दाः ते साधुष्वनुमाणेन प्रत्ययोत्पत्तिहेतव इति । तदेतदुन्मत्तकस्य वैया करणस्योन्मत्तकसंवर्ण्णनमुन्मत्तकेनो द्योतकरेण संवर्ण्णनं यथा ह्येक उन्मत्तो द्वितीयमुन्मत्तकं सम्वर्ण्णयति तथा भूतमेतदपीति या वत् । यदि चोन्मत्तकस्यो द्योतकर स्योन्मत्तकस्य वैयाकरणस्य सम्वर्ण्णनं । तथा हि शाब्दिक एव तावदुन्मत्तः प्रमाणविरुद्धवत्त्वाभिधायित्वात् । तत[ः] कु तस्तत्प्रक्रियायाः प्रमाणचिन्ताया ज्ञापकत्वमित्यभिप्रेतं । कथम्पुनः शाब्दिकस्यायुक्ताभिधायित्वमित्याह । यदि VN_{ms}:14a4 त्यादि सुबोधं । स्त्रीशूद्रशब्दो मूर्खवचनः । यस्तु नक्क शब्दं मुक्क शब्दमेव नासापर्यायम्वेत्ति । स कथमपशब्दाच्छब्दं साधुं प्रतिपद्यातः साधोः शब्दादर्थम्प्रतिपद्येत । किमुच्यते नैवासौ तथा विवोधम्प्रतिप द्यत इत्याह । दृष्टाचानुभयवेदिनोपि VN_{ms}:14b3 सनका देः प्रतीतिरिति तस्मान्न परम्परया प्रतीतिरर्थस्य । अयमत्र संक्षेपः । स्यादेवमसाधूनां साध्व-
65a/msK, 104/s नुमापकत्वम् । य द्येषान्धूमादीनामिव त्रैरूप्यम्भवे- न्निश्चितं । तच्च न सम्भवति । यस्मादेतावदनुभयवेदिनः सनका दयस्ते सन्तमपि व्याप्यव्यापकभावन्न प्रतिपद्यन्ते । न चासाव ज्ञातो गमको ज्ञापकत्वात् । येपि शब्दापशब्दप्रविभागकुशलास्तेप्यविद्यमानत्वादेव भावयन्ति । तथाह्यसाधूनां साधुभिः

१ सा] ? शा
८ र्षेण] ? र्शेन
१० सा] ? शा
११ म] ? न्क्रमे
१५ ते] ? षते ।
१७ नुमाणे] ? ने

सम्बन्धस्तादात्म्यं कार्यकारणभावो वा भवेत । तदुभयविकलस्याव्यभिचारनियमाभावात् । तत्र च तावन्न तादात्म्यमभ्युपेयं पारमार्थिकस्यैव भेदस्य स्फुटं प्रत्यक्षतः प्रतीतेः । शब्दवद साधोरप्यव्यतिरेकतो वाचकत्वप्रसङ्गाच्च । तदुत्पत्तिरपि दूरोत्सारितेव । यतो नासाधवः साधुभ्यो जायन्ते । क[ा]रणगुणवक्तुकामतामात्रहेतुत्वा त्तेषां । न च तेषान्नित्यत्वङ्कादाचित्कोपलम्भतः । तत्वे वा सुतरान्तदुत्पत्तेरभावः सत्यपि वा व्याप्यव्यापकभावे तत्परिज्ञाने च पक्षधर्मत्ववैक ल्याच्चाक्षुषत्वादेरिवासाधुभ्यो नानुमानं । नह्यत्र धर्मे विद्यते । यतः पक्षधर्मत्वं निष्पद्यते । नहि साधूनामेव धर्मित्वन्तेषामेवानुमीयमानत्वात् । न च धर्मिसा धनं युक्तिमतः । भावाभावोभयधर्मस्यासिद्धविरुद्धानैकान्तिकदोषदुष्टत्वतः । कथं वा साधूनां तद्धर्मत्वं । नहि तत्काले ते सन्ति । असताञ्च धर्मित्वं वाचकत्वं चेति सुभाषितं । किमुच्यते पुरुषो धर्मी साधुशब्दविवक्षा साध्यधर्मः पक्षधर्मश्चासाधुरिति तदप्यसम्बद्धं । व्याप्यव्यापकभावाभावादेव । यस्मान्न च गोणीशब्दप्रयोगकाले गोशब्दविवक्षामुपलभामहे । अथ 65b/msK
प्रत्यवस्थीयते । यथा पक्षधर्मत्वादिवैकल्येप्यव्यक्तं । बालवचोव्यक्तमनुमापयति । तथैवासाधवोपि साधूनिति [।] तदयुक्तं तत्रापि तुल्यपर्यनुयोगत्वात् । वयन्तु प्रतिपद्यामहे साक्षादेव तस्मादप्यव्यक्तान्मात्राद्यर्थः प्रतीयत इति । तत्र संज्ञासंज्ञिसम्बन्धस्याननुभूत त्वादयुक्ताप्रतीतावित्यपि न मन्तव्यं । अनादिमति संसारे व्यवहारपरम्परायास्तथाभूतायाः सम्बन्धस्योल्लिङ्गितत्वात् । तथाहि न गवादिशब्दानामपि प्रा यः शृङ्गग्राहिकयार्थनियमः सङ्केत्यतेपि तु व्यवहारपारम्पर्यतो विदग्धा निश्चिन्वन्ति । तच्चेहापि समानमेव । तस्मादेतदरण्यरुदितं ।

...39 अम्बम्विति यथा बालः शिक्ष्यमाणः प्रभासते ।
अव्यक्तन्तद्विदान्तेन व्यक्तेन भवति निश्चयः ॥ [३९] § 203

...40 एवं साधौ प्रयोक्तव्ये यो यद्भ्रंशः प्रयुज्यते ।
तेन साधु व्यवहितः कश्चिद र्थोवसीयत [४०] § 206

इति ॥ § 207

यदप्यभ्यधायिकुमारिलेन । 105/s

...41 गोशब्देऽवस्थितेस्माकन्तदशक्तिजकारिता ।
गाव्यादेरपि गोबुद्धिर्मूलशब्दानुसारिणी [४१] § 210

ति ॥ § 211

तस्यापीद मेव प्रतिविधानमिदञ्च सर्वमागूर्य्य निगमयति । न परम्परया प्रतीति रिति । अत्रैवोपचयमाह । अर्थे प्रतिपादनायासमर्थस्यासाधोः शब्देपि साधौ प्रतीतिज ननासामर्थ्याच्च । तत्रैतत्स्यान्न वयमसाधूनामर्थेषु

प्रतीतिजनकत्वं निराकुर्मः । किन्तु वाचकत्वं । शब्दे चासाधुः प्रतीतिजनक
66a/msK एव न वाचक एव इत्यत आह । न ह्य थेंपि शब्दस्य वाचकत्वमन्यदेवे VNms:14b4- त्यादि । यद्यसाधोरर्थे प्रतीतिजनकत्वमिष्यते । तदेतावता वयमाहितपरितोषाः । किमस्माकमभिधानान्तरकल्पितेन वाचक त्वेनेत्याकूतं । नैव तर्ह्यसावर्थप्रतीतिं जनयितुं क्षमोऽपि तु शब्द एवेति चेदाह । अप-शब्दश्चेदि VNms:14b4 ति । अथोच्यते शब्देन तस्य स्वाभाविकः सम्बन्धो नार्थेन ततस्तमे व प्रतिपादयति नार्थन्तद्यथा स्वभावतश्चक्षूरूपं प्रकाश[य]ति न शब्दादीनत आह । अकृतसमयस्ये VNms:14b5 त्यादि । अदर्श-नादिति । न ह्यप्रतीतसम्बन्धाः सिंहल शब्दा आर्य जनव्यवहाराय वर्त्तन्ते । समय एव तु जनयेत् प्रतीतिं । सामयिके च तत्र सम्बन्धे सोर्थेप्यनिवार्यः । समयवसादसाधुः साधौ वर्त्तमानोर्थ एव गवादौ किन्न प्रवर्तते । नहि किञ्चित्तथा दोषो गुणस्तु केवल इत्याह । एवं ही त्या VNms:14b6 दि । एतदुक्तम्भवति । ये स्वभावतः प्रकाशका न ते समयमपेक्षन्ते । यथा चक्षुर्दीपा दयो रूपादीनां । स्वभावतश्चापशब्दो यदि शब्दस्य प्रकाशको भ-वेत् । ततस्तेनापि सम्बन्धोनापेक्षः स्यात् । अपेक्ष्यते च ततो नास्य शब्दे स्वा[भा]विकं सामर्थ्यं । तथा चेदमपि शक्यमनुमातुं । ये समयाक्षेक्षप्र-वृत्तयस्ते सर्वत्र यथासमयमनिवारितप्रसराः साक्षादेव प्रतिपादका भवन्ति । यथाकायविज्ञप्त्यादयः । त था चापशब्दा अपि समयापेक्षप्रवृत्तय इति सिद्ध-
106/s मेषामव्यवधानत एवार्थप्रति पादकत्वमिति । विपर्ययदर्शनाच्चेत्युपचयान्तरं । तथाहि वृक्षोग्निरुत्पलमित्युक्ते ऽव्युत्पन्नधियो वालाः प्रश्नोपक्रमं सन्तिष्ठन्ते । कोयं वृक्ष इत्यादिना । ते चान्यस्य व्युत्पादनोपायस्याभावादपशब्दैरेव
66b/msK व्युत्पाद्यन्ते रुक्ख अग्गी उप्पलमिति ॥ त देवमत्रासाधव एव वाचका न साधवः सन्तोपीति विपर्ययो दृश्यते [।] अथ प्रतिपद्यसे धर्मसाधनता शब्दसंस्कारो यथोक्तं । § 212

...42 शिष्टेभ्य आगमात् सिद्धं साधनो धर्मसाधनं
अर्थप्रत्यायनाभेदे विपरीतास्त्वसाधव [४२]§ 215

इति । तथा § 216

...43 मन्त्र[ो] हीनः स्वरतो वर्णतो[वा]मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोपराधात्।
[४३]§ 219

११ सा] ? शा
१६ याक्षेक्ष] ? पेक्ष
३१ राधात्] व्याकरणमहाभाष्ये पस्पशाह्निके ।

ते सुरा हेऽलयो[हे]ऽलय इत्युक्तवंतः परावभूवुः । एकोपि शब्दः सम्यक्प्रयुक्तः सुकृतिनां लोकङ्गमयति । आहिताग्निरपशब्दमभिधाय प्रायश्चित्तीयामिष्टिं नि र्वपे [दि]त्यादि । § 220

महाभाष्ये आह्निके १ इदमपसारयति न धर्मसाधनता VN$_{ms}$:14b9 शब्दानां संस्कार इति वर्तते किङ्कारणमित्याह । मिथ्यावृत्तिचोदनेभ्य VN$_{ms}$:14b9 इत्यादि । मिथ्यावृत्तिश्चोद्यते यैरि ति कार्यं । यथा ह्यस्याभिनवविद्रुमाङ्कुरप्रकराभिरामकिशलयमञ्जुमञ्जरीराजीविराजिततरोरशोकवनस्पतेरधः शयितस्य द्विजन्मनो नीलनीरज नीलतातिशायिना मण्डलाग्रेण शिरश्छित्त्वेत्युक्तेपि भवत्येव ब्रह्महत्यया सम्बन्धः प्रयोजकस्य । अन्येभ्य इत्यसम्भूतेभ्यो विपर्ययेण सम्यक्त्वकवृत्तिचोदने न । यथा अस्स बम्भणस्स गावी दीअदि । सर्वश्चेदमप्रमाणत्वाद्वचनमात्रं भवताविमत्याकूतवानुपचयमाह । शब्दस्य सुप्रयोगादेवेत्यादि VN$_{ms}$:14b9 । एवं विधानित्यप्रमा णकान् । § 221

ननु च प्रतिष्ठिते भूप्रदेशे चैत्यङ्कारयति ब्राह्म्यं पुण्यं प्रसवति कल्पं स्वगषु मोदत इत्यादावपि प्रमाणाभावादयं तुल्यः प्रसङ्गो भवतामपि । न तुल्यो यस्मादत्र विषयद्वयपरिशुद्धिः परिनार्था विसम्वादश्चास्तीति तृतीयेपि 107/s
राशावाहितपरितोषाः प्रेक्षावन्तः प्रवर्त्तन्ते । नत्वेवं भवन्मतेऽनन्तरोदितद्वयमपि प्रमाणव्याहतत्वात् प्रमाणव्याहतिश्चानन्तरमेवावेदिता । तस्माद्दरिद्रेश्वरस्प- 67a/msK
र्धासमानमेतत् [।] § 222

विदितवेद्यादिगुणप्रयुक्ता VN$_{ms}$:15a2 इत्यन्तर्भावितभावप्रत्यययो निर्देश ः । विदितं वेद्यं हेयोपादेयत्वं यैस्ते तथोक्ताः । आदिग्रहणात् करुणादिपरिग्रहः । अमूने VN$_{ms}$:5a2 व संस्कृतानपरानसंस्कृतान् । एतदुक्तम्भवति [।] शब्दो हि व्यवहारोर्थप्र त्यायनफलः । तच्च यथा संस्कृतेभ्यः सङ्केतवसा त्सम्पद्यते तथाऽसंस्कृतेभ्योपीति किमस्थानेभिनिविष्टाः शिष्टाः । अत एव च मन्ये प्रेक्षावद्भोन्यत्वादनुगता र्थमेवं नामामीषामिति । अथवा किमस्माकमर्हषितिः प्रत्याख्यानैः ॥ ते अमून्नेव प्रयुञ्जते नापरानित्यत्रैव निश्चयाभावात् । यदाह [।] न चात्र श ब्दे परोक्षः साक्षी यतः साक्षिण इदमेवामूनेव प्रयुञ्जते नापरानिति निश्चिनुमः VN$_{ms}$:15a3 । § 223

ननु चोक्तन्तदन्वाख्यानस्य प्रयोजनं रक्षोहागमलघ्वसन्दे हा [महाभाष्येआह्निके १] इति । तत्कथं गुणातिशयाभावादित्युच्यत इत्याह । वेदरक्षादिकश्चाप्रयोजनमेवातत्समयस्थायिन VN$_{ms}$:15a4 स्ताथागतस्य । न्यायानुपायित्वात् । तत्स्वभा वस्य VN$_{ms}$:15a4 साधुशब्दरूपस्य । अन्यतोपीति VN$_{ms}$:15a4 बृद्धप्रवादपारम्पर्यात् । एतदेव दृष्टान्तोप्रक्रमं व्यनक्ति । प्राकृतेत्यादिना VN$_{ms}$:15a4 । § 224
108/s

१६ रिनार्था] ?
२० यो] ? य
२४ सा] ? शा
२६ षितिः] ?

इ[त्]थं शा[ि]ब्दकस्योन्मत्तकतामुपदर्श्याधुना भा रद्वाज स्याह ।

§ 225

अवयवविपर्ययेपीत्यादि VN$_{ms}$:15a6 । सम्वन्धप्रतीतिरिति सम्बन्धः परस्परमुपकार्योपकारकभावः । सामर्थ्याद्विवक्षितप्रतिपादन इति शेषः । अथ स्या दक्षपाद सिद्धान्तनीतिपालनाय न प्रतिज्ञादीनां क्रमव्यत्ययः क्रियत इत्यत्राह । नह्यत्र कश्चित्स मयः VN$_{ms}$:15a6 सिद्धान्तो नियमो वा
67b/msK प्रमाणोपेत इत्यप्याह । न पर आह । न विपर्ययात्प्रतीतिः VN$_{ms}$:15a7 साध्यस्य । किन्तु ततो विपर्ययादानुपूर्व्या प्रतीतिरिति । अस्य प्रतिषेधः । नाप्रतीयमानसम्बन्धेभ्य आनुपूर्वी प्रतीतिरिति VN$_{ms}$:15a8 । येषामित्यादि नै VN$_{ms}$:15a8 तदेव व्याचष्टे ॥ अपि च प्रतिज्ञोपनयनिगमनानां पूर्वमेवास्माभिः साधनवाक्ये प्रयोगः प्रतिक्षिप्तः । तत्कुतस्तत्कृतो विपर्यय इत्येतत्कथयति [।] प्रतिपादित VN$_{ms}$:15a10 मित्यादिना । प्रतिज्ञाग्रहणमुपलक्षणार्थं । अथ सामर्थ्यलभ्यापि प्रयुज्यते तदातिप्रसङ्ग इत्येतदाह । प्रतीयमानार्थस्य च प्रयोगेति VN$_{ms}$:15b1 प्रसङ्गः सा धर्म्यवति प्रयोगे वैधर्मस्यापि प्रयोगप्रसङ्गः । न चेष्यते । अर्थादापन्नस्य स्वशब्देन पुनर्वचनञ्चेति न्या० सू० ५।२।१५ निग्रहस्थानवचनात् । पक्षधर्मान्वयव्यतिरे
109/s केषु तर्हि प्रतिज्ञाद्यभावेपि क्रमनियमो भविष्यतीत्यत आह । परिशिष्टे VN$_{ms}$:15b1 ष्वित्यादि । अप्रतीयमानसम्बन्धपक्षे दोषान्तरं ब्रूते [।] नेदमपार्थकाद् भि द्यत VN$_{ms}$:15b2 इति न पृथग्वाच्यं स्यादिति ॥ ४ ॥

§ 226

यस्मिन्वाक्ये प्रतिज्ञादीनान्निगमनपर्यन्तानामन्यतमोऽवयवो न भवति । तद्वाक्यं हीनं VN$_{ms}$:15b3 निग्रहस्था नत्वे कारणमाह । साधनाभावे साध्यासिद्धेरिति VN$_{ms}$:15b3 । इदन्निराकरोति [।] न प्रतिज्ञादीनामित्यादिना VN$_{ms}$:15b3 । प्रतिज्ञाग्रहणमुपलक्षणार्थं तेनोपनयनिगमनयोरपि परिग्रहः । उद्योतकरस्य मतमुपन्यस्यति । हीनमेव तत् VN$_{ms}$:15b3 । प्रतिज्ञान्यूनं । तस्याः प्रतिज्ञायाः न्यूनतायामपि निग्रहादिति अस्यायुक्ततामाह । यः साधनसा मर्थ्या त्प्रतीयमानार्थमनर्थकं शब्दं साध्याभिधायिनं साधने प्रयुङ्क्ते स निग्रहमर्हेत् VN$_{ms}$:15b4 । तथा हि शब्दस्यानित्यत्वविचारे प्रस्तुते यदा ब्रवीति । कृतकानामनित्यत्वं
68a/msK दृष्टङ्कृतकश्च शब्द इति । तदा वचनद्वया देवसाध्यार्थः प्रतीयत इति निरर्थकम्प्रतिज्ञावचनं । नार्थोपसं हितस्य युक्तियुक्तस्य पक्षधर्मसम्बन्धमात्रस्याभिधानेत्य समीक्षिताभिधानमेत VN$_{ms}$:15b4 द्वार्तिककारस्य । अत एव चेति VN$_{ms}$:15b4 यतः प्रतीयमानार्थे शब्दे प्रयुक्ते निग्रहमर्हति । तद त्राबिद्धकर्णः प्रतिबन्धकन्यायेन प्रत्यवतिष्ठते । यद्येवङ्कृतकश्च शब्द इत्येतदपि न वक्तव्यं किंकारणनीमनित्यत्वमित्येतेनैव शब्दे पि कृतकत्वमनित्यत्वञ्चोभयं

१५ र्म] ? र्म्य

३५ नी] ? निमित्त

प्रतिपद्यते । यस्मात्पूर्वमपि शब्दे कृतकत्वम्परेण प्रतिपन्नमेव करणाच्छब्दोपि
बुद्धौ व्यवस्थितः । अतोन्वयवा क्येन स्मृतिमात्रकमुत्पाद्यते । अप्रतिपन्न-
कृतकत्त्वस्य पुनः कृतकश्च शब्द इत्ये तस्मादपि नैव भवति । यद्वा कृतकः 110/s
शब्द इत्येतावद्वक्तव्यं । कृतक त्वस्य त्वनित्यत्वेनाविनाभावित्वं परस्य प्र-
सिद्धमिति शब्देप्यनित्यत्वं प्रतिपद्यत इति तेनानुकूलमेवाचरितं । तथा हि
यदि वादिना कथञ्चिन्निश्चि तम्भवति प्रतिपन्नमनेन वादिना कृतकत्वं शब्द
इति तदा नैव तेन पक्षधर्मोपसंहारः कर्तव्यो निष्फलत्वात् । प्रतिबन्धमात्रन्तु
प्रदर्शनीयं । अथ तथा न निश्चितं । तथापि यद्ययं परः पक्षधर्मोपसंहारे
मया कृते तस्यासिद्धिश्चोदयिष्यति । तदाहन्तां प्रत्ययभेदभेदित्वादिभिरुपायैः
प्रतिनिवारयिष्यामि स्व यमेव वा ऽचोदित एवाशङ्क्यैतच्चेतस्याधाय पक्ष-
धर्मत्वमुपसंहर्तव्यमेव कृतकश्च शब्द इति । यदाप्येवं वादी निश्चितवान्
कृतकत्वस्यानित्यत्वेनाविनाभा वित्वं परस्य प्रसिद्धमिति तस्यामप्यवस्थायां 68b/msK
कृतकः शब्द इत्येतावेदव वक्तव्यं । यथोक्तन्

...44 तद्भावहेतुभावौ हि दृष्टान्ते तदवेदिनः
ख्याप्यते विदुषाम्वाच्यो हेतुरे व हि केवल इति ॥ § 229
[४४] ॥ § 230

तदेतन्नियमाभ्युपगम इत्यधिकं निग्रहस्थानं । विशिष्टे विषये स्थापयति
तच्च विशिष्टं विषयमाह । यत्रेत्यादिना VN_{ms}:15b5 । ननु चेदं निय
माभ्युपगमे वेदितव्यमिति भाष्यकारेणैवोक्तं । तत्किमत्र दूषणमाचार्येणोक्तं
सत्यन्न किञ्चिदुक्तं । आ[चा]र्येण तु पक्षिलो क्तमेवनूद्यतेऽभ्यनुज्ञानार्थम् ॥
४ ॥ § 231

शब्दार्थयोः पुनर्वचनं पुनरुक्त मित्यस्यापवादमाह अन्यत्रानुवादादिति ।
अनुवादो निगमनं । अनुवादो हि न पुनरुक्तव्यपदे शं लभते । शब्दाभ्याम-
र्थविशेषोत्पत्तिः । यस्मात्साध्यनिर्देशः । प्रतिज्ञासिद्धनिर्देशो निगमनमित्युक्तं
। पुनः शब्दश्च नानात्वे दृष्टः । पुनरि यमचिरप्रभा निश्चरतीत्यप्यावेदितमेव ।
यद्येवन्तत्र तर्हि पुन रुक्ततायाः प्राप्तिरेव नास्तीति किमर्थमयमपवादः प्रार- 111/s
भ्यते । सत्यमेवमे तत् । त एव तु प्रकृष्टतार्किकाः प्रष्टव्याः । कथमेतदिति
। अस्माकन्तु किं परकीयाभिर्गृहचिन्ताभिश्चिन्तिताभिरित्यलम्प्रसङ्गेन । अत्र
चेदमपि द्वितीयसूत्रम स्ति अर्थादापन्नस्य स्वशब्देन पुनर्वचनमिति न्या०
सू० ५।२।१५ तदाचार्येण नोपन्यस्तमुपलक्षणार्थत्वात् । तद्भाष्य[म]प-
क्षिप्य निराकरिष्यति । गम्यमानार्थं पुनर्वचनमपी त्यादिना VN_{ms}:15b9
। अत्रेत्यादिना VN_{ms}:15b7 दूषणमारभते । एतदुक्तम्भवति । यत्र श-
ब्दसाम्येप्यर्थो न भिद्यते तत्रार्थपुनरुक्ते न गतं यत्र तु शब्दसाम्येप्यर्थ- 69a/msK
भेदस्तत्र शब्दपुनरुक्ततायामपि न किञ्चित्कृतं । किमस्त्ययमीदृशः सम्भवो
यच्छब्दपुनरुक्ततायामप्यर्थभेदोस्तीत्यत आह । यथा हस ति हसतीत्यादि
VN_{ms}:15b7 । अत्र हि पूर्वो हसतिशब्दः सप्तम्यन्तो द्वितीयश्च तिङ्ग इत्यर्थ-

भेदः । एवमुत्तरत्रापि । काव्य ईदृशः सम्भवो न तु वाद इत्याशङ्कायामुदाहरति । यथा चेत्यादि VN_{ms}:15b8 । ननु चेहाप्यर्थभेदवच्छब्दोभेदोप्यस्ति सुबन्ततिङन्ततया । सत्त्यन्न केवलमत्रापि । अत्राप्यनित्यः शब्दोऽनित्यःशब्द इत्यत्रास्त्येव शब्दभेदः स्वलक्ष णभेदात् । अन्यथा न क्रमभावि श्रवणं स्यात् । समानश्रुतिसमाश्रयमिह पौनरुक्त्यं यदि व्यवस्थाप्यते तदत्रापि तुल्यमेव । अर्थभेद एवायं । क्रि याभेदादिवाच्यभेदात् । तद्बलकल्पित एव हि पदभेदः । गम्यमानार्थं पुनर्वचनमपि पुनरुक्तमिति VN_{ms}:15b9 द्वितीयम्पुनरुक्तलक्षणसूत्रमुपलक्षयति । अस्य चोदाहरणं वात्स्यायनेन न्यायभाष्य उक्तं । साधर्म्यवति प्रयोगे वैधर्म्यस्य । आचार्यस्तु प्रतिज्ञायामप्येतत्समानमित्यागूर्य प्रतिज्ञायाः साधनवा क्येऽनुपन्यासं प्रतिपादयितुकामो वक्रोक्त्या 112/s प्रतिज्ञावचनमेवो दाहरणत्वेनोपन्यस्यति । नियतपदप्रयोगे साधनवाक्ये यथा प्रतिज्ञावचनमिति VN_{ms}:15b9 नियतानां पदानां प्रयोगो यस्मिन्निति कार्यं । इदम्प्रतिक्षिपति अर्थपुनरुक्तेनैव गत[◌ार्थ]त्वान्न पृथग्वाच्यमिति । यथा 69b/msK ह्येकशब्दप्रतिपादितेर्थे तत्प्रतिपादनाय पर्या यशब्दान्तरमुपादीयमानमनर्थकन्तथा सामर्थ्यगम्येप्यर्थ इति अर्थपुनरुक्तेनैवास्य सङ्ग्रह इति समुदायार्थः । क्व पुनरेतत्प्रति ज्ञादिवचनमर्थापत्तिलभ्यं पुनरुक्तं सन्निग्रहस्थानम्भवतीति प्रश्ने नियतप्रयोगे साधनवाक्ये VN_{ms}:15b9 इत्येतदेवम्पक्षेण विवृणोति । अयमपि दोषो गम्यमानार्थपु नर्वचनकृतः साधनवाक्य एव नियतपदप्रयोग इति वर्तते । इदमुक्तम्भवति । यदा प्राश्निकाः शब्दार्थप्रमाणप्रविचयनिपुना◌ः प्रेक्षावन्तोत्यं तमवहितमनसश्च भवन्ति । प्रतिवाद्यपि तथाभूत एवेति वदन्ति यदन्तरेण न साध्यसिद्धिः तदेव प्रयोक्तव्यं । नाभ्यधिकमिति तदायन्दोषो नान्यथा यस्मात्करुणापरतन्त्रचेतसोऽनिबन्धनवत्सलाः प्रतिवादिनमतिदर्लभमिव शिष्यं न्यायवर्त्मावतारयितुं यतन्ते तत्र पुनर्वचनमपि न दोषाय । एतदेवाह । व्याचक्षाणो हि वादी साक्षीप्रभृतीनामसम्यक्श्रवण प्रतिपत्तिशङ्कया करणभूतया सम्यक्श्रवणप्रतिपत्यर्थम्पुनः पुनर्ब्रूयादपीति VN_{ms}:15b10 । नाविषय त्वादिति परः । इदमेव व्याचष्टे नायम्वादी गुरुः VN_{ms}:15b11 प्रतिवादिनः । न शिष्यः प्रतिवाद्यपि वादिनः । द्वयोरपि परस्परजिगीषया व्यवस्थानादिति । तस्मात् न वादिना प्रतिवादी यत्नतः प्रतिपादनीयः । ने VN_{ms}:15b11 त्याद्याचार्यः । यदि नाम प्रतिवादी न प्रतिपाद्यते यत्नेन 70a/msK । साक्षिणस्त्ववश्यं यत्नेन प्रतिपाद्यास्तद्बोधना देव हि वादिनो जयोन्यथा च पराजय इति कथं साक्षिण एव न प्रतिपादयेतकिञ्चावश्यं साक्षिवत्प्रतिवाद्यपि प्रतिपाद्यः । कस्मात्तदप्रतिपादने दोषाभि धानात् । तच्छ[ले]न साक्षिप्रभृतयः प्रत्यवमृश्यन्ते यदि साक्षिप्रभृतयो न प्रतिपाद्या भवेयुस्ततो यद् भवद्भिः परिषत्प्रतिवादिभ्यान्त्रिरभिहितमविज्ञातमविज्ञातार्थं निग्रहस्थानमुक्तं 113/s न्या० सू० ५।२।१६ । तद्विरुध्यत इत्यर्थः । यच्चोच्यते नायं

२ ब्दो] ? ब्द
१९ निपुना] ? णा
२२ तिद] ? दु
३१ येत] ? त्

शिष्य इति तदसिद्धं । प्रतिपाद्यस्य शिष्यत्वात् VN_{ms}:16a1 । तत्वज्ञानार्थतया प्रतिपाद्य एव शिष्योन्यस्य तल्लक्षणस्याभावात् । प्रतिवादी च तथाभूतः कथं न शिष्यः । किमुच्यते नैवासौ प्रतिवादी तत्वज्ञानार्थास्पर्धया व्युत्थितत्वादिति । तदयुक्तं । पूर्व्वञ्जिगीषुवादप्रतिषेधात् VN_{ms}:16a1 । एवमपि नैवासौ यत्वप्रतिपाद्यस्त्रिरभिधाननियमस्य महर्षिणा कृतत्वादित्यत आह । त्रि रभिधान VN_{ms}:16a1 वचनादित्यादि । अनेनैतद्दर्शयति । यद्वक्ष्यति । यदि तावत्परप्रतिपादनार्था प्रवृत्तिः किन्त्रिरभिधीयते तथा तथा स ग्राहिणीयो यथास्य प्रतिपत्तिर्भवति । अथ परोपतापनार्था तथापि किं त्रिरभिधीयते । साक्षिणाङ्कर्णे निवेद्य प्रतिवादी कष्टाप्रतीतद्रुतसंक्षिप्तादिभिरुपद्रोतव्यो यथोत्तरप्रतिपत्तिविमूढस्तूष्णीम्भवतीति । न चेद VN_{ms}:16a1 मिति शब्दार्थयोः पुनर्वचनं । गम्यमानार्थपुनर्वचनं च । अभेदमेव साधयति । विनिय ते VN_{ms}:16a1 त्यादिना । आधिक्यं VN_{ms}:16a2 हेतूदाहरणयोर्दोषः । एकेन कृतत्वादितरस्यानर्थक्यमिति वचनात् । पुनर्वचनेपि गतो ज्ञातः पूर्वेणैव शब्देनार्थो यस्यो त्तरस्य पदस्य तदेवमुक्तं । तस्याधिक्यमेव 70b/msK दोष इत्यधिकृतं । किम्पुनर्नियतपदप्रयोगेऽयन्दोष इत्युक्तमिति चेदाह । प्रपञ्चकथायामदोष VN_{ms}:16a2 इत्यभिसम्बन्धः । क स्य हेत्वादिबाहुल्यस्य VN_{ms}:16a2 । पुनर्वचनस्य च । आदिशब्देनोदाहरणबाहुल्यग्रहणं । कीदृश्यामनिरूपितैकार्थसाधनाधिकरणायां अर्थः साध्यः । अर्थ्यत इ ति कृत्वा साधनं । हेतुरधिकरणन्धर्मी । अर्थसहितं साधनमर्थसाधनं । मध्यपदलोपात् । एकश्च तदर्थसाधनञ्च तथोक्तम् । तस्याधिकरणन्तदनिरूपितमेकार्थसाधनाधिकरणं यस्यां प्रपञ्चकथायां प्रतिवादिना धर्मिणो जीवशरीरादेर्नैको धर्मो नैरात्म्यादिषु प्रमातुमिष्टोऽपित्वनेकः क्षणि कत्वानात्मत्वानीश्वरकर्त्तृत्वादिस्तथा नैकेनैव हेतुना किन्त्वनेकेनापि तस्यामित्यर्थः । एतदेव यथाक्रमं ब्रूते । नानार्थसाधनेप्सायां नाना साधनेप्सायां वा श्रोतुरिति VN_{ms}:16a2 पूर्व्वकः साधनशब्दो भावसाधनत्वात्सिद्धिवचनः । उत्तरस्तु करणसाधनत्वाद्धेतुवचनः । तस्माद्धेत्वादिबाहु ल्यं वचनबाहुल्यं साधनेन विनियतपदे दोषः । कस्मा[त्] प्रतीताय्याभावात् । प्रत्य तुल्यो दोष इति कृत्वा 114/s सङ्गह एव न्याय्यः । अधिकमेव वा वक्तव्यं पुनरुक्त मेव चेत्यर्थः । अनयोरेकस्मिन्द्वितीयस्यान्तर्भावात् । कथं पुनः शब्दपुनरुक्ते ऽधिकस्यान्तर्भाव इत्याह । पर्य्यायशब्दकल्पो VN_{ms}:16a4 ह्यपरो द्वितीयो हेतुरेकहेतु प्र तिपादिते विषये प्रवर्त्तमानः [।] किं कारणं [।] प्रतिपाद्यस्य विशेषाभावात् । अर्थस्य पुनरुक्तन्तर्हि कथमधिकेन्तर्भवतीत्याह अर्थः पुनः प्रतिपादना न्न 71a/msK भिद्यत इति ॥ अर्थशब्देनार्थपुनरुक्तमुपलक्षयति । पुनः प्रतिपाद्यते अनेनेति पुनः प्रतिपादनं हेतूदाहरणाधिकमेव । इदमुक्तम्भवति [।] स्फुटमेवास्य उदा हरणाधिकेन्तर्भावः । तथाहि साधर्म्यवति प्रयोगे वैधर्म्योदाहरणस्याप्रयोगोऽर्थपुनरुक्तस्योदाहरणमुक्तं । यत्पुनरुक्तमेवाद्यपवादप्रतिषेधः सुज्ञानः ॥ ० ॥ § 232

विज्ञातो वाक्यार्थो यस्य त्रिरभिहितस्य तत्तथा । विशेषणसमासो वा विज्ञातश्चासौ वाक्यार्थश्चेति त्रिरभिहितस्य वादिनेति प्रतिपत्तव्यं ॥ प्रतिवादिना प दप्रत्युच्चारणमिति सम्बन्धनीयं । त्रिवचनं सकृदभिहितस्यानन्नुभाषणेपि न निग्रह इति ज्ञापनार्थं । अप्रत्युच्चारणञ्च शब्दद्वारेणार्थद्वारेण वा । निग्रहस्थानत्वे कारणमाह । अप्रत्युच्चारयन् किमाश्रयम्परपक्षे प्रतिषेधं ब्रूयादि VN$_{ms}$:16a7 ति न विषयन्दूषणाभिधानन्नास्तीत्यर्थः ॥ इदन्त्वयोक्तं मति
115/s ङ्कृत्वा दूषणम्वाच्यं । एवन्दूषणवाक्य मपि साधनवादिना प्रत्यनुभाष्य परिहर्तव्यं । अतो द्वयोरपीदं निग्रहस्थानं । अत्र भारद्वाजो न्यक्षेणा क्षेपन्तावत्करोति उत्तरेणावसानात्परिज्ञानान्नेदन्निग्रहस्थानमि ति चेदिति । इदम्वाक्यम्व्याचष्टे [।] स्यादेतदि VN$_{ms}$:16a7 त्यादिना । नोत्तरविषयपरिज्ञानादिति स ए व प्रतिविधत्ते । यद्ययमि VN$_{ms}$:16a8 त्याद्यस्यैव विभागः । अप्रतिज्ञानाच्चेति स एव । उत्तरश्चाश्रयाभावे परपक्षोपक्षेपाभावे सत्ययुक्तमिति युक्तमप्रत्युच्चारणे निग्रहस्थानमित्ये तावान् परकीयो ग्रन्थः । अत्राचार्यो दूषणम्वक्तुमारभते । यदि नाम वादीस्वसाधनार्थस्य विवरणव्याजेन प्रस-
71b/msK ङ्गादपरापरं घोषये त् । यथोदा- हृतम्प्राक्तत्र करणभुवनानि बुद्धिसत्कारणपूर्व्वकाणीति प्रतिज्ञाशरीरादिव्याख्यानच्छद्मना सकलं वैशेषिकतन्त्रं घोषयेदिति VN$_{ms}$:16a10 । तथा जिज्ञासितम र्थमात्रमुक्त्वा कथां विस्तारयेद्यदि नाम वादीति वर्तते । किङ्कृत्वा विस्तारयेदित्याह । प्रतिज्ञादिष्वर्थविशेषणपरम्परयाऽपरान् सिध्यनुपयोगिनोर्थानुपक्षिप्य VN$_{ms}$:16b10 । यथा निदर्शितं पूर्व्वन्नित्यः शब्दोऽनित्यः शब्द इति विवादे जैमिनीयः प्रमाणयति । द्वादशलक्षणे त्यादिना । व्याचष्टे च द्वादशलक्षणानि । यथा वा ऽक्षपादा ए वङ्कुर्वन्ति । किममी सर्वे संस्काराः क्षणिका नो वेति विवादे रूपत्वादिसामान्याश्रय[त्वा]त्तदाश्रयास्तद्विषयाश्च प्रत्यक्षादयः प्रत्ययाः स्वात्मलाभानन्त रप्रध्वंसिनो न भवन्ति । समानानामसमानजातीयद्रव्यसंयोगविभागजनितशब्दकार्यशब्दाभिधेयत्वात्प्रागभावादिवदिति । ननु च प्रतिज्ञादीष्वित्यत्रादिशब्देन किं गृह्यते । न तावद्धेतूदाहरणे तन्मात्रमुक्त्वेति वचनात् । न चापरः कश्चित्प्रस्तुतोऽत्रेति [।] नैष दोषो यतो हेत्वादिमात्रमप्युक्त्वेति द्रष्ट व्यं । तेन हेत्वादीनामेवादिग्रहणेन आक्षेप इति केचित् । अपरे पुनराहुरस्थानमेवेदमाशङ्कितं । त्काप्रत्ययनिर्देशेत्र । यस्मादयमत्रार्थो यत्र प्रतिवा दिना जिज्ञासितमर्थमात्रमन्यविशेषणरहितमक्षणिकत्वादिकं
116/s तदुक्त्वा वाद्य हमेतत्साधयामीत्युत्तरकालप्रमाणमारचयन्प्रतिज्ञादिष्वर्थविशेषणप रम्परयापरानर्थानुपक्षिप्य कथाम्विस्तारयेदिति । तद्ये VN$_{ms}$:16a11 ति प्रतिज्ञादिविशेषणपरम्परया यदप्रस्तुतमेव नाटकाख्यायिकाघोषणकल्पं
72a/msK वादिनोद्भा हितं । तदा कस्तस्य विवादाश्रयश्चासावर्थमात्रश्चाक्षणिकत्वादिकन्तस्योत्तरवचने सामर्थ्यविघातो नैवेत्यर्थः । तस्मान्न वादिकथामननुभाषमाणः प्रति वाद्युत्तरवाद्येन समर्थः । किन्तु यद्वचननान्तरीयिका जिज्ञासितार्थ-

३६ वाद्येन] ?

सिद्धिस्तदवश्यमुपदर्श्यत एवेति सम्बन्धः । कस्मात्साधनाङ्गविषयत्वाद् दूषणस्य । परो पनीते हि साधने दूषणम्प्रवर्तत इति सम्बन्धः किन्नान्तरीयिका पुनर्जिज्ञासितार्थसिद्धिरित्याह । यथा पक्षधर्मता व्याप्तिप्रसाधनमात्र मि VN$_{ms}$:16b1 ति व्याप्तिः प्रसा ध्यतेनेनेति व्याप्तिप्रसाधनं बाधकप्रमाणोपदर्शनं किमियमित्यपि साधनप्रयोगेऽर्थान्तरोपक्षेपः कर्तव्यो नेत्याह । न । तत्रापि प्रसङ्गान्तरो प क्षेप VN$_{ms}$:16b1 इति नैरर्थक्यादिति मतिः [।] तावत् मात्रमुपदर्श्यते किं प्रागनुक्रमेण । पश्चात्तु दूष्यते नेत्याह । तत्रापि दूषणविषयोपदर्शनार्थेऽनुभा षणे न सर्व्वं यावदुपन्यस्तं वादिना तद्दूषणाभिधानात् । प्रागनुक्रमेणोच्चारयितव्यं । कस्मात् त्रिरुच्चारणप्रसङ्गात् । द्विरुच्चारणप्रसङ्गमेव प्रतिपादयितुमादिप्रस्थानमाचरति । दूषणेत्या VN$_{ms}$:16b2 दिना । यदि वचनानुक्रमघोषणं न करोति निर्विषयमिदानीं दूषणम्प्रसक्तमित्याह । नान्तरीय कत्वा[द्]VN$_{ms}$:16b3 दूषयता विषयोपदर्शनं क्रियत एव । कथम्प्रतिदोषवचनं दोषवचनं दोषवचनम्प्रति । यो यो दोषो भण्यते तस्य तस्य विषयः कथ्यत इत्य र्थः । इदमेवाह [।] अस्य वाद्युक्तस्यायन्दोष इति । किम्पुनः कारणं सर्व्वप्रत्युच्चार्ययुगपद्दूषणन्नोच्यत इति चेदाह । नही VN$_{ms}$:16b3 त्यादि । कुतः प्रत्यर्थं दो षभेदात् । विषयवद् भिद्यते 72b/msK दोष इति यावत् । एवमारचितादिप्रस्थानो द्विरुच्चारणप्रसङ्गम्प्रदर्शयति स- 117/s कृदेवाप्रघुष्टो न । सर्व्वानुभाषणेस्य प्रदर्शिते वि षयदोषस्य वक्तुमशक्यत्वात् । केवलमिदं निःप्रयोजनपराजयाधिकरणं चेत्याह । दूषणवादिना दूषणे वक्तव्ये VN$_{ms}$:16b6 सति यत्र सर्व्वानुक्रमभाषणं तत्र परपक्षक्षोभेनोपयुज्यते तस्याभिधानमिदन्द्विरुक्तपदोद्भावनञ्चेत्येवं व्यत्याशेनपदविन्यासः कार्य इति तस्मात्सर्व्वानुक्रमभाषणम्पराजया धिकरणं वाच्यं अत्रेदानी माक्षपादः सर्व्वमिदं दूषणमनभ्युपगमेनैव पूर्व्वपक्षस्यास्माभिः प्रतिव्यूढमिति मन्यमानोऽभ्यनुजानाति । तथास्त्वि VN$_{ms}$:16b7 ति । स्यादेतदित्येतदेव व्याचष्टे । यतः कुतश्चिदि VN$_{ms}$:16b7 ति साधनार्थविवरणस्य व्याजेन प्रतिज्ञादिष्वर्थविशेषणपरम्परोपक्षेपेण चाप्रसङ्गात् अनं तरीयकाभिधानं VN$_{ms}$:16b7 रूपसिद्धिनामादिव्याख्यानकल्पत्वाद्वादिनोऽर्थान्तरगमनमेवेति स तेन निग्रहार्हः । प्रासङ्गिकं ब्रुवाणः किमिति निगृ ह्यत इति चेदाह । नहि कश्चित् क्वचित् क्रियमाणप्रसङ्गो न प्रयुज्यते । यथोक्तम्प्राक् नैरात्म्यवादिनः । तत्साधने नृत्यगीतादेरपि प्रसङ्ग इति । नापि तद्यद्वादि ना प्रसङ्गत्वेन आहितं । तस्य प्रतिवादिनो ऽनुभाषणीयं VN$_{ms}$:16b8 । अनुपयुज्यमाणत्वन्ने वानु भाषणमर्हतीत्यर्थः । तदेतेन यत्पूर्वमुक्तं यदि नाम वादी स्वसाधनार्थविवरणव्याजेने VN$_{ms}$:15b10 त्यादि तदभ्यनुज्ञातं । संप्रति यदुक्तं तत्रापि न सर्व्वं क्रमेणोच्चारयितव्यं । पश्चाद् दूषणम्वाच्यं द्विरुच्चारणप्रसङ्गादिति तदनु 73a/msK जानाति । न चेदमप्यस्माभिरि त्या VN$_{ms}$:16b8 दिना । § 233

२१ त्याशेन] ? सेन
३१ माण] ? न

118/s

आचार्य आह । यदि भवद्भिरप्येद मेवेष्टमेवन्तर्हि नाननुभाषणम्पृथग्वाच्यं VN$_{ms}$:16b9 । कस्मात् प्रतिभयागत्वात् । गतत्वमेव प्रतिपादयति । उत्तरस्य ह्यप्रतिपत्तेरप्रतिभा न्या० सू० ५।२।१८ । ततः कथङ्गतमित्याह । न चोत्तरविषयमप्रदर्शयन् प्रतिवाद्युत्तरं प्रतिपत्तुं ज्ञातुमभिधातुं वा समर्थः । किमिति न शक्त इत्याह । न हीत्यादि । चोत्तरप्रतिपत्तिरुत्तरा प्रतिपत्तिरित्यर्थः । सा नाक्षिप्ता येनाननुभाषणेन तत्तथा । प्रतिषेधद्वयाद्विध्यवसीय आक्षिप्तोत्तराप्रतिपत्तिकमेवेति । एतदुक्तम्भवति । यो हि नामोत्तरम्प्रतिपद्यतेऽतोवश्यं तद्विषयमप्यवेत्यस्येदं दूषणमिति परिज्ञानात् परिज्ञातविषयश्च कथं सचेतनो न तमनुभाषते । तस्माद्यत्राननुभाषणन्तत्राप्रतिभयाभाव्यमिति सा तस्य व्यापिका तरूरिवखदिरस्य तस्याश्च विहितं निग्रहस्थानत्वं व्याप्येऽननुभाषणे तदा क्षिपतीत्येतन्निगमनव्याजेनाह । तेनेत्यादि । अत्रैव दृष्टान्तं ब्रूते गव्यपरामृष्ट तद्भेदायां सामान्यभूतायाम्विहितमिवसास्नादिमत्वत्तद्व्याप्तबाहुलेयेऽपिलब्धमिति वर्त्तते । प्रयोगः पुनर्यदेकविधानसामर्थ्यादनुक्तमपि लभ्य ते । ननुभूयः प्रेक्षापूर्वकारिणा विधातव्यं । तद्यथा गोजातौशास्नादिमत्वविधानसामर्थ्यात् प्रतिलब्धं तर्ह्येषुशास्नादिमत्वं । अप्रतिभानिग्रहस्थान त्वविधानसामर्थ्यात् प्रतिबद्धश्चाननुभाषणनिग्रहस्थानत्वमिति व्यापकविरुद्धोपलब्धिः [।] ननु च विषयं विषयश्च प्रपश्चोत्तरं प्रतिपद्य-
73b/msK मानोप्यति भयकम्पादिभिर्व्याकुलीकृतचेताः प्रतिवादीनानुभाषते स विषयोऽननुभाषणस्याप्रतिभयानालीढस्तत्कथं सा तस्य व्यापिका यतोऽयं हेतुः सिद्धो भविष्यति नैव सम्भवात् । नहि विषयं विषयविषयश्चोत्तरं प्रतिपद्यमानः कुतश्चिद्बिभेति वेपते वा तदज्ञानकृतत्वाद् भयवेपथुस्वेदादीनां । अथ तथाभूतोऽपि भ यादिभिराकुलीक्रियते स तर्ह्यादावेव तथाभूतो वादमपि कर्तुन्नैव धावति । अपि च । यदि परं बाला एवैवं भूता भवन्ति । न च बालव्यवहारानधिकृत्य न्यायशास्त्राणि प्रणीयन्ते । यद्वैवमप्यप्रतिभायाम-
119/s न्तर्भावो नैव व्याहन्यते । यस्माद्द्विविधोत्तरा प्रतिपत्तिरुत्तराज्ञानरूपोत्तरानभिधानरूपा च । तस्माद्यत्किञ्चिदेतत् । अथ परोपतापनार्था तथापि किन्निरभिधीयते । किन्तर्हि कार्य्यमित्याह । साक्षिणामुत्को चोपसङ्क्रमं कर्णे निवेद्या यमत्रार्थो मया विवक्षित इत्युत्तरकालं प्रतिवाद्यनाथो वराकः कष्टाऽप्रतीतद्रुतसंक्षिप्तादिभिः शब्दैरिति शेषः । उपद्रोतव्यः । कस्माद्दु र्भणाः । अप्रतीताः सिंहलभाषादिवदसं केतिकाः । द्रुताः शीघ्रमुच्चारिताः । संक्षिप्ता सूत्रवाण्टादिवद्वर्त्तुलीकृतार्थाः । आदिग्रहणेन गोपिता र्थानाङ्ग्रहणं । यथा । सत्वादुर्वायुस्ते दिश्यायोतायाश्चारात्यस्त्वन्तं पक्षे नोलंवम्विज्ञायैःवेष्टातोयास्पृष्टेशः शमिति । यथा । संप्रति वादी उत्तरप्रतिपत्तौ विमूढ[ः] तूष्णीं भवति । प-

१ प्ये] ? पी
१३ सा] ? सा
१५ गोजातौशा] ? सा
१५ र्ह्येषुशा] ? सा

र्षत्प्रतिवादिभ्यां त्रिरभिहितमविज्ञातमविज्ञातार्थं न्या० सू० ५।२।९ मित्यत्र श्लिष्टकष्टादिशब्दप्रयोगस्य मुनि नानिवारितत्वात् नैवमन्यायं कर्तुं लभ त 74a/msK इति चेदाह । नहि परोपतापक्रम इत्यादि किञ्च न परोपतापनाय सन्तः प्रवर्तन्ते शास्त्राणि वा प्रणीयन्ते तैरित्युक्तं दुर्जनविप्रतिपत्त्य धिकरणे सतांसास्त्राप्रवृतेरित्यत्र । यतश्च परानुपतापयितुं न सन्तः प्रवर्तन्ते तस्मात्तावद् वक्तव्यं यावदनेन न गृहीतं न त्रिरेव वक्तव्यमित्यधिकृतं । अथ वादिना शतधापुनः पुन रभिधाने प्रतिवाद्यतिजडत्वाद् गृहीतुं न शक्नोतीति निश्चितन्तदाऽग्रहणसामर्थ्ये कथञ्चिन्निश्चिते साधनप्रयोगात्प्रागेव परिहर्तव्यो नानेन सहोद्ग्राहयामीति परिच्छिंनमसामर्थं। ग्रहणेऽतिजाड्यापरनामकप्रतिवादिसम्बन्धियेन वादिना स तथा । कथं तथा परिहरन्नाशक्तः शंक्यत इत्याह । पराणनसाक्षिणः प्रबोध्य नायं शक्तो वाक्यार्थं बोद्धुं वस्तु त्वेवं व्यवस्थितमिति ॥ ४ ॥ § 234

120/s

अविज्ञा तञ्चाज्ञान न्या० सू० ५।२।१७ मिति भावे निष्ठाविधानात् साधनवाक्यार्थापरिज्ञानं निग्रहस्थानं । तत एव भाष्ये टीकाकृतो विवृण्वन्ति वाक्यार्थविषयस्य विज्ञानस्यानुत्प त्तिरज्ञानमिति । अस्तु वा कर्मण्येव निष्ठाविधानं तथापि वाक्यार्थविषयज्ञानानुत्पत्त्या विशेषि तं वादिप्रयुक्तं वाक्यमेव प्रतिवादिनो निग्रहस्थान मिति न किञ्चिद्व्याहन्यते । अन्ये पुनर्विवरणेर्थग्रहणं पश्यन्तः सूत्रेप्यर्थग्रहणं भ्रान्त्या पठन्ति । अविज्ञातार्थञ्चाज्ञानमिति सोऽन्येषां पाठः । विज्ञातार्थं साधनवाक्यं परिषदा तस्य प्रतिवादिना यदविज्ञातमनवबोधस्तदज्ञानमित्येवं भावपक्षेऽक्षरविन्यासः । कर्मपक्षे तु तस्येति नाध्याहर्तव्यमेकवा क्यतयैव तु व्याख्यातं । विज्ञातं पर्षदेति किमर्थं 74b/msK पर्षदाप्यविज्ञाते वादिन एवाविज्ञातार्थं निग्रहस्थानं भवतीति ज्ञापनाय । निग्रहस्थानत्वे कारणमाह । अर्थे खल्व विज्ञाते प्रतिवादी न तस्य प्रतिषेधं ब्रूयादिति । अपरे तूत्तरेण दूषणग्रन्थेन सहैतत् सम्बध्नन्ति तच्चायुक्तं भाष्यवार्तिकग्रन्थत्वादस्य । गम्यत्वमेव साध यति यथाऽननुभाषणेऽनुत्तरप्रतिपत्त्यैव निग्रहस्थानत्वं कथमुत्तराप्रतिपत्तिरित्याह । अप्रदर्शितविषयत्वात्प्रतिवादिनोत्तरप्रतिपत्तिरशक्येति कृत्वाऽप्रदर्शितो विषयो येनेति विज्ञेयं विशेषणसमासो वा । तथाहि दूषणस्य विषयख्यापनार्थमनुभाषते तञ्च परित्यज्य यद्यदेव वादिनाऽनुद्ग्राहितमालजालमनुभाषते । तदानीमुत्तरविषयप्रदर्शनप्रसङ्गमन्तरेण तथाभूतस्यानुभाषणस्य वैयर्थ्यादशक्येतिवर्तते । अ नुग्रहप्रतिपत्त्यैव निग्रहस्थानत्वमिति वा । दार्ष्टान्तिकमुपसंहरति । तथा ज्ञानेऽप्युतराप्रतिपत्त्यैव निग्रहस्थानत्वमिति । यस्मादजानन् प्रति वादिदूषणतद्विषयौ कथमुत्तरविषयञ्च ब्रूयात् । उत्तरविषयो दूष्यः । क्वचित्तु पाठः । कथमुत्तरमुत्तरविष-

५ तांसा] ? शा
९ रिच्छिंन] ? च्छिन्न
९ र्थं] ? र्थ्यं
११ न] ? न्

यश्चोतरमिति । अत्रैवं यदसम्ब न्धः । अज्ञानन्नुत्तरविषयश्च कथमुत्तर-
म्ब्रूयादिति । तस्माद्विषयाज्ञानमुतराज्ञानश्च निग्रहस्थानमप्रतिभयैव गम्यत्वात्
। अवाच्यमिति वर्तते किं कारणमन्यथैवमनिष्प्रमाणे सत्यप्रतिभाया निर्विष-
121/s यत्वात् । कथं निर्विषयत्वमित्याह । अनवधारितार्थो हीत्यादि । अन-
75a/msK वधारि तोर्थपूर्वपक्षस्योत्तरस्य च येन प्रतिवादिना स नानु भाषेत् ।
अननुभाष्यमाणश्चासौ विषयमप्रदर्श्योत्तरं प्रतिपत्तुन्न शक्नुयादित्यत उतरन्न
प्रतिपद्येत । न जानीयान्नाभिदध्याद्वा । कस्मादुत्तरविषययोरज्ञाने सत्युत्त-
राप्रतिपत्तिरित्यत आह ज्ञानोत्तरतद्विषयस्योत्तराप्रतिपत्तेरसंभवादिति । ज्ञाता
उत्त रतद्विषयो येनेति वृत्तः । तस्मादुभयमेतदुत्तराज्ञानं । विषयाज्ञानञ्च प्र-
तिपत्तेरप्रतिभापरपर्य्यायायाः कारणं । ननु चोत्तराज्ञानमेवाप्रतिभा त त्कथं
सैवात्मनः कारणत्वेनोपदिश्यते । नोत्तरानभिधानलक्षणाया अप्रतिभासाया
विवक्षितत्वात् । तदभाव इति तयोरुत्तरविषयाज्ञानयोरभा वे सति प्रतिप-
त्तिरभिधानमुत्तरस्य भवत्येव । इति तस्मात्तयोर्विषयाज्ञानोत्तरज्ञानयोरज्ञान-
संज्ञितेन निग्रहस्थानेनाप्रतिभा निग्रहस्थाना त् पृथक्वचने सत्यप्रतिभायाः
को विषय इति वक्तव्यं । न चेद्विषयो भण्यते । तदा निर्विषयत्वादवाच्यैव
स्यादप्रतिभा । तयोरज्ञानानुभाषणयो ः पृथग्वचन इत्यन्ये व्याचक्षते ।
अज्ञानाप्रतिभयोर्विषयभेदव्यवस्थापनाय परः प्राह । नोत्तरज्ञानमज्ञानमुच्यते
। यतोऽप्रतिभा निर्विषयत्वादवा च्यम्भवेत् । किन्तर्ह्यज्ञानमित्याह । विष-
याज्ञानं । एवमपि कथमप्रतिभा विषयवती भवतीत्याह । ज्ञाते विषये
सत्युत्तरकालमुत्तराज्ञानात् । प्रतिवादी त दुतरन्न प्रतिपद्येत न ब्रूयात् ।
75b/msK अतोऽस्ति विषयोऽप्रतिभायाः । अज्ञानाक्रान्तः । एवमप्यवाच्य त्वान्नमुच्य-
स इत्याह । एवन्तर्हीति । अज्ञानेनानुभाषणस्याक्षेपमेव साधयति । नहि
विषयं सम्यक् प्रतिपद्यमानः कश्चित् सचेतनो नानुभाषेतेति नानुभाषणम
ज्ञानात्पृथग्वाच्यं । अपिचैवमप्रतिभाप्यननुभाषणवदज्ञानात्पृथग्नवाच्येत्याह ।
उत्तराज्ञानस्य चाक्षेपादिति । इदं व्याचष्टे विषये त्यादिना । ज्ञाते विषय
122/s इत्यादि परः । इदमुक्तम्भवति द्विधोत्तराज्ञानविषयाज्ञानसहचरश्च विष-
यज्ञानसहचरश्च । तत्राद्यस्य विषयाज्ञाने नाक्षेपेऽप्युत्तरमनाक्षिप्तमेव ततो
द्वितीयापेक्षयाऽप्रतिभायाः पृथगुपादानमिति । अनवस्थैव निग्रहस्थानानां प्र-
सज्यत इत्याह । एवन्तर्ही त्यादि । यथेत्याद्यस्यैव वि भागः । तथा
ज्ञानयोरपीति विषयोत्तराज्ञानयोरपि । सर्वस्योत्तरस्य विषयस्य चाज्ञानं ।
आदिग्रहणेन द्वित्रिचतुर्भागाद्यवरोधः । वि षयोत्तराज्ञानयोः सङ्ग्रहवचने दोष
इति चेदाह । न चेति । यथा न दोषस्तथागुणोपि नास्तीति चेदाह । गु
णश्च लाघवसंज्ञः स्यादिति सं ग्रहवचनं न्याय्यं । अप्रतिभाविषयत्वान्न पृथ-
ग्वचनं । अप्रतिभावचनेनैवानयोः सङ्ग्रह इत्यर्थः । न केवलमनयोरेवापृथ-
ग्वचनं । न्याय्यमपि त्वन्ये षामपीत्याह । अपि चेत्यादि । तदुभयव-
चनेनैवेति । हेत्वाभासाऽप्रतिभयोरेव वचनेन सर्वप्रतिज्ञाहान्यननुभाषणाद्युक्तं
। नहि कश्चिद्धन्यस्साधनवादी प्रतिपक्षधर्ममभ्युनुजानाति प्रतिज्ञाम्वा प्र-

तिज्ञासाधनायोपादत्त इत्यादि वाच्यं । तदा न कश्चि[द्]दूषणं व्यक्तमेव
यन्नानुभाषते । कथां विक्षिपति । परम तश्चानुजानातीदिवक्तव्यं । त- 76a/msK
दुभयाक्षेपेपि प्रपञ्चो गुणवानतस्तदवचनादरोमुनेरिति चेदाह । तदुभयाक्षिप्तेषु
प्रभेदेषु गुणातिशयम न्तरेण । अनुपलभ्यमानत्वाद् गुणस्य प्रपञ्चवचनाद-
रेऽतिप्रसङ्गात् । कक्षपिट्टिता दीनामभिधानप्रसङ्गात् । अतो व्यर्थः प्रपञ्चो 123/s
महामुनिनाक्रियत ॥ ० ॥ § 235

परपक्षप्रतिषेधे कर्तव्ये उत्तरं दूषणं यदा न प्रतिपद्यते न वेत्ति नाभिद-
धाति तदा निगृहीतो वेदितव्य इतीयान् परग्रन्थः । साध्वेतन्निग्रहस्थानं
। अतएवास्माभिरपीदमदोषोद्भावनमित्यत्रोक्तमित्येतत् मत्वाऽभ्यनुजानाति ।
साधनेत्यादि । साधन वचनानन्तरं प्रतिवादिना दूषणम्वक्तव्यं । स य
दा सर्वं तदकृत्वा सर्व्वानुक्रमानुभाषणेन श्लोकपाठेन सभासम्वर्ण्णनेनान्येन
कालन्नयति तदासौ व्यर्थं निष्प्रयोजनं कालङ्गमयन्कर्त्तव्यस्य दूषणाभि धान-
स्य प्रतिपत्त्याऽननुष्ठानेन निगृह्यते । व्यर्थस्येदं क्रियायाः कालस्य विशेषणं
॥ ० ॥ § 236

कार्यव्यासङ्गः कर्णीयोपन्यासः कथाविच्छेदः क थानिवृत्तिः । यथा
जीर्ण्णकला मे बाधते । सम्प्रति वक्तुँ न शक्नोमि पश्चात् कथयिष्यामीति
एवमादिना प्रकारेण कथामुद्ग्राहणे काचिच्छिनत्तिः । निग्रहस्थाने कारण-
माह । एकतरस्य वादिनः प्रतिवादिनो वाऽसाधनाङ्गवचनेनादोषोद्भावनेन
च निगृहणन्ती निग्रहपर्यवसाना कथा । तस्याश्च तथाभूतायां प्रस्तुता यां
स स्वयमेव कथांतं कथा पर्यवसानं प्रतिपद्यत इति निग्रहस्थानमेतत् ।
अत्राचार्योब्रूत [।] इदमपि कार्यव्यासञ्जनं यदि तावत् पूर्वपक्षवादी कुर्यात् 76b/msK
साधनाभिधानशक्तिविकलत्वाद् व्याजो- पक्षेपमात्रेण येन केनचिच्छलेनेत्यर्थः
। न पुनर्भूतस्य तथाविधकथोपरोधिनः कार्यस्य भावे सति कुर्यादिति वर्त्तते
। तथा वि धामुद्ग्राहणिकारूपाङ्कथामुपरोद्धुं शीलं यस्य कार्यस्याजीर्ण्णक-
ला कुक्षिशूलगेहु दाहाद्यैस्तत्तथा । यदि सद्भावेनैव तस्य तस्याम्वेलायां
कुक्षिगलशूलगेहु दा हादयो भवन्ति तथा सति नैव निग्रहस्थानमित्यर्थः ।
यदा पुनर्व्याजमात्रेणैव करोति तदा तस्य पूर्व्वपक्षवादिनः स्वसाधनासामर्थ्य- 124/s
परिच्छेदादेव विक्षेप ः स्यात्ततः किमित्याह । तथा चेदं विक्षेपसञ्ज्ञितन्निग्र-
हस्थानमर्थान्तर एवान्तर्भवेत् । रूपसिद्धिनामादिव्याख्यानसमानत्वात् कर-
णीयोपन्यास स्य । हेत्वाभासेष्वेवान्तर्भवेदित्यधिकृतं । कस्मादसमर्थश्च त-
त्साधनञ्च तस्याभिधानात् । किञ्चेदं निरर्थकापार्थकाभ्यां सकाशान्न भिद्यते
। किं कारणं प्रकृतञ्च तत्साधनञ्च तेनासम्बद्धा च सा प्रतिपत्तिश्च ततः
साधनवाक्येन सहास्य दशदाडिमादिवचनस्येव जबगडादिवर्ण्णक्रमस्येव च
सम्बद्धानुपलम्भादित्यर्थः । किञ्चिन्मात्रभेदान्निमित्तलेशेन पृथगुक्तमिति चे-
दाह । अति प्रसङ्गश्चे त्यादि । असम्बद्धासाधनवाक्येन प्रतिपत्तिर्येषां प्र-

२ श्चानुजानातीदि] ? ति
२५ गेहु] ?
२६ गेहु] ?

तिभेदानान्तेऽसम्बद्धसाधनवाक्यप्रतिपत्तयः । ते च ते प्रभेदाश्च तेषामिति कार्यं एवन्तावत् पूर्वपक्षवादिसम्बन्धेन विक्षेपस्य पृथगनभिधान मुक्तं ॥ अधुना प्रतिवादिसम्बन्धेनाप्याह । अथोत्तरपक्ष वाद्येवं बलासकलात्मकण्ठं 77a/msK क्षिणोतीत्यादिना प्रक्रमेण कथां विक्षिपेत् तदानीन्तस्याप्यु त्तरपक्षवादिनः साधनानन्तरमुत्तरे प्रतिपत्तव्ये सति तदप्रतिपत्त्या तस्योत्तरस्यानभिधानेन विक्षेपप्रतिपत्तिर्यासाऽप्रतिभायामर्थान्तरे वान्तर्भवती ति परस्तु यथोक्तमन्तर्भावमसहमानश्चोदयति । § 237

ननु नावश्य मिति तदेव द्रढयति [।] भवति ह्यनिबद्धेनापि साधनवाक्येनासम्बद्धे नापि कथाप्रबन्धेन परप्रतिभाहरणायान्तशो जननीव्यभिचारचोदनेनापि विवाद इति । आचार्य आह । नासम्भवादेवंविधस्य विवादस्य । यस्मादेकत्र शब्दादावधिकर णे नित्यत्वानित्यत्वादिप्रतिज्ञानाविरुद्धावभ्युपगमौ ययोर्वादिप्रति वादिनोस्तयोर्विवादः स्यात् । कुत एतदित्याह । अविरुद्धाव- 125/s भ्युपग मौ ययोस्तौ तथा न विद्येते विरुद्धाविरुद्धयोरभ्युपगमौ ययोः पुरुषयोस्तावभ्युपगमौ । तयोर्विवादाभावात् । तत्रैतस्मिन्व्यवस्थिते न्याय निर्धारणे वा तत्र शब्दः । एकस्य वादिनः प्रतिवादिनोवश्यं प्राग्वचनप्रवृत्तिः । यौगपद्येन किन्न ब्रूत इत्याह । युगपत्प्रवृत्तौ स्वस्थात्मना मप्रवृत्तेरिति सम्बन्धः । एतदेव कुत इत्याह । परस्पर वचन श्रवणावधारणोत्तराणामसम्भवेन करणभूतेन प्रवृत्तिवैफल्यात् । यदि हि परस्परवच नस्यासङ्करेण श्रवणम्भवेत्ततस्तदर्थमवधारयत्युत्तरञ्च । युगपत्प्रवृत्तौ च दिगम्बरपाठकलकल इव सर्व्वमेतन्न संभवति तस्मादवश्यमेकस्य प्राग्वचन प्रवृत्तिः । अतस्तेन च स्वस्थात्मना पूर्व्वपक्षवादिनाऽनित्यं शब्दं साधयामीत्यादिना स्वोपगमोपन्यासे कृते सत्य- 77b/msK वश्यं साधनं वक्तव्यं । अन्यथेति हेत्वनभिधा ने परेसांसाक्षिप्रभृतीनामप्रतिपत्तेः । अपरेण चेत्युत्तरपक्ष- वादिना तत्सम्बन्धिवादिप्रोक्तसाधनसम्बन्धि दूषणं वक्तव्यमिति वर्त्तते [।] तस्मादुभयोर्वादिप्र [ति] वादिनोरसम्यक् प्रवृत्तौ सत्यां हेत्वाभासाप्रतिभयोः संग्रह इति सर्व्वो न्यायप्रवृत्तः पूर्व्वोत्तरपक्षोपन्यासो द्वयं हेत्वाभासाप्रतिभाश्च नातिपतति । § 238

ननु च यदि न्यायः प्रवृत्तः कथन्तत्रास्य द्वयस्याधिकारः । कथञ्चैकत्र धर्म्मिणि विरुद्धावुपन्यासौ न्यायप्रवृत्तावश्यं हि तत्रैकेनोपन्यासेन न्यायं प्रवृत्तेन भाव्यं । अन्य था धर्म्मीद्व्यात्मको भवेत् । नाभिप्रायापरिज्ञानात् । नेदम्भवता न्यायप्रवृत्तत्वमाचार्येण विवक्षितं पर्यज्ञायि । न्यायप्रवृत्तौ हि पूर्व्वोत्तरपक्षोप न्यासस्य युगपत्प्रवृत्त्यभावेन जननी व्यभिचारवेदनाद्यभावेन चाभिप्रेतं । एतेनैकत्र ह्यधिकरणे विरुद्धाभ्युपगमयोर्विवादः स्यादित्यादि ना वितण्डा प्रत्युक्ता । कथं प्रत्युक्तेत्याह । अभ्युपगमाभावे विवादाभावात् । इदमुक्तम्भवति । स्वपक्षस्थापना हीनो वाक्यसमूहो वितण्डे त्युच्य ते 126/s न्या० सू० १।२।३ । यदि चवैतण्डिकस्य स्वपक्षो नास्ति विवादस्तर्हि

२२ रेसां] ? षां

३० वृत्तौ] ?

कथमिति वक्तव्यं । परपक्षप्रतिषेधार्थम्वैतण्डिकः प्रवर्त्तत इति चेत् । परपक्षप्रतिषेध एव तर्ह्यस्य स्वपक्षस्थापनेति वितण्डालक्षणं विशीर्यते । तथा हि यो येनाभ्युपगतः स तस्य स्वपक्षः । परपक्षप्रतिषेधश्च तेनाभ्युपगतः स्वपक्षतां नातिवर्तत इति । यदा तर्ह्युपगम्य वादं प्रतिज्ञामात्रेण विफलतया परिषच्छारद्येन व्याकुलीकृतत्वादित्यर्थः । न किञ्चित् साधनं तदायासं वा वक्ति । अन्यद्वा किञ्चित् प्रलप ति । साधनतदाभासव्यतिरिक्तं काको 78a/msK विरूपं विरौति नूनमयं मे गेहे विपदं सूचयति तदलमनेन विवादेन । यामि तावद् गेहे किन्नु मे पितुर्मरणमन्यद्वा वर्त्तत इत्या दि । तथा कथं हेत्वाभासान्तर्भावः । साधनाभावाद्धेत्वाभासासम्भवं मन्यते । उत्तराप्रतिपत्तिरपि नास्त्येव पूर्व्वपक्षवादित्वादित्यभिप्रायः । तदनेन द्वयन्नातिपततीत्येतद्विघटयितुमिच्छति परः । आचार्य आह । असमर्थितसाघनाभिधान एवमुक्तं द्वयं नातिपततीति प्रोक्तसाधन एतदुक्तमिति यावत् । अप्रोक्ते तु कथं प्रतिपत्त व्यमित्याह । अनभिधानान्यभिधानयोरपि सतोः पराजयः एवेत्युक्तं प्रकरणावतार एव । तदेव स्मरयति । अभ्युपगम्यवादमसाधनाङ्गवचनादिति । तथाहि तत्र व्याख्यातं । साधनाङ्गस्यानुच्चारणं । साधनाङ्गाद्वा यदन्यस्याभिधानं तत्सर्व्वमसाधनाङ्गवचनमिति । एतेनेत्यन्याभिधानेन पराजयवचने नाधिकस्य पुनरुक्तस्य च प्रतिज्ञादेर्वचनस्य च निग्रहस्थानत्वं व्याख्यातं । कथमित्याह । तदपि हीत्यादि । अनेनैतदाह । यद्युक्तियुक्त मक्षपादेन किञ्चि न्निग्रहस्थानमुक्तन्तदस्माभिरसाधनाङ्गवचनपदेनैव संगृहीतमिति यद्येवं प्रतिज्ञादेर्वचनस्य चेति किमर्थयुक्तन्नहि प्रतिज्ञोपनयनिगमनानां वचनन्नि ग्रहस्थान मक्षपादे नोक्तं । प्रत्युत तदवचनमेव निग्रहस्थानतया । यदिष्टं हीनमन्यतमेनाप्यवयवेन न्यून न्या० सू० ५।२।१२ मिति । एवं तर्हि दृष्टान्तार्थमेतद्यथा तस्याप्रतीत प्रत्यायनशक्तिविकलत्वादसाधनाङ्गवचनपदेनाभिधानं । तथाधिकपुनर्वचनयोरपीति । तत एव च द्वितीयश्चकार इव शब्दार्थे वर्त्तते । अन्यथा पुनरु क्तस्य चेत्ययं बोध्यर्थः स्यात् । केचित्तूक्त- 78b/msK रश्चकारन्न पठन्ति । तैः पुनरुक्तव्याख्यानमेव प्रतिज्ञादेर्वचनस्य चेत्येतद् व्याख्येयं । एवमपि न युक्तमक्षपादेनैवम्विधस्य पुन रुक्तस्यानिष्टत्वान्नास्ति दोषः । पूर्व्वतुल्यधर्मतयाऽस्यापि पुनरुक्तेऽन्तर्भावितत्वात् ॥ ० ॥ § 239

127/s

स्वपक्षदोषाभ्युपगमात् परपक्षदोषप्रसङ्गो मतानुज्ञा न्या० सू० ५।२।२० VN$_{ms}$:18b3 दोषपरि हारे वक्तव्ये दोषस्यापरिज्ञानात् परमतमनुजानात्यतो निगृह्यते । तदाह परेण वादिना चोदितं पर्यनुयुक्तं दोषमनुवृत्या परिहृत्य भवतोप्ययं दोष इति ब्र वीति । यथा भवांश्चौरः पुरुषत्वा VN$_{ms}$:16b4 च्छ्वरादि [वदि] त्युक्ते वादिना स प्रतिवादी तं वादिनं प्रतिब्रूयात् । भवानपि चौर इति सोपि शब्दप्रयोगादात्मनश्चौर त्वमभ्युपगम्य परपक्षे तन्दोषमासञ्जयन्नापादयत्यपरेण वादिना यन्मतं प्रतिवादिनश्चौरत्वं तदनुजानाति । तथा हि ते न मुक्तसंस यन्तावदात्मन श्चौरत्वं प्रतिपत्तुमन्य-

३६ संस] ? श

था नापि तमभिदध्यात् । वादिनि तु तदस्तिनास्तीति चिन्त्यमतो मतानुज्ञा
निग्रहस्थानं । इदमाचार्यो निराकरोति । अत्रापि VN$_{ms}$:18b5 यद्ययम-
भिप्राय उत्तरवादिनः पुरुषत्वाच्चौरो भवानपि स्यादहमिव । न च भवतात्मैवं
चौरत्वेनेष्टस्तन्नायं पुरुषत्वादिति चौर्ये साध्ये हेतुरचौरेपि भव ति विपक्षभूते
वृत्तेरनैकान्तिकदोषदुष्टत्वादिति । तदस्मिन्प्रतिवादिनोऽभिप्राये न कश्चित्तस्य
दोषो मतानुज्ञालक्षणोऽन्यो वा । कस्मादनभिमते चौरत्वे न रू पेण तस्य
वादिन आत्मनि विपक्षभूते हेतोः सत्वप्रदर्शनेन प्रकारेण दूषणात् । विदग्धभ-
79a/msK ङ्गाव्यभिचारोद्भावनादिति यावत् । औद्योतकरं *चोद्यमाशङ्कते प्रसङ्गमन्तरेण
भवानपि स्यादित्येवमाञ्जसेनैव मृजुनैव क्रमेण किन्न व्यभिचारितो हेतुस्त्व-
य्यपि अचौरे वर्त्तते पुरुषत्वमतोऽनैकान्तिकत्वमिति । तस्माद्यत एवासाव-
128/s कौटिल्ये कर्तव्ये कौटिल्यमाचरति तत एव निगृह्यत इति । आचार्य आह
। यत्किञ्चिदेतद VN$_{ms}$:18b6 औद्योतकरं वचो यस्मात् सन्ति ह्येवं प्रकारा
वैदग्ध्यप्रवर्तिता व्य वहारा लोके । तथा हि मातरो भावत्क्यो बन्धक्यः
स्त्रीत्वादितरबन्धकीवदित्युक्ताः पशुपालादयोपि जडजनङ्गमादिजनसाधारणं
वैदग्ध्यमनुसरं तः प्रत्यवतिष्ठन्ते । तावकीनापि माता तथा स्यादिति न च
तेऽनेन प्रकारेण स्वस्याः स्वस्या मातुर्बन्धकीत्वं प्रतिपद्यन्ते । अपि तु भङ्ग्या
हेतुव्यभि चारचोदनया परं प्रतिवदन्ति । तस्मादेवं बालहालिकादिलोकप्र-
कटमपि व्यवहारालोकमपसारयता यदि परमुद्योतकरत्वमेवो द्योत करेण
उद्योतितमात्मनः । अथोच्यते नैवासौ भंग्या व्यभिचारमादर्शयत्यपि तु तस्य
साधनस्य सम्यक्त्वमभ्युपगम्यैव तेन दोषेण परमपि कलङ्कयतीत्यत आह
। अथ तदुपक्षेप[ः] पुरुषत्वाद् भवांश्चौर इत्येनमभ्युपगच्छत्येव तदाप्यसौ
तत्साधन उत्तराप्रतिपत्यैव निग्रहार्हो नापरत्र वादिनिस्त्वदोषस्य चौरत्वस्योप-
क्षेपात् । निग्रहार्ह इति वर्त्तते । इदमेवोपोद्बलयति । तत्साधननिर्दोषतायां
VN$_{ms}$:18b8 ह्यंगीकृतायामिति शेषः । तस्योपक्षेप स्याभ्युपगम एव यः
स एवोत्तराप्रतिपत्तिरिति तावतैवोत्तराप्रतिपत्तिमात्रेणैवापरत्र दोषप्रसञ्जनात् ।
79b/msK पूर्वसाधननिग्रहस्य सतः प्रतिवादि नः आपन्नः प्राप्तो निग्रहो येन तस्येति
चेति विग्रहः । परदोषोपक्षेपस्य मतानुज्ञालक्षणस्यानपेक्षणीयत्वात्पराजितप-
राजयाभावादिति भावः ॥ ० ॥ § 240

निग्र हप्राप्तस्यानिग्रहः पर्यनुयोज्योपेक्षणं VN$_{ms}$:18b9 पर्यनुयोज्यो
नाम निग्रहप्राप्तस्यो[पे]क्षणन्निग्रहप्राप्तोसीत्यनभिधानं । क[ः] पुनरिदं प-
र्यनुयोज्योपेक्षणं निग्रहस्थानं चोदयति । न तावत् पर्यनुयोज्य इति युक्तं ।
असम्भवात् । न ह्यस्ति सम्भवो यत् परदोषप्रतिपादनार्थमात्मनो दोषवत्व-
129/s मसावभ्युपेति । निग्रहप्राप्तः सन्न हमनेनोपेक्षितो निग्रहस्थानस्यापरिज्ञानात्
। तस्मादयन्दोषवानिति नाप्युपेक्ष इति युक्तं । यस्मादसौनि जानात्येवायं
निग्रहप्राप्त इति । तथा ह्यपरिज्ञानादेवासौ नानुयुंक्ते निग्रहं प्राप्तोसीति ।

८ *] न्यायवार्त्तिके ५।२।२१ पृष्ठ ५५९

परिज्ञाने वा कथमुपेक्षेत । उपेक्षणे वा समचित्तः कथमेवं प्रकटयेदयं मयोपेक्षितः स दोषस्ततो मम पर्यनुयोज्योपेक्षणं निग्रहस्थानमिति । न चान्यस्तृतीयः कश्चिदिहानुषङ्गी तत्केनेदं चोदनीयमित्येतत् सर्व्वमाशङ्क्य पक्षिल स्वामी ब्रूते । एतच्च पर्यनुयोज्योपेक्षणं वक्तव्यश्चोदनीयङ्कस्य पराजय इत्येवं वादिप्रतिवादिभ्यां प्रगुणा तदन्यैर्वा पर्यनुयुक्तया पृष्टया सत्या परिषदा प्राश्निकैर्वक्तव्यमित्यर्थः । च शब्दोऽवधारणार्थः । एतदेवअन्यानि निग्रहस्थानानि वादिप्र[ति]वादिभ्यामेवोद्भाव्यन्ते । एतत्पुनः प्राश्निकैरेव । किं पुनः कार णं ताभ्यामेव नोच्यत इत्याह । न खलु निग्रहप्राप्तः स्वकौपीनं स्वदोषं 80a/msK विवृणुयात् VN_{ms}:18b10 प्रकाशयेत् । अत्रापीत्याद्याचार्यः । यदि तु न्यायश्चिन्त्यते तदानैकस्यापि जयपराजयौ न्याय्यौ । कथं वादिनो जय इत्याह साधनाभासेन जिज्ञासितस्यार्थस्याप्रतिपादनात् । अत एव न प्रतिवादिनोपि पराजयो वादिविवक्षि तार्थसिद्ध्यपेक्षया प्रतिवादिनः पराजयव्यवस्थापनात् । प्रतिवादिनस्तर्हि किं जय इत्याह [।] भूते दोषानभिधानाच्च VN_{ms}:19a1 । अतएव च न वादिनः पराजयस्त दूषणापेक्षया तद्व्यवस्थितेः । अथोत्तरपक्षवाद्यनेकदोषसद्भावेपि वादिप्रोक्तस्य साधनस्य कश्चिद्दोषमुद्भावयति कश्चिन्न । न तदासौ निग्रहमर्हति । किङ्कारणमुत्तरस्य प्रतिपत्तेरभिधानादित्यर्थः । पर आह । अर्हत्येव निग्रहं सर्व्वेषान्दोषाणामनुद्भावनात् । आचार्य आह । न खलु भोः सन्त इति कृत्वा सर्व्वे दोषा अवश्यं वक्तव्याः प्रतिवादिना । अवचने वा दोषान्तरस्य निग्रहो भवति नेति वर्त्तते । कस्मात् सर्व्वे दोषा नोद्भाव्यं त इत्याह । एकेनापि VN_{ms}:19a2 दोषेणासिद्धत्वादिनोद्भावितेन न तस्य वादिप्रयुक्तस्य साधनस्य विघातात् । साध्यसिद्धिं प्रत्यसमर्थत्वप्रतिपादनादित्यर्थः । भाव साधनो वा साधनशब्दः । अत्रैव दृष्टान्त 130/s माह । एकसाधनवचनवदिति VN_{ms}:19a3 । यथेत्याद्यस्यैव विभागः । एकस्यार्थस्य क्षणिकत्वादेः प्रतिपादनायानेकस्य साधनस्य सत्वकार्यत्वप्रयत्नोत्थत्वादेः सद्भावेपि सत्येकेनैव सत्वादीनामन्यतमेनोपात्तेन तस्य क्षणिकत्वादेरर्थस्य सिद्धेर्निश्चयान्न सर्व्वेषां साधना नामुपादानं । तथेकेनापि दोषेण 81a/msK तत्साधनविघातान्न सर्व्वोपादानमितीदन्दृष्टान्तेन साम्यं । इति तस्मान्नोत्तरपक्षवादी पूर्व्वमेकं दोषमुद्भावयन्नेवापर स्य दोषान्तरस्यानुद्भावनान्निग्रहार्हः । पूर्व्ववदिति साधनाभासेनाप्रतिपादनात् । भूतदोषानभिधानाच्च । § 241

ननु च कथन्न वादिनो जयो यावता न तेन साध नाभासः प्रयुक्तः । प्रतिवादी त्वसन्तं दोषमुद्भावयतीत्यत आह । दोषाभासं ब्रुवाणमुत्तरपक्षवादिनं VN_{ms}:18a4 स्वसाधनात्सकाशादनुसारयतोऽनिवर्त्तयतस्त दुक्तदूषणाभासत्वेनाप्रतिपादयत इति यावत् । वादिनो न जयः कस्मादसमन्वितसाधनाङ्गत्वात् । असमन्वितसाधनाङ्गं येन तस्य भावस्त त्वं । एतदेव कुत इत्याह [।] सर्व्वदोषाभाव प्रदर्शनेन साधनाङ्गसमर्थनात् VN_{ms}:19a5

६ देव] ? एवमेव

। इत्त्थम्भूतलक्षणे करणे वा तृतीया पाणिनि २।३।२९ असमर्थितत्वात् साधना भास एव तेन प्रयुक्त इति संक्षेपार्थः । नाप्युत्तरपक्षवादिनो जय इति वर्त्तते । तस्मादेवमपीति यदि पूर्वपक्षवाद्युत्तरपक्षवादिनं न निग्रहप्राप्तं निगृह्णाति न केवलमुत्तरवादिसम्बन्धेनेत्यपि शब्दः ॥ ० ॥ § 242

निरनुयोज्यस्यानुयोगः VN_{ms}:19a6 । अनिग्रहप्राप्ते निगृहीतोसीत्यभिधानं । किं पुनरेवं ब्रूत इत्याह [।] निग्रहस्थानलक्षणस्य मिथ्याव्यवसायाद्य VN_{ms}:19a6 थोक्तस्य निग्रहस्थानलक्षणस्य सम्यगपरिज्ञानादित्य-
131/s र्थः । एवञ्चाप्रतिपत्तितो निगृ ह्यते । अत्रापीत्याद्याचार्यः । यदि तस्य साधनस्य वादिनमभूतैरलीकैर्दोषैः सव्यभिचारादिदोषदुष्टं त्वया साधनं प्रयुक्तं ततो निगृहीतोसीत्येवम भियुञ्जीत । तदा सोऽस्थानेऽस्य व्याख्यानं निर्दोषनिग्रहस्थानस्य अस्य विभागादेवास्येति । अभियोक्तेत्यस्य विवृतिरुद्भावयितेति । तथा चालीकदोष स्याभिधायित्वे सति दोषोद्भावलक्षणस्योत्तरस्याप्रतिपत्तेरभिधानादप्रतिभयैव करणभूतयोत्तरवादी निगृहीत इति कृत्वा नेदन्निरनुयो ज्यानुयोगाभिधानन्निग्रहस्थानमतोऽप्रतिभानिग्रहस्थानात्सकाशान्न निग्रहस्थानान्तरं । कदा चायमप्रतिभया निगृह्यत इत्याह [।] इतरेण VN_{ms}:19a8 वादि ना तदुक्तस्योत्तराभासत्वे प्रतिपादिते अन्यथा न द्वयोरेकस्यापि पूर्ववज्जयपराजयावित्याकूतं । एवं प्रतिवादिसम्बन्धेनास्यापृथग्वच नं प्रतिपाद्य वादिसम्बन्धेनाप्याह [।] अथोत्तरवादिनं भूतं सत्यं साधनदोषं सव्यभिचा[रा]दिकमुद्भावयन्तमपर इति पूर्वपक्षवादी दोषाभा सवचनेनाभियुञ्जीत । जात्युत्तरमनैकान्तिकाद्याभासं त्वया प्रयुक्तं । तस्मान्निगृ[ही]तोसीत्येवं यद्यभियुञ्जीतेत्यर्थः । तदा तस्योद्भावितस्य दो षस्य व्यभिचारादेस्तेनोत्तरवादिना भूतदोषत्वे प्रतिपादिते जात्यु [त्त]रत्वे परिहृत इति यावत् । साधनाभासवचनेनैव वादी निगृह्यते इति ॥ तस्मादेवमपि प्र तिवादिसम्बन्धेनापि नेदं हेत्वाभासेभ्यो भिद्यत इति पृथग्वाच्यं । अस्यैवोपोद्वलनमवश्यं हि द्वाविंशतिनिग्रहस्थानवादिना हेत्वाभासाः पृथग् निग्रहस्था नत्वेन वक्तव्याः । किमर्थमित्याह । विषयान्तरप्राप्त्यर्थं VN_{ms}:19b1 निरनुयोज्यानुयोगादिभिर्न्निग्रहस्थानैरनाक्रान्तसङ्ग्रहमपीति
81b/msK अन्यथा द्वाविंशतित्वं निग्रहस्था नानामभ्युपगमम्विरुध्यत इत्यभिप्रायः । तथा च तदुक्तौ तेषां हेत्वाभासानां निग्रहस्थानेनोक्तौ सत्यामपरोक्तिः । अपरस्य निरनुयोज्यानुयोगस्योक्तिर्निर[ि] र्थका हेत्वाभासवचनेनैव संगृहीतत्वात् ॥ ० ॥ § 243

132/s

सिद्धान्तमभ्युपेत्यानियमात् कथाप्रसङ्गोऽपसिद्धान्त इति VN_{ms}:19b1 सूत्रं सिद्धान्तमभ्युपेत्य पक्षपरिग्रहं कृत्वाऽनियमात् पूर्वप्रकृतार्थोपरोधेन शास्त्रव्यवस्थामनादृत्येति यावत् । कथाप्रसङ्गोऽर्थान्तरोपवर्णनं । कस्यचिदर्थस्येति धर्मिणो धर्मान्तरं प्रतिज्ञाय प्रतिज्ञातार्थ विपर्ययो विरोधः । इदं उदाहरणेन स्पष्टयति । यथा न सतो वस्तुनो विनाशो VN_{ms}:19b2

निरन्वयः केवलं तिरोभावमात्रं भवति नासत् खरविषाणतुल्यमु त्पद्य-
ते । किन्तर्ह्याविर्भावतः । सदेवोत्पद्यत इत्येवं कापिलः सिद्धान्तव्यव-
स्थामादर्श्य पक्षङ्करोति । एका प्रकृतिर्व्यक्तस्याव्यक्तलक्षणा । व्यक्तस्येति
म हदादेः । अत्र हेतुमाह विकाराणां शब्दादीनामन्वयदर्शनात् । मृद-
न्वयानामित्यादिदृष्टान्तः । तथा चायमित्युपनयनः। सुखदुःखमोहसमन्वित
VN$_{ms}$:19b3 इति सुखादिमयत्वं दर्शयति । दर्शितश्च सुखादिमयत्वं व्यक्त-
स्य पूर्वं यथासांख्येनाभिमतं । तत्तस्मात् सुखादिभिरेकप्रकृतिरित्ययं व्यक्त-
भेदः । इति निगमनं सुखादिभिरितीत्त्थंभूतलक्षणे तृतीया । सुखादिप्रकारा
सुखादिलक्षणा । एका प्रकृतिरस्येत्यर्थः । अन्ये पठन्ति । एका प्रकृतिर्व्यक्ता
व्यक्तविकाराणामन्वयद र्शनादिति । एवञ्च व्याचक्षते । एका प्रकृतिरभिन्ना 82a/msK
सर्व्वात्मस्वभावा व्यक्ताव्यक्तविकाराणामन्वयदर्शनात् । ये व्यक्ता विकारा
महदादयो ये चाव्यक्ताः प्रधानात्मनि व्यवस्थितास्तेषा मप्यन्वयदर्शनादिति
। अपरे तु पठन्ति । एका प्रकृतिरव्यक्ता । व्यक्तविकाराणामिति व्य-
क्तरूपाणां विकाराणामिति चाहुः । प्रकृतार्थविपर्य[ये]णेयं यथा प्रवृत्तेति
प्रदर्शनाऽ र्थमाह [।] स कापिल एवमुक्तवान्पर्यनुयुज्यते VN$_{ms}$:19b4
। अथ प्रकृतिर्विकार इत्येतदुभयङ्कथं लक्षयितव्यं । प्रतिपत्तव्यमिति । स
एवमनुयुक्तः प्राह । यस्यावस्थितस्य धर्मान्तरनि वृत्तौ धर्मान्तरम्प्रवर्त्तते सा
प्रकृतिरवस्थितरूपा । यत्तत्प्रवृत्तिनिवृत्तिसद्धर्मान्तरं स विकार इति लक्ष-
यितव्यं । परमुक्तवान् साङ्ख्यः प्रकृतार्थपरित्यागदो षेणोपपाद्यते । सोयम्वादी
प्रकृतार्थविपर्ययादनियमात् कथाम्प्रसञ्जयति । पूर्व्वप्रकृतं परित्यजतीत्यर्थः ।
कथमित्याह [।] प्रतिज्ञातं खल्वनेनेति VN$_{ms}$:19b5 पूर्वोक्तं स्मर यति 133/s
। यद्येवङ्को दोष इत्याह । सदसतो रित्यादि । सतस्तिरोभावमेकान्तेन
विनाशमन्तरेण न कस्यचिद्धर्मस्य प्रवृत्त्युपरमः सिध्यति । केन चिद्विरूपे
णावस्थाने सति स तिरोहितोऽङ्गस्तस्यावस्थितस्यात्मभूतः परभूतो वा भ-
वेत् । आत्मभूतत्वे तिरोहितादव्यतिरेकात् तिरोहितवदवस्थितस्याप्यनवस्थानं
अवस्थितवच्च तदव्यतिरेकतस्तिरोहितस्याप्यवस्थानमासंक्यते । परभूतत्वेपि
कथमनन्वयो न विनाशो न ह्यन्यस्यावस्थानेऽन्यदवतिष्ठते । अन्यो वान्य-
स्यान्वयश्चैतन्यस्याऽ पि घटान्वयप्रसङ्गात् । तथा नासत आविर्भावमुत्पाद-
मन्तरेण कस्यचिद्धर्मस्य प्रवृत्तिर्वा सिध्यति । § 244

ननु च विद्यमानमेव धर्मान्तरमाविर्भाव्यते । ग्रहणविषयभा वमापाद्यते 82b/msK
। न विद्यमानस्य क्रियास्त्युपादानमिति उपलब्धिर्वा विद्यमानत्वात् । न कार-
कजन्यत्वमित्येवं प्रत्यवस्थितः प्रतिषिद्धः साङ्ख्यः । क्वचित् सप्तम्यापद्यते । तत्र
प्रत्य वस्थिते प्रतिवादिनि सतीति व्याख्येयं । यदि स कापिलः सतो धर्म-
स्यात्महानमसतश्चात्मलाभमभ्युपैति तदानीमपसिद्धान्तो भवति । अभ्युपग-
मविरुद्धस्य प्रतिज्ञा नादपसिद्धान्तसंज्ञकं निग्रहस्थानमस्य भवतीत्यर्थः । अथ

५ नः] ? पनयः
२६ मासं] ? शं

सत आत्महानमसतश्चात्मलाभन्नाभ्युपैति । एवमप्येकप्रकृतिर्विकाराणामिति
योयं पक्षः पूर्व्वप्रतिज्ञातः सोस्य न सिध्यति प्रकृतिविकारलक्षणस्यानवस्थित-
त्वात् । तथा हि तयोर्लक्षणं यस्यावस्थितस्येत्यादिनोक्तं । तस्य चायोगः ।
सदसतोश्चे VN_{ms}:19b6 त्यादिना प्रतिपा[ि]दत इत्येतावा न्परग्रन्थः ।
अत्र सम्प्रत्याचार्यः प्रतिविधत्ते । इतोपि प्रतिविदध्मह इति शेषः । न क-
श्चिदनियमात् सिद्धान्तनीतिविरोधात् साङ्ख्य स्य प्रसङ्गः । तस्माद्यत्तेनोपग तं
नासदुत्पद्यते न स[त्]तिरोभवतीति तस्य समर्थनायेदमुक्तं । किमुक्तमित्याह
[।] एकप्रकृतिकमिदं व्यक्तमन्वयदर्शनादिति VN_{ms}:19b8 । तत्रैकेत्येत-
134/s देव विभजति । तदवि भक्तयोनिकमिदं व्यक्तं । ते सुखादयोऽविभ-
क्ताः अपृथग्भूता योनिः स्थानमधिकरणं यस्य व्यवतस्य तत्तदविभक्तयोनिकं
किङ्कारणं तदन्वयदर्शनात् । तै[ः] सुखादिभि रन्वयदर्शनात् तादात्म्योप-
लम्भात् । ततः किं सिद्धमित्याह व्यक्तस्य तत्स्वभावता सुखादिस्वभावता
। तत्र स्वभावतैव कथन्निश्चितेत्याह । अभेदोपलब्धे VN_{ms}:19b8 रिति ।
सुखादिभिः शब्दादीनामनानात्वदर्शनादिति यावत् । एवमपि किं सिद्धम्भ-
वतीत्याह । सर्व्वस्य VN_{ms}:19b9 शब्दादेर्विकारग्रामस्य सुखाद्यात्मकस्य
83a/msK नोत्पत्तिविनाशाविति सम्भवति । कस्मादि त्याह [।] सुखादीनामुत्प-
त्ति विनाशाभावात् । सुखाद्यव्यतिरेकात्तदात्मवच्छब्दादयोपि नित्याः सिद्धा
भवन्ति । तथा च यत्पूर्व्वमभ्युपगतं नशतो विनाशो नासदुत्पद्यत इति । त-
त्समर्थि तं भवति । अत्रैवं कापिलेन स्वोपगमे समर्थिते सति तदुक्तस्य तेन
साङ्ख्येनोक्तस्य हेतोरन्वयदर्शनस्य दोषमसिद्धतादिकमनुद्भाव्य स एवमुक्त-
वान् पर्यनुमुज्यते । अथ प्र कृतिर्निर्विकार इति कथं लक्षयितव्यमित्येवं
विकारप्रकृत्योर्लक्षणं पृच्छन् स्वयमयमक्षपादः प्रकृतासम्बन्धेनानियमात् प्र-
कृतार्थोपरोधात् कथाम्प्रवर्त्त यति । यस्मात् प्रकृतिविकारयोरिह लक्षणं न
प्रकृतमेव तत्किन्तदभिधाय पर्यनुयुज्यते तस्मादप्रस्तुतपर्यनुयोक्तृत्वादक्षपाद
एव निग्रहार्ह इति भावः । किन्तर्ह्यत्रोत्तरसम्बद्ध वाक्यमित्याह [।] तत्रान्व-
यदर्शनहेताविदं स्याद् वाच्यं VN_{ms}:20a1 । व्यक्तन्नाम प्रवृत्तिनिवृत्तिधर्मकं
न तथा व्यक्तवत् सुखादयः प्रवृत्तिनि वृत्तिधर्मका इति लिङ्गवचनपरिणामेन
सम्बन्धः । तथा च व्यक्तस्य सुखाद्यन्वयेऽस्य व्याख्यानं सुखादिस्वभावतायां
सत्यां प्रवृत्तिनिवृत्तिधर्मतालक्ष णं व्यक्तस्यावहीयते । तदव्यतिरेकेण तेषाम-
पि सदावस्थानात् । इति तस्मान्न तद्रहितसुखादिस्वभावता व्यक्तस्य ।
ताभ्याम्प्रवृत्तिनिवृत्तिभ्यां रहितास्तथोक्तास्ते च सु खादयश्च । ते स्वभावो
यस्य तस्य भावस्तद्रहितसुखादिस्वभावता । कस्मादित्याह [।] व्यक्तल-
135/s क्षणविरोधादिVN_{ms}:20a2ति व्यक्तस्य लक्षणं प्रवृत्तिनिवृत्तिधर्मकत्वं तस्य
तद्विपरीतः । सुखादिभिः परस्परपरिहारस्थितिलक्षणो विरोधः । तथा च
साधनन्न सदावस्थितरूपसुखादिस्वभावमिदं ते व्यक्तं प्राप्नोति तद्विपरीत-
83b/msK धर्मत्वात् । क्षेत्रज्ञवत् न च सुखादिव्यक्तयोरेक- स्वभावता । परस्पर-

१८ श्र] ? स

विरुद्धधर्माध्यासितत्वात् । सत्त्वरजस्तमसामिव चैतन्यानामिव वा । एवञ्च व्यक्तस्य सुखादिस्वभावतायोगे सुखाद्यन्वयदर्शन सिद्धो हेतुः । कस्मादिदं सम्बद्धं दूषणमित्याह । एवं हि तस्य साङ्ख्यस्य साधनदोषोद्भावनेन हेत्व-सिद्धताचोदनेनैकप्रकृतीदं व्यक्तमित्ययं पक्षो दूषितो भवनि VN$_{ms}$:20a3 । स पु नर्नैयायिकः साधने दोषमसिद्धताख्यमनुपसंहृत्यापदर्श्य अप्रकृत-प्रकृतिविकारलक्षणपर्यनुयोगेन कथां प्रतानयत्यविमुच्यं स्वदोषमन्यमात्कथा प्रसङ्गं परत्र साङ्ख्ये तपस्विन्युपक्षिपति । पर आहायमेवासिद्धताख्यो दोषोनेन प्रकारेण प्रकृतिविकारलक्षणपर्यनुयोगद्वारेणास्माभिरप्युच्य त इति । आचार्य आह । एष नैमित्तिकानां VN$_{ms}$:20a3 ज्योतिर्ज्ञानविदां विषयः । नायं त्वदुक्तस्य वाक्यस्यार्थ इति यावत् । यतो न लोकः शब्दैरप्रतिपादितम-र्थं प्रति पत्तुं समर्थः अर्थप्रकरणादिभिर्विनेत्यध्याहारः । तस्मात् स एवायं VN$_{ms}$:20a4 प्रतिज्ञाविरोधप्रस्तावे निर्दिष्टो भण्डालेख्यन्यायोत्राप्यपसिद्धान्तो न केवलं तत्रेत्यऽ पि शब्दः । यथा हि भण्डाः प्राकृतान् विस्मापयन्तः शीघ्रमर्द्धचन्द्राकारामल्पीयसीं रेखामालिख्य भणन्ति पश्यत तालमात्रेण ह-स्ती विलिखितोस्माभिरिति तत्र केचि त् मन्दमतयस्तथैव प्रतिपद्यन्ते । केचिद् दुर्विदग्धधियः पर्यनुयुञ्जते । ननु नोस्य कर्ण्णपाददन्तादयः प्रतीय-न्ते तत्कथमयन्तद्विकलो हस्ती भवतीति । ते पु नराहु ः । सत्यं न प्रतीयन्ते । अस्माभिस्तु समाप्तसकलकलः करेणुरयं लिखितः । तास्तस्य सकलाः कलाः सलिल इव मग्नत्वान्नोपलभन्ते कुम्भकदेशमात्रन्त्विदमस्योप लभ्यत इति तथाजातीयकमेतत् परस्यापि धार्ष्ट्यविजृम्भितं । यदि नाम नायमर्थोस्माद् बाह्यात् प्रतीयते तथाप्यनेन प्रकारेणोच्यत इति । अपि चोच्यतां यमेवार्थोनेन प्रकारेण तथाप्यसिद्धस्य हेत्वाभासेष्वन्तर्भावात् तद्व-चनेनैवाभिधानमिति नापसिद्धान्तः पथगुपादेयो भवेदित्येतदुपसंहारव्याजेनाह । यथो क्तेन न्यायेने VN$_{ms}$:20a4 त्यादि ॥ ० ॥ § 245 84a/msK

136/s

हेत्वाभासाश्च यथोक्ता इति सूत्रं । इदमाक्षेपपूर्वकं वात्स्यायनो व्याचष्टे । किं पुनरिति VN$_{ms}$:20a6 हेत्वाभासलक्षणाद्यदन्यल्लक्षणं तेन सम्बन्धा न्निग्रहस्थानत्वमापद्यन्ते । किमिवेत्याह । यथा प्रमाणानि प्रमेयत्त्वं लक्षणान्तर-वसादापद्यन्त VN$_{ms}$:20a6 इति वर्त्तते तानि हिप्रमिति क्रियाया[ः] कार-णत्वात् । प्रमा णानि प्रमाणान्तरेण तु यदा प्रमीयन्ते तदा कर्मत्वात् प्रमेयानि । तत एव पदार्थत्वात् प्राप्तः संशयः । अत्राह मुनिना यथोक्त इति । अस्यैव विवरणं । यथोक्तहेत्वाभासलक्षणेनैव निग्रहस्थान भाव इति । इदमुक्तम्भवति । सव्यभिचारविरुद्धप्रकरणस[म]साध्यसमातीतकालान्या० सू० १।२।४ इति हेत्वाभासा इति प्र भेदमुपक्रम्य यत्प्रत्येकं लक्षणमुक्तं । अनैकान्तिकः सव्यभिचारःन्या० सू० १।२।५ सिद्धान्तमभ्युपेत्य तद्विरोधाद्विरुद्धं न्या० सू० १।२।६ । यस्मात् प्रकरणचिन्ता स निर्ण्णयार्थमपदिष्टः प्रकरण समः

१९ भ] ? भ्य
२८ सा] ? वसा

न्या० सू० १।२।७ साध्याविशिष्टः साध्यत्वात् साध्यसमः न्या० सू०
१।२।८ कालात्ययापदिष्टः कालातीत न्या० सू० १।२।९ इति तेनैव
लक्षणेनैषान्निग्रहस्थानत्वं न पुनस्तत लक्षणान्तरमपेक्ष्यत इति । अत्रापी
VN$_{ms}$:20a7 त्याचार्यः । कथञ्चिन्त्यमित्याह । किन्ते यथा भवद्भिर्लक्षित-
प्रभेदास्तथैव ते भवन्त्याहो स्विदन्यथे ति VN$_{ms}$:20a7 । लक्षितः प्रभेदो
84b/msK येषामिति विग्रहः । तत्तर्हि किन्त[द्] चिन्त्यत इत्याह तत्तु चिन्त्यमान-
मिहातिप्रसज्यत इति न प्रतन्यते । इदमेवागूरितं । विदन्त्येव केचिदत्र
हेत्वाभासा एव न युज्यंते केचित्तु हेत्वाभासा अपि न सङ्गृहीता इत्यस्मिंश्च
विचारे हेत्वाभास वार्त्तिकं सकलमवतारयितव्यमिति शास्त्रान्तरमेव भवेत्
। अवदातमतयस्त्वस्मद्विहितहेत्वाभासलक्षणविपर्ययेण दूरान्तरत्वात्तद् वैसशं ।
तस्मादुपेक्षे व युज्यत इति । तथापि मन्दमतिविबोधनायापि शास्त्रमुच्यत
इति । कालातीतप्रकरणसमयोस्तावद्धेत्वाभासत्वं यथा नोपपद्यते तथा वर्ण्य-
ते । तत्र कालात्ययापदि ष्टः कलातीतः तदिह [।] बृद्धनैयायिकानामपास्य
मतमाचार्य दिङ्नाग पादैर्भाषितत्वादिदानीन्तना वात्स्यायना दयोमुमेव स्थिप-
क्षमाहुः । तत्रैवम्ब्रूमः । कालात्ययेन युक्तो यस्यार्थैकदेशोऽपदिश्यमानस्य
137/s स कालात्ययापदिष्टः कालातीत इत्युच्यते । निदर्शनं [।] नित्यः शब्दः
संयोगव्यंग्यत्वाद्रूपवत् । प्रागूर्द्ध्वं च व्यक्तेरवस्थितं रूपं प्रदीपघटसंयोगेन
व्यज्यते । तथा शब्दो व्यवस्थितो भेरीकर्ण्णसंयोगेन दारुपर्णयोगेन वा
व्यज्यते । तस्मात्संयोगव्यंग्यत्वान्नित्यः शब्द इति । अयमहेतुः कालात्य-
यापदेशात् व्यंजकस्य संयोगस्य कालं न व्यंग्यस्य रूपस्य व्यक्तिरत्येति
सति प्रदीपसंयोगे रूपस्य ग्रहणं भवति । न निवृत्तसंयोगे रूपङ्गृह्यते ।
निवृत्ते तु दारुपर्णसंयोगे दूरस्थेन शब्दः श्रूयते विभागकाले नेयं शब्दस्य
व्यक्तिः संयोगकालमत्येतीति संयोगनिमित्ता भवति । कारणाभावाद्धि कार्या
भाव इति । नन्वयमनैकान्तिक एव । संयोगव्यंग्यत्वादिति । अनित्यमपि
संयोगेन व्यज्यमानं दृष्टं यथा घट इति । न । संयोग व्यंग्यत्वेनावस्थान-
85a/msK स्य साध्यत्वान्न ब्रूमो नित्यः शब्द इति । अपि त्ववतिष्ठते शब्द इत्य-
यं प्रतिज्ञार्थस्तदा च संयोगव्यंग्यत्वादित्ययं हेतुरनैकान्तिको न ह्यनवस्थितं
किञ्चित्संयोगेनाभिव्यज्यमान[ं] कथमिति तदनेन प्रकारेण संयोगव्यङ्ग्यत्व-
मेव शब्दस्य प्रतिषिद्ध्यत इति नायमसिद्धाद् व्यावर्तते । अन्यथानेयं शब्दस्य
व्यक्तिः संयोगिकालमत्येतीति न संयोगनिमित्ता भवतीति । वचनस्य कोर्थ
इति वक्तव्यं । स्याद् बुद्धिः सर्वदाधर्मिण्यविद्यमानस्यासिद्धत्वं । अयन्तु न
सर्वथा धर्मिण्यसिद्धो येनोत्पत्तिकाले संयोगव्यङ्ग्यत्वमस्ति । न तूपलब्धिकाल
इति । तदुक्तं । एकदेशासिद्धस्यापि असिद्धत्त्वदपरिज्ञानात् । यथा नित्याः
परमाणवो गन्धवत्वात् । श्वेतनाश्च तरवः स्वापादिति । यश्चा नित्यः शब्द
इति प्रतिजानीते स कुठारदारुसंयोगादेः शब्दस्योत्पत्तिमेव प्रतिपद्यते । न
पुनरवस्थितस्याभिव्यक्तिमिति व्यक्तमस्यान्यतरासिद्ध त्वं । अथ संयोगे स-

१० शं] ?

त्युपलब्धेरिति हेत्वर्थाभ्युपगमान् नायमसिद्धो हेतुरिति समाधीयते । तथापि तैलतेजोवर्त्तिसंयोगे कुलालमृत्पिण्डदण्डसं योगे च सति दीपघटादयः समुपलभ्यन्ते । न च तेषान्तत्र संयोगाप्राप्त्यवस्थानमित्यनेनानैकान्तिक एव प्राप्नोतीति न कालातीतः । तदुत्तरकालमप्यवस्थाने साध्ये समुदायान्तरव्यय वादिनो विरुद्धः । सपक्षाभावादेव तत्र वृत्तेरभावात् । क्षणस्थितिधर्मवति च धर्मिणि । रूपादिके विद्यमानत्वात् । स्थिरभाववादिनन्तु प्रति प्रतिबन्धवैकल्यं साधनवैफल्यञ्च । अनङ्गीकृतसिद्धान्ते तु न्यायवादिनि प्रतिवादिनि पूर्वपक्षप्रतिपादितो दोष इति । एवमुदाहरणान्त रेपि दूषणमुत्प्रेक्ष्य वक्तव्यमिति 85b/msK
॥ ० ॥ § 246

यस्मात्प्रकरणचिन्ता स निर्ण्णयार्थमपदिष्टः प्रकरणसमः । न्या० सू० १।२।७ विमर्शाधिष्ठानौ पक्षप्रतिपक्षावनवसितौ प्रकरणन्तस्य चिन्तामविमर्शात् प्रभृति प्राङ्निर्ण्णयात् परीक्षणं सा यत्र कृता स निर्ण्णयार्थं प्रयुक्तोभयपक्षसाम्यात् प्रकरण मनतिवर्त्तमानः प्रकरणसमो न निर्ण्णयाय कल्प्यते । कस्मात्पुनः प्रकरणचिन्ता तत्वा{??}पलब्धेः । यस्मादुपलब्धे तत्वेर्थे निवर्त्तते चिन्ता तस्मात्सामान्येनाधिग तस्य या विशेषतोऽनुपलब्धिः सा 138/s
प्रकरणचिन्तां प्रयोजयतीति । उदाहरणमनित्यः शब्दो नित्यधर्मानुपलब्धेः । अनुपलभ्यमाननित्यधर्मकमनित्यन्द ष्टं स्थाल्यादि । यत्र समानो धर्मः संशयकारणहेतुत्वेनोपादीयते संशयसमः सव्यभिचार एव । या तु विमर्शस्य विशेषापेक्षतोभयपक्षविशेषानु पलब्धौ सा प्रकरणम्प्रवर्तयति । यथा च शब्दे नित्यधर्मो नोपलभ्यते तथानित्यधर्मोपि । सेयमुभयपक्षविशेषानुपलब्धिः प्रकरणचिन्ताम्प्रयो जयति कथम्विपर्यये प्रकरणनिवृत्तेः । यदि नित्यधर्मः शब्दे गृह्येत न स्यात्प्रकरणं । यदि [न] नित्यधर्मो गृह्येत एवमपि निवर्त्तते प्रकरणं । सोयं हेतु रुभौ पक्षौ प्रवर्त्तयन्नान्यतरस्य निर्ण्णयाय कल्प्यत इति । न त्वयं साध्याविशिष्ट एव । नाविशिष्टः । तस्यैव प्रकरणप्रवृत्तिहेतोर्द्धर्मस्य हेतुत्वेनोपादानात् । यत्र साध्येन समानो धर्मो हेतुत्वेनोपादीयते स साध्याविशिष्टः । यत्र पुनः प्रकरणप्रवृत्तिहेतुरेव स प्रकरणसम इति । अत्रापि नित्यानित्यधर्मानुपलम्भद्व यादेव प्रकरणचिन्ता । न त्वेकस्मात् । विपर्यये 86a/msK
प्रकरणनिवृत्तिरिति वचनात् । तद्यदि नित्यानित्यधर्मानुपलब्धेरिति हेतुः स्यात् । स्यात् प्रकरणसमः । तदेकधर्मानु पलब्धेस्तूपादाने कथं प्रकरणसम इत्यभिधानीयं । उभयधर्मानुपलम्भोपादानेपि सपक्षविपक्षयोरनुवृत्तिव्यावृत्योरनिश्चयादसाधरणानैकान्तिको भवतीति कथमस्य हेत्वा[भा]सान्तरत्वं । भवतु नामैकधर्मानुपलब्धिरेव हेतुः प्रकरणसमः । तथापि नित्यशब्दवाद्यवश्यमेव व्यामोहान्नित्यधर्मान् प्रतिपद्यत इति प्रतिवाद्यसिद्धीयं भवति । अथ प्रमाणेन नित्यधर्म्मप्रतिक्षेपान्नित्यधर्मानुपलब्धिः प्रतिपाद्यते । तदापि निश्चायकत्वात् सम्यग्ज्ञानहेतुरेवायं इति कथं हेत्वाभासः प्रकरणसमः । तदा हि विशेषोपल-

५ य] ?

ब्धिरेव हेत्वर्थो व्यवतिष्ठते । विशेषाश्च नित्यस्य कृतकत्वादयः । न च तत्कृता प्रकरणचिन्ता विपर्यये प्रकरणनिवृत्तेरिति वचनात् । अपि च नित्यधर्मानुपलब्धेरिति किमयं प्रसज्यप्रतिषेधः किम्वा प्रतियोगिविधानं [।] यदि प्रसज्यप्रतिषे धस्तदा प्रमेयत्वादिवत् साधारणानैकान्तिकोयं नित्यधर्मोपलब्धिः प्रतिषेधमात्रस्यानित्यत्वरहितेष्वसत्स्वपि सम्भवात् । अथ प्रतियोगिविधानन्तदाप्यनन्तरो दितया युक्त्या हेतुप्रतिरूपत्वायोगः । अन्यस्त्वन्यथेदं सूत्रद्वयं व्याचष्टे । यो हेतुर्हेतुकालेऽपदिष्टोऽत्येत्यपैति । कस्मादपैति । प्रत्यक्षेणागमेन उभयेन वा पीड्यमानः स कालमतीत इति कालातीत इत्युच्यते । कुतः पुनः प्रत्यक्षागमविरोधो लभ्यत इति चेत् । चतुर्लक्षणो हेतुरिति वचनात् । 86b/msK तथाहि पूर्ववच्छेष वत्सामान्यतो दृष्ट न्या० सू० १।२।५ श्चेत्यत्र चतूरूपो हेतुरिष्टः । पूर्ववन्नाम साध्ये व्यापकं । शेषवदिति तत्समानेस्ति । सामान्यतश्च दृष्टश्च शब्दादविरुद्धश्चेति । तथा भाष्यवचनमप्यस्ति । यत्पुनरनुमानं प्रत्यक्षागमविरुद्धं न्यायाभासः स इति । तदेवं त्रैरूप्ये सति प्रत्यक्षागमाभ्यां 139/s यो वाध्यते स कालात्ययापदिष्टः । स च त्रिधा भिद्यते प्रत्यक्षविरुद्ध आगमविरुद्ध उभयविरुद्धश्चेति [।] प्रत्यक्षविरुद्धो यथा अनुष्णोग्निर्द्रव्यत्वादुदकवत् । आगमविरुद्धो यथा ब्राह्मणेन सुरा पातव्या द्रवत्वात् क्षीरवत् । उभयविरुद्धो यथाऽ रश्मिवच्चक्षुरिन्द्रियत्वाद् घ्राणादिवदिति । न चायं किल पक्षविरोधः पक्षविरोधस्य प्रतिक्षेपादिति । तदेतत् त्रैरूप्यलक्षणानववोधवैशद्यं [।] त्रैरूप्यं हि यदा स्वं प्रमाणैः परिनिश्चितं पक्षधर्मत्वादिकं त्रयं च यत्र बाधा तत्र प्रतिबन्धोस्ति । बाधाविनाभावयोर्विरोघात् । अविनाभावो हि सत्येव साध्यधर्मे हेतोर्भावः कथञ्चासौ तल्लक्षणो धर्मिणि हेतुः स्यान्न चात्र साध्यधर्म इत्यादिकमत्राबाधितविषयत्वदूषणानुसारेण वक्तव्यं । यत्र पुनरियं बाधोदाहृता न तेषां त्रैलक्षण्यं मनागप्यस्ति प्रतिबन्धवैकल्यात् । अभ्युपगतपक्षप्रयोगस्य च पक्षदोष एवायं युक्तः । यत्पुनः पक्षदोषत्वपरिहाराय बह्वसम्बद्धमुद्ग्राहि तं तदत्यन्तमसारमिति नेहावसीयते ॥ ० ॥ § 247

यस्मात्प्रकरणचिन्तेति प्रकरणं भाष्ये निरूपितं । तस्योदाहरणं । अणुरण्वन्तरकार्यत्वं प्रतिपद्यते नवेति चिन्तायाङ्कश्चिदभिधत्ते । अणुरण्वन्तरकार्यो रूपादिमत्वात् तद्व्यणुकादिवदिति । योसावणोरणुः कारणत्वेनोपादीयते तत्रापि रूपादिमत्वमस्तीति 87a/msK चिन्ता किमियं रूपादिमत्वादण्वन्तरकार्यो न वेति चिन्ता- याश्च यदि तस्याप्यण्वन्तरकार्यत्वं रूपादिमत्वादिति वक्ति तदा तस्यापि रूपादिमत्वमस्तीति पुनरपि चिन्ता तदेवमनवस्थारूपं प्रकरणं प्रवर्त्तयतीति प्रकरणसम इत्युच्यते । अथाणुरण्वन्तरकार्यत्वं न प्रतिपद्यते रूपादिमत्वे सति तदानैकान्तिको हेतुरिति तस्माद् भि द्यतेऽनैकान्तिकात् प्रकरणसमः । न चायम्विरुद्धोऽविपर्ययसाधकत्वात् । नासिद्धः पक्षधर्मत्वदर्शनात् । न कालात्ययापदिष्टः प्रत्यक्षागमाभ्यामबाध्यमानत्वात् । अतोऽर्थान्तरमिति । अथवा प्रदेशे करणं प्रकरणश्चेति कारणसिद्धिरित्यर्थः । प्रदेशे सिद्धिरितीयं चिन्ता यस्माद्धेतोरपदिष्टा भवति स प्रकरणसमः स प्रदेशसाधकत्वात् समः

। यथैकदेशेऽसाधकत्वन्तथेतरत्रापीत्यसाधकत्वसामान्यात् समः । तस्मादेकदेशवर्त्ती धर्मः प्रकरणसमः । तद्यथा पृथिव्यप्तेजोवा य्वाकाशान्यनित्यानि सत्तावत्वादिति । अत्रापि यद्यक्ष पाद मतानुसारी तावदेवं प्रमाणयति । परमाणुः परमाण्वन्तरपूर्व्वको रूपादिमत्वाद् द्व्यणुकादिवदि ति तदा तस्याभ्युपेतविरोध इति नायमतीतकालाद् भिद्यते । अथ बौद्धः करोति । तदापि हेतोरसिद्धिः परमाणूनां रूपादिव्यतिरेकेणानभ्युपगमात् । अयोगाच्च द्व्यदीनाञ्चाभावादुभयविकलो दृष्टान्तः । यदाप्यनपेक्षितसिद्धान्तो न्यायवादी ब्रूते तदापि द्वितीय- 140/s पक्षोदितदोषानिवृत्तिरिति नायमसिद्धाद्यावर्त्तते । योऽ प्यनुमेयैकदेशवर्त्ती धर्मः पृथिव्यादीन्यनित्यानि गन्धवत्वादिति अयमप्यपसिद्धान्तान्तर्भूत एवेति न पृथग्वाच्यः । नासिद्धः पक्षैकदेशधर्मत्वात् । सपक्षैकदेशवर्त्तित्व दिति चेत् 87b/msK विषमोयमुपन्यासः । सपक्ष एव च सत्वमित्यत्र हि समुच्चीयमानावधारणमेव न सकलसपक्षधर्मतां साधनस्य प्रतिपादयति । अनुमेये सत्ववचनं पुनरयोगव्य वच्छेदेन नियन्तृभूतमशेषसाध्यधर्मिधर्मतायाः प्रतिपादकमित्यनेनैव पक्षैकदेशासिद्धभेदानामपोहः कृत इत्यपार्थकं यत्नान्तरमिति यत्किञ्चिदेतत् ॥ ० ॥ § 248

भावि विक्तो प्यत्रैव खररवे पतितः । प्रकरणसममन्यथा समर्थयति । यस्माद्धेतो[ः] प्रकरणचिन्ता विपक्षस्यापि विचारः पश्चाद् भवति स एवं लक्षणो हेतुनिर्णयाय योपदिश्यमानः प्र करणसमो भवति । प्रकरणे साध्ये समस्तुल्यः सत्त्वे ऽसत्त्वे वा यथा सत्सर्वज्ञमितरतद्विपरीतविनिर्मुक्तत्वाद् रूपादिवदिति । यस्मादयं हेतुरुभयत्र समानो योप्यस त्वं साधयति तस्यापि समानः । कथमसत्सर्वज्ञत्वमितरतद्विपरीतविनिर्मुक्तत्वात् खरविषाणवदिति । न चायं किलोभयधर्मत्वेप्यनैकान्तिको विपक्षवृत्तिर्वैकल्या त् । तदिदमाचार्येण स्वयं प्रमाणविनिश्चये * प्रतिसिद्धं । कम्पुनरत्र भवान् विपक्षं प्रत्येति साध्याभावं । कथमिदानीं हेतुं विपक्षवृत्तिरुभयधर्मेणैवेत्यादिना । अर्थग्रहण व्याख्याने च यदुक्तं तदत्रापि वक्तव्यं । विशेषेण दूषणञ्चास्य प्रपञ्चेनोक्तमेव । एवं प्रकरणसमातीतकालयोरनुपपत्तिः । साध्यव्यभिचारस्य तु युज्यते हेत्वाभासत्वं न तु यथा भवतामभ्युपगमः । तथा हि भवन्तः सन्दिग्धविपक्षव्यावृत्तिकस्यानैकान्तिकत्वं न प्रतिपद्यन्ते । अदर्शनमात्रेणैव व्यतिरेकसिद्ध्यभ्युपगमात् । अत एव च भवद्भि रपगतसङ्कैरेवं प्रयुज्यते प्राप्यकारिणी चक्षुःश्रोत्रे बाह्येन्द्रियत्वात् घ्राणादिवत् । सविकल्पं प्रत्यक्षं प्रमाणत्वादनुमानवदित्यादि । न चादर्शनमात्रेणैव विना प्रतिबन्धे न 88a/msK व्यतिरेकसिद्धिरिति प्रतानितमन्यत्र ।

...45 आत्ममृच्चेतनादीनां यो भावस्याप्रसाधकः ।

२३ *] आचार्यधर्मकीर्तिप्रणीतेषु सप्तसु न्यायप्रबन्धेष्वन्यतमो ग्रथःSee → bStan-ḥ gyur, mdo.XCV. 11

२३ तिसि] ? षि
२९ स] ? श

स एवानुपलम्भः किं हेत्वभावस्य साधक [४५][§ 251]

इत्यादिना । तथा सपक्षविपक्षयोः सन्दि ग्धः सदसत्वस्यापि सम्यग्ज्ञानहेतुत्वमेव युष्माभिरिष्यते नानैकान्तिकत्वं यथा सात्मकं जीवच्छरीरम्प्राणादिमत्त्वादिति । अस्य च तद्भावः प्रतिपादितः प्रमाणविनिश्चया दौ

141/s विरुद्धप्रभेदस्तु भारद्वाज विहितः प्रति ज्ञाविरोधप्रस्ताव एव निराकृतः । साध्यसमेपि योयमन्यथासिद्धो वर्ण्यते यथाऽनित्याः परमाणवः क्रियावत्वाद् घटादिवदि ति अयमपि किल साध्यसमो यस्मात् मूर्तिक्रियारूपादिमत्वादणूनां क्रियावत्वं नानित्यत्वादिति । स नोपपद्यते । धर्मिणि सिद्धत्वान्नहि धर्मिणि विद्यमान एवासिद्धो हेतुर्युज्यते । सर्वहेतूनामसिद्धताप्रसङ्गात् । नैतदेवन्नहि पक्षेस्तीत्येतावता पक्षधर्मत्वं । साध्यवशेन हि धर्मिणः पक्षधर्मत्वमिष्यते । केवलस्य साध्यत्वा त् [।] न च साध्यो धर्मो यदि धर्मिणि तेन साधनेन विना न सम्भवति तस्य च साधनस्य साध्यधर्माभावे धर्मिणा सम्भवस्ततो हेतोः पक्षधर्मत्वं । यदा पुनरन्यथापि साधनायोपात्ते धर्मिणि धर्म उपपद्यते तदा हेतुत्वमेवञ्च विशिष्टमेव सत्वं पक्षधर्मत्वेन विवक्षितं । अन्यथासिद्धत्वं युक्तमेव साध्यसमं । तदिदमत्र प्रतिविधानं यदि खलु साध्यधर्माभावे धर्मिणि असम्भवो हेतोरेवं विधमेव सत्वं पक्षधर्मत्वेन विवक्षितं न तु भावमात्रं तदा किन्तदित्थंभूतं पक्षधर्मत्वमविज्ञातमेवानुमेयप्रकाशकमाहोस्वित् परिनिश्चितमेवेति प्रकारद्वये यद्यविज्ञातं प्रकाशकं तदाज्ञापकहेतुन्यायमतिवर्त्तते [।] ज्ञापको हि हेतुः स्वात्मनि ज्ञानापेक्षो ज्ञाप्यमर्थं

88b/msK प्रकाशयति । सत्ता मात्रेण च हेतवो विप्रतिपत्तिनिराकारणपटवः सन्तीति प्रतिवादिनां परस्परपराहतं प्रवचननानात्वं न भवेत् । विज्ञातस्यापि गमकत्वे प्रमाणाद्वा तस्य परिनिश्चयः प्र माणाद्वा । न तावदप्रमाणस्य भूतार्थनिश्चयहेतुत्वाभावादप्रमाणाद् गतिरन्यथा प्रामाण्यमेवावहीयते । यस्मादिदमेव प्रमाणस्य प्रमाणत्वं यद्यथावस्थितवस्तुप्रका शकत्वं । तच्चेदमप्रमाणस्याप्यस्ति तदा कथं तद प्रमाणात्साध्ये धर्मिणि विना साध्यधर्मेणासद्भूष्णोर्हेतोः सत्त्वम्पक्षधर्मत्वेनाधिगम्यते तदापि यत एव प्रमाणाद्धेतोः सिद्धिस्तत एव साध्यधर्मस्यापीयं जायत इति किमर्थमयमकिञ्चित्करो हेतुरूपादीयते । न च हेतोरेव केवलस्य ततः सिद्धि [ः] साध्यधर्मस्य तु नेति युक्तम्वक्तुं । हेतोरपि ततोऽसिद्धिप्रसङ्गात् तथा ह्येवमयं हेतु[ः] तत्र धर्मिणि सिध्यति यद्यनेन साध्यधर्मेण विनेह नोपपद्यते सहैव तू पपद्यत इति सिध्येत् । तथा च कथन्तत एव प्रमाणात्साध्यधर्मस्यापि न सिद्धिः सञ्जातेति चिन्तनीयमेतत् । एवञ्च तेनैव प्रमाणेन सहास्य साध्यधर्मस्य । गम्यगमकभावो न त्वनेन हेतुनेति महदनिष्टमापद्यते । एवम्विधपक्षधर्मत्वसमाश्रयणे च यावत् साध्यस्यासिद्धिस्तावद्धेतोरपि यावच्च हेतोरसिद्धिस्तावत्साध्यस्यापीति परस्पराश्रयप्रसङ्गः । पक्षधर्मत्वनिश्चयवेलायाञ्च साध्यधर्मसिद्धिः सम्पद्यत इति व्यर्थमुत्तरलिङ्गरूपानुसरणमित्थञ्च न द्विलक्षणश्चतुर्लक्षणः पञ्चलक्षणश्च हेतुर्वक्तव्यः । अस्मन्मते तु धर्मिणि सत्वमात्रं विज्ञाय च तदुत्त-

रकालमन्वयव्यतिरेकयोर्विज्ञानमन्वयव्यतिरेकौ वा सर्व्वोपसंहारेण विज्ञायत उत्तरकालं धर्मिणि सत्वमात्रं विज्ञातमतश्चानन्तर्येणैव तत्सामर्थ्यात्साध्यध- 89a/msK र्मस्य तत्र प्रतीतिरुप पद्यते [।] तेनेदमत्र सकलं दोषजालं नभसीवामले 142/s जले नावस्थानमलं लभत इत्यलमप्रतिष्ठित मिथ्याप्रलापैरिति विरम्यते ।

§ 252

यद्येवं किं पुनरत्रेष्टमिष्टमित्याह । हेत्वाभासास्तु यथान्यायमित्यादि VN$_{ms}$:2a7 ये न्याया हेत्वाभासास्तदुक्तिर्न्निग्रहस्थानम्भवति । ते च ये- स्माभिरुक्ताः ॥

...46 एकाप्रसिद्धिसंदेहेऽप्रसिद्धव्यभिचारभाक् ।
द्वयोर्व्विरुद्धोसिद्धौ च संदेहव्यभिचारभागि [४६]§ 255

ति । § 256

ननु चायं वादन्यायमार्गः सकललोकानिबन्धनबन्धुना वाद- विधानादावार्य वसुबन्धुना महाराजपथीकृतः [।] क्षुण्णश्च तदनु मह- त्यां न्यायपरीक्षा यां कुमतिमतमन्त्तमातङ्गशिरःपीठपाटनपटुभिराचार्य दि- ग्नाग पादैस्तत्किमिदं पुनश्चर्व्वितच र्व्वणमास्थितं त्वयेति । एतच्चोद्यपरिहारप- रमिमं श्लोकमुपन्यस्यतिपन्यस्यते लोक VN$_{ms}$:20a8 इत्यादि । तिमिरञ्च पटलञ्चेति तिमिरपटलं अविद्यैव तिमिरपटलमविद्यातिमिर पटलं भूतार्थद- र्शनविबन्धकत्वात् । तस्योल्लेखनो वादन्याय इति सम्बन्धः [।] उल्लेखनशब्दः कर्तृसाधनः । कस्य पुनरविद्यातिमिरपटलमित्याह । तत्व दृष्टेस्त त्वदर्शनस्य । प्रज्ञालोचनस्येत्यर्थः । य एष समनन्तरमावेदितो वादन्यायः । सद् भिः पूर्वाचार्यैः परहितरतैः करुणापारतन्त्र्याल्लोकान् सम्यग्वर्त्मनि व्यवस्थापयितुं प्र णीतः परां प्रसिद्धिं नीतो लोके सुष्टु स्फुटीकृत इत्यर्थः । न तु परस्पर्द्धया नापि यशःकामतादिभिः ।तद्येवन्तर्हि तदवस्थितं चोद्यमित्यत आह । तत्व- स्यालोकमुद्योतम्वा दन्यायमाचार्यैरुपदिष्टं [।] तिमिरयत्यन्धकारीकरोति कुदूषणतमसा प्रच्छादयतीति यावत् । कः पुनरसावतिसाहसिको यो म- हानागैः क्षुण्णं पन्थानं रोद्धुमीहत इत्याह दुर्विदग्धः सम्यग्विवेकरहिततया 89b/msK जनोय मुद्योतकरप्रीतिचन्द्रभाविविक्त प्रभृतिः । यतश्च एवं तस्माद्यत्नः कृत इह वादन्याय प्रकरणे मया तस्य महद्भिरुद्भावितस्या न्तराजतैरवधूतस्य समुज्वालनाय । कुदूषणपरिहारेण तन्नीत्युद्योतनेन मम व्यापृतत्वान्न मया पिष्टं पिष्टमिति संक्षेपार्थः ॥ § 257

143/s

...47 अनर्घ वनितावगाहनमनल्पधीशक्तिना

१४ त्त] ? मत्त
२३ त] ? य
२७ न्द्र] ?
३१ र्घ] ?

प्यदृष्टपरमार्थसारमधिकाभियोगैरपि ।
मतं मतितमः स्फुटम्प्रतिविभज्य सम्यग्मया
यदाप्तमकृशं शुभम्भवतु तेन शान्तो जनः ॥ [४७][§ 261]

अहश्च [§ 262]

...48 नैरात्म्यबोधपरिपाटि तदोषशैलसम्बुद्धभारवहनक्षमभूरिशक्त-
मञ्जुश्रियः श्रियमवाप्य समस्तसत्त्वसर्वावृतिक्षयविधानपटुर्भवेयं ।
महारयेनैव न किञ्चिदत्र त्यक्तम्वि विक्तं न विभज्यमेव ।
तथापि मन्दप्रतिबोधनार्थमालोक एष ज्वलितः प्रदीपः ॥
[४८][§ 266]

...49 लोकेऽविद्यातिमिरपटलोल्लेखनस्तत्त्वदृष्टे
वादन्यायः परहितरतैरेष सम्य [क्] प्रणीतः ।
तत्त्वालोकं तिमिरयति तं दुर्विदग्धो जनोयन्
तस्माद् यत्नः कृत इह मया तत्समुज्वालनायेति ॥ [४९][§ 270]

विपश्चितार्था नाम वादन्यायटीका समाप्ता ॥ ॥ [§ 271]

कृतिरियंसान्तरिक्षपादानामिति ॥ [§ 272]

सम्वत आचू२ *(272 N.E.–1152 A.D.)* श्रावणकृष्ण एकादश्यांलिखितं मया । राजाधिराजपरमेश्वरपरमभट्टारकः श्रीमदानन्ददे वपादीयविजयराज्ये शुभदिने ॥ [§ 273]

...50 ग्रन्थस्यास्य प्रमाणश्च निपुणैर्न्नवशताऽधिकं ।
सहस्रद्वितयं सम्पत्संख्यातम्पूर्व्वशूरिभिः॥ ० ॥[§ 275]

शुभमस्तु सर्व्वजगतां इ ... ...सर्वैः रक्षितव्यम्प्रयत्नत इति ॥ नमः सर्वज्ञाय ॥ [§ 276]

---

१४ रिक्ष] ? शान्तरक्षित
१९ त्] ? म्यक्
१९ शूरिभिः] ? सूरिभिः

The TEI Header

Abbreviations

VN_{ms} Dharmakīrti (n.d.). **?**Vādanyāya**?** Nagor-Manuscript. Palm-leaf manuscript. 20 leaves in Kuṭilā script. Each page contains 9 to 11 lines. 12th century CE. In June 1934, Sāṅkṛtyāyana found this manuscript in the monastery of Nagor, Tibet.

References

Dharmakīrti (n.d.). **?**Vādanyāya**?** Nagor-Manuscript. Palm-leaf manuscript. 20 leaves in Kuṭilā script. Each page contains 9 to 11 lines. 12th century CE. In June 1934, Sāṅkṛtyāyana found this manuscript in the monastery of Nagor, Tibet.